# *महाभाष्यदिशा ज्ञापकसंग्रहस्य* समीक्षा

(*Mahābhāṣyadiśā Jñāpakasaṃgrahas*ya Samīkṣā)

यादवपुरविश्वविद्यालयस्य कलाविभागस्य संस्कृतविभागे

**पि-एइच्-डि. (Ph.D.)**

इत्युपाधिलाभाय समर्प्यमाणः शोधप्रबन्धः


गवेषकः

**राहुलगाजी**

मार्गदर्शकः

**प्राध्यापकः डॉ. तपनशङ्करभट्टाचार्य्यः**

संस्कृतविभागः

**यादवपुरविश्वविद्यालयः**

कलकाता, पश्चिमबङ्गः

700032


**2023**

## **Certified that the Thesis entitled**

महाभाष्यदिशा ज्ञापकसंग्रहस्य समीक्षा (*Mahābhāṣya*diśā *Jñāpakasaṃgraha*sya Samīkṣā) submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the Supervision of Prof. Dr. Tapan Sankar Bhattacharyya. And that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/elsewhere.

Countersigned by the

Supervisor :

Dated :

Candidate :

Dated :

# कार्तज्ञ्यनिवेदनम्

**ॐ नमः पाणिनिकात्यायनपतञ्जलिभ्यः**
**शब्दविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो गुरुभ्यो महद्भ्यः।**

"ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्" इति श्रुतेः यत्किञ्चिज्जगत्सर्वं यस्य ईश्वरस्यानुग्रहवशादेवानुभाति, यस्य चानुग्रहणेन विना वृक्षस्य पत्रमपि नैव कम्पते, तादृशं साक्षात्परब्रह्मस्वरूपरामकृष्णाख्यं जगद्गुरुं यादवपुर-विश्वविद्यालयस्य कलाविभागस्य संस्कृतविभागे पि-एइच्-डि. (Ph.D.) इत्युपाधये समर्प्यमाणस्य "*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा" इति शीर्षकाङ्कित-शोधप्रबन्धस्य निर्विघ्नपरिसमाप्तये वन्दे। तथैव विश्वस्मिन्विश्वे मे प्रत्यक्ष-देवस्वरूपपितरौ मुहुर्मुहुः प्रणमामि। पुनश्च संस्कृतवाङ्मये मे प्रवेशं कारित-वद्भ्यः साक्षाद्भास्करस्वरूपेभ्यः रामकृष्णमठ-विवेकानन्द-वेदविद्यालयस्य पूर्वतन-प्रांशुपालेभ्यः परमश्रद्धेयेभ्यः वेदतत्त्वानन्दस्वामिपादेभ्यः सप्रणामं हार्दं कार्तज्ञ्यं विज्ञापयामि।

शोधकार्ये प्रवृत्तस्य मे *महाभाष्यस्य ज्ञापकसंग्रहस्य* च ज्ञापकसूत्रविषये आग्रहसमुत्पादनपूर्वकम् सातिशयं समुपस्थितानां समेषां लघुदीर्घसंशयानामपि निरसनात्मकं पुत्रस्नेहगर्भं मार्गदर्शनं विहितं ममाचार्यैः यादवपुरविश्वविद्यालयस्य प्राध्यापकैः विभागाध्यक्षैः डॉ. तपनशङ्करभट्टाचार्य्यमहाभागैः। तस्मात्तेभ्य आचार्येभ्यः डॉ. तपनशङ्करभट्टाचार्य्यमहाभागेभ्यः सविनयं कार्तज्ञ्यं निवेदयामि, तान् गुरुचरान् शिरसा प्रणमामि अपि।

विषयेऽस्मिन् विविधप्रकारेण साहाय्यं कृतवद्भ्यः डॉ. चिन्मय-मण्डलमहाभागेभ्यः, डॉ. स्वरूप-सिंहमहाभागेभ्यः, डॉ. देवार्चना-

सरकारमहाभागाभ्यः, डॉ. काकलि-घोषमहाभागाभ्यः, डॉ. देवदास-मण्डलमहाभागेभ्यश्च प्रणामाः विनिवेद्यन्ते।

पुनश्च शोधकार्येऽस्मिन् सहायभूता केचन ग्रन्थाः रामकृष्णमठ-विवेकानन्द-वेदविद्यालयस्य ग्रन्थालयतः, केचिद् यादवपुविश्वविद्यालस्य मुख्यग्रन्थागारतः केचन च तद्विश्वविद्यालयस्य संस्कृतविभागस्य ग्रन्थालयतः संगृहीताः, केचिच्च आचार्याणां बन्धूनां साहाय्येन लब्धाः। तान् सर्वान् सहायकान् प्रति कार्तज्ञ्यं व्याहरामि।

अस्मिन् च शोधकार्ये साहाय्यम् आचरितवद्भ्यः त्रिदिव-राय-मण्डलः, लक्ष्मीकान्त-मुर्मुः, सुदीप-नस्करः, कुनाल-नस्करः, जय-घोषः, अरूप-घोषः, देवाशिस-घोषः इत्यादिभ्यः मित्रेभ्यः नीलाद्रि-घडा, कल्याण-घोषः, कल्याण-सिन्हा, तौसिफ-इसलामः, सुदीप-वर्मणः इत्यादिभ्योऽग्रजेभ्यः सुवीर-घोषः, मानस-वर्मणः, धनञ्जय-दासः, हिमाद्रि-घोष इत्यादिभ्योऽनुजेभ्यः तथापि-देः, गुलशेनुर्-होसेनः, आफिफा-खातुनः, सुमना-देः, पूजा-दासः, शामिमा-खातुनः, रत्ना-मोदकः, अमृता-विश्वासः इत्यादिभ्योऽनुजाभ्यश्च हार्दं कार्तज्ञ्यं व्याहरामि।

एवञ्च मे शोधकार्यनिर्माणे प्रत्यक्षाप्रत्यक्षसाहाय्यं कृतवद्भ्यः सकलेभ्यः पौनःपुन्येन कार्तज्ञ्यं विज्ञापयामि।

इति विनयविनीतः
राहुलगाजी

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे न हि।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि।।

# प्रास्ताविकम्

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्।।

## प्रकृतशोधस्य उद्देश्यम्

"*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा" इति शीर्षकाङ्कितः मे शोधप्रबन्धः पि-एइच्-डि. (Ph.D.) इत्युपाधये गृहीतः। *महाभाष्ये* तत्र तत्र "आचार्यप्रवृत्ति-र्ज्ञापयति" इत्येवंरूप-परिभाषात्मक-तद्व्यतिरिक्तात्मकनैकवचनानि दृश्यन्ते। तेषु परिभाषाव्यतिरिक्तवचनसंकलनात्मकलघुग्रन्थो हि *ज्ञापकसंग्रहः* इति। तेषां *ज्ञापकसंग्रहो*क्तज्ञाप्यानां सविशदं सविमर्शं *महाभाष्य*सम्मतत्वप्रदर्शनं पतञ्जलि-नागेश-कैयट-दीक्षित-वामन-जयादित्य-वासुदेवदीक्षित-ज्ञानेन्द्रसरस्वती-हरदत्त-जिनेद्रबुद्धि-मतालोचनपूर्वकमसाधितं विशिष्टमध्ययनमेतावता संस्कृत-वाङ्मये विद्वद्भिः शोधार्थिभिश्चेति विभाव्यते। पुनश्च *ज्ञापकसंग्रहस्य* नागेशकर्तृत्वा-कर्तृत्वविषयिणी महती आलोचनाप्यविहितास्तीति मन्ये। अपि च भाष्या-नुढज्ञापितवचनानामपि सविमर्शं दीर्घालोचनाकृता स्यादिति भाव्यते। अतोऽयं विषयः शोधप्रबन्धस्यास्य विषयत्वेन चितो मया।

## प्रकृतशोधस्य फलम्

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचो विन्यासवैचित्र्यमात्रमत्र विचार्यताम्।।

पाणिनिकात्यायनपतञ्जल्युपबृंहितव्याकरणसंसारे नूतनं किं वा पाणिनीयं वक्तुं शक्यम्।

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति प्रयोजनं विना न कस्यापि मानवस्य कस्मिन्नपि कर्मणि प्रवृत्तिर्दृश्यते। मामकस्य शोधप्रबन्धस्यापि वर्तते

नूनमेव किञ्चित् फलम्। शोधप्रबन्धप्रणयनेन तन्निमित्तनानाग्रन्थाध्ययनेन चास्ति तत्रात्मधीशुद्धिरेव प्रथमं प्रयोजनम्। परिभाषाज्ञानेन सह महाभाष्योपनिबद्ध-परिभाषातिरिक्तज्ञापकसिद्धवचनज्ञानमतिशयेनावश्यकमिति विचिन्त्यागृह्यतायं विषयः। भाष्यकारज्ञापितवचनसागरसारभूत*ज्ञापकसंग्रहो*क्तज्ञाप्यज्ञानेन पाणिनीय-ज्ञापक-सूत्राणाम् ज्ञापनपद्धति-विज्ञानस्य नवीनतया दिग्दर्शनं भवेद् इति शोधप्रबन्धस्यास्य द्वितीयं फलम्। *वैयाकरणसिद्धान्तकौमुदी-काशिका*दिलब्ध-*भाष्या*नूढकानिचनज्ञाप्यानामपि रामानुजताताचार्यवर्त्माश्रित्य सविमर्शं विशद्विवरणं विहितं शोधप्रबन्धेऽस्मिन्, येन तत्रत्यज्ञाप्यानि सुलभतया ज्ञातुं शक्यन्ते इति शोधप्रबन्धस्यास्य तृतीयं फलम्। सर्वोपरि सविमर्शज्ञापितवचनसंग्रहविभूषित-शोधप्रबन्धस्यास्याध्ययनं व्याकरण-पठनपाठन-रसिकजनानाम् अभूतपूर्वम् आनन्दम् उपजनयिष्यति इति आशासे।

**प्रकृतशोधपद्धतिः**

"*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा" इति शीर्षकोपेतः शोधप्रबन्धः सोपद्घातोपसंहारं सपरिशिष्टं च चतुर्भिरध्यायैः विभक्तो वर्तते। शोधप्रबन्धस्यास्य "उपोद्घातः" इत्याख्यभागे पाणिनिव्याकरणमाहात्म्यं, शाब्दिकाचार्यपरम्परा, पाणिनिसूत्रप्रकारः, सोदाहरणं परिभाषावैशिष्ट्यं, परिभाषाभेदः, पाणिनि-सूत्रज्ञापितवचनवैशिष्ट्यं चेति विषयाः प्रतिपादिताः। "*महाभाष्य*परिचयः" इत्याख्ये प्रथमाध्याये प्रतिपादितविषयास्तावत्- सम्पूर्णसंस्कृतवाङ्मये अत्यन्तप्रसिद्धायां त्रिमुनिव्याकरणपरम्परायाम् अन्तिमस्थानमलङ्कृतस्य 'यथोत्तरं मुनीनां प्रामाण्याद्'' इति अभियुक्तोक्त्या च परमप्रामाणिकस्य पतञ्जलेः *महाभाष्यम्* इति अभूतपूर्वकृतिः। पाणिनीयव्याकरणं तावत् सूत्रवार्त्तिकभाष्यात्मकम्। सूत्रवार्त्तिकयोः विरोधे सति भाष्यस्यैव प्रामाणिकत्वं स्वीक्रियते। इष्टिसंवलित*महाभाष्यस्य* तस्य प्रतिपाद्यविषयवर्णनवेलायां पतञ्जलि-देशादिसामान्यपरिचयः प्रदत्तः, 150 आनुमानिक-ईसवीयपूर्ववर्षोद्भवस्य पतञ्जलेः

जन्मकालस्तु अत्यन्तविवादग्रस्तः अतः *महाभाष्य*रचनाकालविमर्शः प्रस्तुतः, भाष्योपलब्धप्रमाणानि भाष्याद्बहिःलब्धप्रमाणानि चाधारीकृत्य। ततः पातञ्जल-*महाभाष्य*-वैशिष्ट्यप्रतिपादनकाले सत्स्वपि न्याय-मीमांसादि-नानाशास्त्र-भाष्य-ग्रन्थेषु *अष्टाध्यायी*बहुविधभाष्यव्याख्यानग्रन्थेषु वा कुतो वा एतद्भाष्यस्य महाभाष्यत्वव्यवहारः इति विषये विचारः विहितः। विशालाकायस्य *महाभाष्यस्य* सरलसरसदीर्घसमासाभावलौकिकोदाहरणप्रयोगरहसमयवर्त्म तत्पठितॄणां चेतांसि निश्चयेन आनन्दीकरोति। सर्वोपरि प्रश्नोत्तरशैली पूर्वपक्षमतनिरसनाय च नीरक्षीरविवेकः भाष्यकारस्य नितान्तं पूजनीयः वर्तते। *महाभाष्यस्य* गरिमापि कथिता। अखिलविद्यानामयं आकरग्रन्थ उच्यते। तदुक्तं भर्तृहरिणा-

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।

अस्य च ज्ञानगर्भ*महाभाष्यस्य* नैकवारपठन-पाठनोच्छेदेन समुत्पन्ने पाठभेदे भर्तृहरिकैयटनागेशदादिटीकाकर्तॄणां पाठान्तरं लभ्यते। नागेशः कांश्चित् अपपाठान् दर्शितवान्। कादाचित्कं पौर्वापर्यं दृष्टम्। *महाभाष्य*पुनरुद्धार-निमित्तचन्द्राचार्यकर्तृकयत्नः इत्येवं *महाभाष्य*पाठाव्यवस्था-विषयचर्चा विहिता। ततः *महाभाष्यं* विहायापि नैकग्रन्थकर्तृत्वं पतञ्जलेः उच्यते, केचन ग्रन्थाः तु नाम्नैव विद्यन्ते। *महाभाष्यं* विहायापि पतञ्जलिविरचिताः *निदानसूत्र- योगदर्शन- महानन्दकाव्य- चक्रपाणिपरिष्कार- सिद्धान्तसारावली- कोषः- सांख्यशास्त्र- साहित्यशास्त्र- लोहशास्त्रा*ख्याः कृतयः सन्ति इत्येतद्विषयकविमर्शः कृतः। अन्ते च *महाभाष्यस्य* *महाभाष्यदीपिका- महाभाष्यप्रदीप- प्रदीपोद्द्योत- शब्दकौस्तुभ- अष्टाध्यायीभाष्य- प्राणपणावृत्ति- चिन्तामणि- सूक्तिरत्नाकर- क्षीरोद- भाष्यतत्त्वविवेक- सिद्धान्तरत्नप्रकाश- विद्वन्मुखभूषण- अनुपदा*ख्यटीकानां सविशदं विमर्शः प्रस्तुतः। एतद्भिन्नटीकानामपि नामानि उल्लिखितानि। इत्येवं प्रथमाध्यायस्य समाप्तिर्भवति। "*ज्ञापकसंग्रह*कर्तृत्वविचारः" इत्यभिधेये द्वितीयाध्याये

आलोचितविषयास्तावत्- व्याकरणप्रक्रियादार्शनिकादिसिद्धान्त-सुधाभाण्डारस्य *महाभाष्यस्य* साक्षाद् गुरुमुखाद् अष्टादशवारम् अधीवतः निखिल-व्याकरणतत्त्वज्ञस्य *परिभाषेन्दुशेखर-लघुमञ्जूषा-शब्देन्दुशेखर-प्रदीपोद्यता*दि-व्याकरणरत्नरूपग्रन्थान् लिखितवतः नागेशभट्टमहाभागस्य *ज्ञापकसंग्रहः* इत्याख्यकृतेः तत्कृतत्वम् अस्मिन्नध्याये विचार्यमाणम् अस्ति। वर्तमानास्वपि सूत्र-वृत्ति-वार्त्तिक-भाष्य-दर्शन-प्रक्रिया-सिद्धान्त-व्यवहार-अभिधान-अनुवाद-पारायण-आधुनिकाख्यपरम्परासु मे शोधप्रबन्धे *अष्टाध्यायी*-प्रक्रिया-दार्शनिकक्रमान् आश्रित्य समालोच्य च नागेशस्य प्रक्रियाक्रमे तथा च दार्शनिकक्रमे च अन्तर्भावत्वं प्रदर्शितम्, प्रसङ्गाद् *ज्ञापकसंग्रहाख्यः* ग्रन्थः प्रक्रियाक्रमे अन्तर्भवति इत्यपि आलोचितम्। पुनश्च अस्य महतः सर्वशास्त्रविदः नागेशदेशकालकृतिपरिचयात्मकविमर्शः प्रस्तुतः। पितृमातृगुर्वादि-परिचयः स्पष्टोऽस्ति चेदपि महाराष्ट्रीय-नागेशस्य कालस्तु अद्यावधि आनुमानिक एव। देशपरिचयोऽपि अस्पष्टः। शतंसख्यकग्रन्थनिर्मातुः अस्य अखिलशास्त्र-निष्णातस्य नागेशस्य नैव सर्वे ग्रन्थाः समुपलभ्यन्ते। प्राप्तप्रमाणैः तत्कृतयः लिख्यन्ते। सर्वशास्त्रविदः ज्ञानसागरस्य श्रीहरिदीक्षितान्तेवासिनः नागेशस्य गुरुशिष्यपरम्परा सविवरणं तालिका प्रस्तुता। ततः *ज्ञापकसंग्रहस्य* नागेशकर्तृत्वविचारः विहितः। तद्विचारवेलायां नागेशकर्तृत्वाकर्तृत्वपक्षद्वयम् उपस्थापितम्, अल्पबुद्ध्या मया तु *ज्ञापकसंग्रहस्य* नागेशाकर्तृत्वपक्षः प्रदर्शितः स्वीकृतश्चेति एतद्विषयकविमर्शः प्रस्तुतः। तद्ग्रन्थस्य नागेशकर्तृत्वविचारकाले अध्ययनद्वयं प्रस्तुतम्। *प्रदीपोद्द्योत-ज्ञापकसंग्रह*योः कानिचन विशेषस्थलानि आश्रित्य समीक्षणं कृतम्, एतच्च रामानुजताताचार्यमहाभागप्रदर्शितवर्त्मना विहितम् इत्येकम्, अपरं तावत् *ज्ञापकसंग्रहपरिभाषेन्दुशेखर*योः कानिचित् विशेषस्थलानि आदाय अध्ययनम्। विषमकर्तृत्वपक्षम् उपस्थापितवता मया भिन्ननागेशकर्तृत्वसमर्थकेन भाषापार्थक्यं, शैलीभिन्नत्वं, परमतोपस्थापन-

तत्खण्डनविरह, पुनरुक्तिदोषः, अनुक्तासंग्रहाक्षेपः, सविशदविवरणाभावः चेति विषयान् पश्यता ग्रन्थस्यास्य नागेशाकर्तृत्वं प्रतिपाद्यते। पुनरुक्तिदोषकथनकाले *ज्ञापकसंग्रह-परिभाषेन्दुशेखर*योः कतिपया अंशाः तालिकया प्रस्तुता तद्विमर्शोऽपि विहितः। अनुक्तासंग्रहाक्षेपवेलायामपि नागेशेन असंगृहीतानि भाष्यारूढानि वचनानि लिखितानि। अन्ते च समुपलभ्यमानविषयविमर्शैः *परिभाषेन्दुशेखर-लघुमञ्जूषा-लघुशब्देन्दुशेखरा*दिकर्तुः नागेशमहोदयस्य *ज्ञापकसंग्रह*कर्तृत्वं नास्ति अपि तु अपरनागेशकर्तृत्वं स्यादिति उक्तम्। इत्येवं द्वितीयाध्यायः समाप्तिमेति। शोधप्रबन्धे तत्तद्विषयालोचनवेलायामेव स्वमतं यद्यपि प्रस्तुमस्ति तथापि बहुत्र 'अत्रावेधयम्' अथवा 'इदमत्रावेधयम्' इत्येवंरूपेण स्वाशयः अपि व्यक्तः। प्रायः च सर्वत्र मया '*काशिकावृत्तिः*' इत्यनुक्त्वा '*काशिका* ' इति प्रोक्तम्। बहुत्र च *महाभाष्यस्य* स्थाने भाष्यप्रयोगः कृतः। क्वचित् *महाभाष्यप्रदीप*स्थाने '*भाष्यप्रदीपः*' अथवा '*प्रदीपः*' इति लिखितः, क्वचिच्च *प्रदीपोद्द्योत*स्थाने *उद्द्योत*मात्रमपि लिखितम्। वस्तुतः प्रथमाध्याये *महाभाष्यस्य* परिचयः कारितः, द्वितीयाध्याये च *ज्ञापकसंग्रहस्य*। "*महाभाष्य*सम्मतज्ञापकविमर्शः" इत्याख्ये तृतीयाध्याये चर्चित-विषयास्तावत् शाब्दिकसंसारज्ञानगर्भ*महाभाष्ये* "आचार्य-प्रवृत्तिर्ज्ञापयति" इत्येवंभूतनैकवचनानि उपलभ्यन्ते। उपलभ्यमानानि सूत्रस्थलिङ्गज्ञापितानि वचनानि परिभाषारूपाणि तद्व्यतिरिक्तानि चेति द्विविधानि। पाणिनीयव्याकरणात्प्राचीनेष्वपि व्याकरणेषु परिभाषारूपाणि वचनानि वचनरूपेण पठितानि पाणिनिना स्वकीया*ष्टाध्यायी*स्थसूत्रेषु तत्तल्लिङ्गेन स्वानुमततया ज्ञापितानि सन्ति। तत्परिभाषात्मकवचनसंकलनं *परिभाषावृत्तौ परिभाषेन्दुशेखरे* च लभ्यते। किन्तु *महाभाष्यो*पनिबद्ध-परिभाषाव्यतिरिक्त-ज्ञापकसूत्रसिद्धज्ञापितवचन-संकलनरूपग्रन्थः कोऽपि अस्ति न वेति अन्वेषणं कुर्वाणः आसीत् एन. एस. रामानुजताताचार्यः। अयं ग्रन्थः राष्ट्रपतिसम्मानसम्मानितैः श्रीपार्थसारथिभट्टाचार्यैः स्वयं पञ्चाशद्वर्षेभ्यः पूर्वम् आन्ध्रलिप्यां मुद्रितः, स च नागेशभट्टकृत-

*ज्ञापकसंग्रहाख्य*ग्रन्थः देवनागरीलिप्यां पुनर्मुद्रणाय तिरुपतिस्थ-केन्द्रीय-संस्कृतविद्यापीठाय समर्पितः। तस्य च ग्रन्थस्य आमूलाग्रम् अधीयानेन सम्पूर्ण*महाभाष्यस्य* परमसूक्ष्मदृष्ट्या परिशीलनेन च रामानुजताताचार्यमहाभागेन *महाभाष्य*दर्शितदिशा व्याख्यापि लिखिता। अस्य च ग्रन्थस्य चितानि कतिपयज्ञापितवचनानि आदाय समीक्षणं विहितं शोधप्रबन्धस्य अस्मिन्नध्याये। आलोचयिष्यमाणानि सर्वाण्यपि ज्ञापितवचनानि भाष्ये चर्चितानि। तेषां कथं ज्ञापनप्रकारत्वं कथं वा पतञ्जलिसम्मतत्वं, तेषां ज्ञाप्यानां नित्यत्वा-नित्यत्वव्यवस्था इत्येतेषां विमर्शः प्रस्तूयते। तद्विमर्शकाले प्रतियोगम् *वैयाकरणसिद्धान्तकौमुदी*कारभट्टोजिदीक्षितमतं, *पदमञ्जरी*कारहरदत्तमतं, *न्यास*-कारजिनेन्द्रबुद्धिमतं, *काशिका*कारवामनजयादित्यमतं, *महाभाष्य*कार-पतञ्जलिमतं, *ज्ञापकसंग्रह*कार-नागेशमतम् चेत्यादीनि प्राधान्येन प्रस्तूयन्ते। क्वचित् क्वचित् एस. सि. वसुमहोदयमतं, *बालमनोरमा*कारवासुदेवदीक्षितमतं, *तत्त्वबोधिनी*-टीकाकारज्ञानेन्द्रसरस्वतीमतं, *भाष्यप्रदीप*कारकैयटमतं, *प्रदीपोद्द्योत*कारनागेशमतं चेति व्याकरणशास्त्रनिष्णातमतानि उल्लिख्यन्ते। इत्येवं तृतीयाध्यायः समाप्तिं गच्छति। "*महाभाष्यज्ञापकसंग्रह*भिन्नग्रन्थादिलब्धज्ञापकानां पर्यालोचनम्" इत्याख्ये चतुर्थाध्याये प्रतिपादितविषयास्तावत्- *महाभाष्यं* हि ज्ञाप्यभाण्डारः भवति। *ज्ञापकसंग्रहाख्य*ग्रन्थः अतीव संक्षिप्तोऽस्ति। भाष्यारूढानि बहूनि ज्ञाप्यानि *ज्ञापकसंग्रहे* असंगृहीतानि तानि रामानुजताताचार्यविदुषा संकलितानि व्याख्यातानि च सन्ति। तानि मे शोधप्रबन्धे आलोच्यानि न सन्ति। यानि तु *भाष्या*नारूढानि अपि *वैयाकरणसिद्धान्तकौमुदी*-*बालमनोरमा*टीका-*तत्त्वबोधिनी*टीका-*काशिकावृत्ति*-*न्यास*टीका-*पदमञ्जरी*टीकादिषु उपलभ्यन्ते तान्यस्मिन्नध्याये आलोच्यानि सन्ति। अत्र पुनः शोधप्रबन्धभारभिया न सर्वाण्यपि आलोचितानि। आदौ वैयर्थ्यं, व्यर्थं सद् ज्ञापकं, स्वांशे चारितार्थ्यम्, फलमन्यत्र इत्येवंरूपपादचतुष्टयमस्ति ज्ञापकसूत्रस्य। स्वांशे चारितार्थ्यं तु सुलभम्। परन्तु फलान्तरान्वेषणं

दुष्करम्। अतः सर्वत्र ज्ञापितवचनस्य अन्यत्फलप्रदर्शनाय यथासम्भवं यत्नः विधीयते। इत्येवं चतुर्थाध्यायस्य समाप्तिर्भवति। “उपसंहारः” इत्याख्ये भागे प्रबन्धेऽस्मिन् वर्णितानां विषयाणां सारः एव सङ्गृहीतः वर्तते। सर्वान्तिमे च परिशिष्टभागो वर्तते। तस्य परिशिष्टभागस्य भागद्वयं विद्यते। प्रथमपरिशिष्टे सांकेतिकाक्षरसूचिः, द्वितीयपरिशिष्टे च शोधप्रबन्धेऽस्मिन् परिशीलितानां ग्रन्थानां सूची संस्थापिता वर्तते। एवंरूपेण शोधप्रबन्धोऽयं सज्जीकृतो विद्यते।

# सूचिपत्रम्


**क्रमः शीर्षकम् पुटम्**

A. प्रमाणपत्रम्......................................................................i
B. कार्तज्ञ्यनिवेदनम्...........................................................ii-iii
C. प्रास्ताविकम्.................................................................iv-x
**D. उपोद्घातः.................................................................1-10**
**1. प्रथमोध्यायः- *महाभाष्य*परिचयः............................................11 - 65**
**1.1. उपोद्घातः.................................................................11**
**1.2. प्रतिपाद्यविषयः..........................................................14**
1.2.1. *महाभाष्य*स्य सामान्यपरिचयः..........................................14
1.2.2. *महाभाष्य*स्य रचनाकालः................................................19
**1.3. वैशिष्ट्यम्...............................................................26**
1.3.1. पातञ्जलभाष्यस्य महाभाष्यत्वम्.........................................27
1.3.2. *महाभाष्य*स्य रचनापद्धतिः..............................................31
1.3.3. *महाभाष्य*स्य गरिमा......................................................37
1.3.4. *महाभाष्य*पाठाव्यवस्था..................................................42
**1.4. पतञ्जलेः कृतयः तट्टीकादयः तत्कर्तारश्च.................................44**
1.4.1. पतञ्जलेः कृतयः............................................................45
1.4.1.1. *महानन्दकाव्यम्*.........................................................45
1.4.1.2. *चक्रपाणिपरिष्कारः*.....................................................46
1.4.1.3. *सिद्धान्तसारावली*.......................................................48
1.4.1.4. *कोषः*....................................................................48
1.4.1.5. *सांख्यशास्त्रम्*..........................................................49
1.4.1.6. *साहित्यशास्त्रम्*........................................................50
1.4.1.7. *लोहशास्त्रम्*............................................................50
1.4.2. तट्टीकादयः तत्कर्तारश्च....................................................50
1.4.2.1. *महाभाष्यदीपिका*........................................................51

1.4.2.2. *महाभाष्यप्रदीपः*......53
1.4.2.3. *प्रदीपोद्द्योतः*......55
1.4.2.4. *शब्दकौस्तुभः*......56
1.4.2.5. *अष्टाध्यायीभाष्यम्*......56
1.4.2.6. *प्राणपणावृत्तिः*......57
1.4.2.7. *चिन्तामणिः*......58
1.4.2.8. *सूक्तिरत्नाकरः*......58
1.4.2.9. *क्षीरोदः*......59
1.4.2.10. *भाष्यतत्त्वविवेकः*......59
1.4.2.11. *सिद्धान्तरत्नप्रकाशः*......61
1.4.2.12. *विद्वन्मुखभूषणम्*......61
1.4.2.13. अन्यटीकाग्रन्थाः......62
**1.5. उपसंहृतिः......63**
**2. द्वितीयोऽध्यायः- *ज्ञापकसंग्रह*कर्तृत्वविचारः......66 - 158**
**2.1. उपोद्घातः......66**
2.1.1. *अष्टाध्यायी*क्रमः......67
2.1.2. दार्शनिकक्रमः......69
2.1.3. प्रक्रियाक्रमः......72
**2.2. नागेशकालदेशकृत्यध्ययनम्......73**
2.2.1. नागेशस्य कालपरिचयः......74
2.2.2. नागेशस्य देशपरिचयः......78
2.2.3. नागेशस्य कृतयः......79
2.2.3.1. व्याकरणशास्त्रसम्बन्धिकृतयः......81
2.2.3.2. धर्मशास्त्रसम्बन्धिकृतयः......82
2.2.3.3. अलंकारशास्त्रसम्बन्धिकृतयः......83
2.2.3.4. तन्त्रादिग्रन्थाः......83
2.2.3.5. अपरे सम्भाविताः ग्रन्थाः......83
**2.3. नागेशस्य गुरुशिष्यपरम्परापरिचयः......86**
**2.4. समानकर्तृकत्वसमर्थकत्वम्......88**

2.4.1. *प्रदीपोद्योतज्ञापकसंग्रह*योः क्षेत्रविशेषाध्ययनम्....................90
2.4.1.1. अपवादत्वात्सिद्धे इयमेकदेश्युक्तिः.........................92
2.4.1.2. अल्त्वाद्याश्रयानेकग्रहणमिति तदर्थः........................94
2.4.1.3. ज्ञापिते कथं चारितार्थ्यं, तस्मात्...........................98
2.4.1.4. तेन भाषायामपि बेभिदीति चेच्छिदीतीत्येतत् सिद्धं.....102
2.4.1.5. इत उत्तरं स्थानिवत्त्वाभावज्ञापकमग्लोपिग्रहणमिति...105
2.4.1.6. अदन्तपिच्छादितुन्दाद्यन्यतरपाठेनैव सिद्धे...............109
2.4.2. *ज्ञापकसंग्रहपरिभाषेन्दुशेखरा*ध्ययनम्............................114
2.4.2.1. गतिकारकोपपदानां कृद्भिः सह समासवचनं............115
2.4.2.2. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते.............118
2.4.2.3. नानुबन्धकृतमनेजन्तत्वम्.................................120
2.4.2.4. लादेशेषु वासरूपविधिर्नास्ति..............................122
2.4.2.5. नानुबन्धकृतमसारूप्यम्...................................124
**2.5. समानकर्तृकत्वासमर्थकत्वम्............................................127**
2.5.1. भिन्नभाषाशैली......................................................128
2.5.2. परमतोपस्थापनतत्खण्डनादिवरहः................................130
2.5.3. पुनरुक्तिदोषः........................................................133
2.5.4. अनुक्तासंग्रहाक्षेपः..................................................139
2.5.5. सविशदविवरणाभावः................................................150
**2.6. उपसंहृतिः.....................................................................154**
**3. तृतीयोऽध्यायः- *महाभाष्य*सम्मतज्ञापकविमर्शः.......................159 - 234**
**3.1. उपोद्घातः.....................................................................159**
3.2. लुगादयः सर्वादेशाः भवन्ति................................................161
3.3. सर्वो द्वन्द्वो विभाषयैकवद् भवति........................................167
3.4. चरेष्टः इति अधिकरणे उपपदे एव न कर्मणि........................173
3.5. स्मलक्षणः पुरालक्षणश्चाद्यतने न भवतः...............................176
3.6. लकाराणां लस्य नेत्त्वम्....................................................181
3.7. टित आत्मनेपदानामिति सूत्रे आनस्य प्रतिषेधो वक्तव्यः............184
3.8. इवशब्देन सप्तमी भवति....................................................189

3.9. लजन्यतरस्यामिति समुच्चये..............................................195
3.10. प्रागेतस्माद्योगाद्विभाषानुवर्तते..............................................202
3.11. कारकसंज्ञायां तरतमयोगो न भवति...................................205
3.12. आयन्नादयः उपदेशे भवन्ति.............................................210
3.13. अष्टनो दीर्घग्रहणं षट्संज्ञायां ज्ञापकम् आकारान्तस्य................214
3.14. अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवति...........................220
3.15. स्वरविधौ सङ्घातः कार्यी भवति.........................................224
**3.16. उपसंहृतिः..................................................................230**

**4. चतुर्थोऽध्यायः- *महाभाष्यज्ञापकसंग्रह*भिन्नग्रन्थादिलब्धज्ञापकानां पर्यालोचनम्...............................................................235 - 305**

**4.1. उपोद्घातः..................................................................235**
4.2. तदन्तस्यापीयं (सर्वनाम) संज्ञा स्यात्..................................238
4.3. समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते...........................241
4.4. एतत्सामर्थ्यादिव प्राचीनानां नित्यसमासत्वम्...........................243
4.5. मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्.......................................246
4.6. सर्वोऽप्येकदेशोऽह्ना समस्यते..........................................249
4.7. सूत्रेषु लिङ्गनिर्देशो न विवक्षितः.........................................251
4.8. अनित्योऽयं गुणेन समासः..............................................254
4.9. व्यधिकरणपदोऽपि बहुव्रीहिः............................................256
4.10. अधिशब्दोच्चारणम् इङिकावध्युपसर्गं न व्यभिचरतः................258
4.11. पचादिराकृतिगणः.........................................................260
4.12. अयं न भूते क्तस्य बाधकः..............................................263
4.13. अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति..............................266
4.14. क्वचित्सामान्योक्त्वापि विशेष एव गृह्यते............................271
4.15. अबाधकान्यपि निपातनानि भवन्ति.....................................273
4.16. अवस्था संस्थेति व्यवस्थायाम् इति ज्ञापकात्.........................276
4.17. विभाषा फाल्गुनीश्रवणा कार्तिकीचैत्रीभ्यः इति........................279
4.18. संपूर्वस्य क्वचिदभूषणेऽपि सुट्, संस्कृतं भक्षाः इति..................284
4.19. इष्णुज्ग्रहणे खिष्णुचो द्व्यनुबन्धकस्यापि ग्रहणम्....................286

4.20. वुञ्छ्णादिषु ठचश्चित्त्वेन इकादेशोऽन्तरङ्गेभ्यो बलवान्...........288
4.21. सर्वे विधयश्छन्दसि वैकल्पिकाः.......................................290
4.22. इको यणचि इत्यत्र ङमुट् आगमः न...............................294
**4.23. उपसंहृतिः...................................................................298**
**E. उपसंहारः...................................................306 - 309**
**F. परिशिष्टम्.......................................................i-xiii**
परिशिष्टम्- 1- सांकेतिकाक्षरसूचिः...............................i-iv
परिशिष्टम्- 2- परिशीलितग्रन्थसूचिः..........................v-xiii

# उपोद्घातः

अखिलशास्त्रशिरोभूतस्य वेदस्य मुखरूपाङ्गत्वेन अभिमतस्य व्याकरणस्य असाधुशब्देभ्यः विविच्य साधुशब्दानां ज्ञानमेव तावत् प्रयोजनम्। 'अथ शब्दानुशासनम्' इति ब्रुवाणः *महाभाष्य*कारः आह- 'शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्' इति।[1] व्याकरणस्यैव नामान्तरं 'शब्दानुशासनम्' इति। सामान्यविशेषवता सूत्रेण प्रकृतिप्रत्ययविभागकल्पनया च अनुशासनं भवति। अस्य च प्रधानवेदाङ्गस्य सन्ति रक्षोहागमलघ्वसन्देहरूपाणि पञ्च प्रयोजनानि, तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमान्, चत्वारि, उत त्वः, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण इत्येवं त्रयोदश गौणप्रयोजनानि अपि सन्ति। किन्तु नैतावता अलम्। ग्रन्थान्तरेषु अपि अस्य माहात्म्यं दरीदृश्यते। यथा उच्यन्ते तत्र ग्रन्थेषु-

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।[2]

तद्द्वारमवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।[3]

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

1 म. भा., पस्पशा., जयशङ्कलालत्रिपाठी, पृ. 5
2 सु. र., प्र. प्र., वै. प्र., श्लो. 1, पृ. 42
3 वा. प., ब्र., कारि. 34

## उपोद्घातः

इयं सा मोक्षमाणानामजिह्माराजपद्धतिः। ।[4]

व्याकरणं हि शब्दव्युत्पादकशास्त्रम् अखिलशास्त्राणाम् उपकारकं भवति। सर्वस्य शरीरस्य मुखम् इव वेदस्य मुखस्थानीयम् अङ्गं भवति व्याकरणम्। तथा चोक्तं पाणिनीयशिक्षायाम्-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषमायनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते। ।[5]

इह खलु संसारे सकलप्राचीनार्वाचीनभाषाणां व्याकरणानि पाणिनीय-व्याकरणम् अध्यासते। अस्य च पाणिनीयव्याकरणस्य मुख्यम् उपजीव्यम् अस्ति आपिशलव्याकरणम्। तत्र *पदमञ्जरी*कारेण उच्यते- “कथं पुनरिदमाचार्येण पाणिनिनावगतमेते साधव इति। आपिशलेना पूर्वव्याकरणेन।”[6] प्रथमं तु पाणिनीयव्याकरणस्य संहिताकारः आसीत्। परं कात्यायनः सूत्ररूपेण विभागम् अकार्षीत्। भाष्यकारः अपि योगविभागम् अकार्षीत् केषुचित् स्थलेषु-

त्रीणि सूत्रसहस्राणि तथा नव शतानि च।

---

4 तदेव, कारि. 16

5 पा. शि., कारि. 41-42

6 का, वृ., प्र. भा., पृ. 8

# उपोद्घातः

षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम्।।[7]

यद्यपि तदनुसारेण 3996 सूत्राणि वर्तन्ते। परन्तु इदानीं ग्रन्थेषु 3983 सूत्राणि भवन्ति। अत विभाव्यते एव तत्र कारणं योगविभागः। यावन्तः संस्कृते व्याकरणग्रन्थाः लभ्यन्ते तत्र लौकिकवैदिकशब्दसाधुत्वप्रदर्शकस्य पाणिनीय-व्याकरणस्य परममाहात्म्यं स्वीक्रियते। इदं व्याकरणशास्त्रं तु अपराविद्या।[8] पतञ्जलिमुनिः कथयति- सर्ववेदपारिषदं हीदं शास्त्रम्[9] इति। अत एव पुराणेषु समुद्घोषः भवति पौनःपुन्येन-

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।।[10]

व्याकरणस्य तावत् प्रथमप्रवक्तृत्वसन्देहे- "ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः" इत्यत्र्यः सामवेदीय-ऋक्तन्त्रग्रन्थः द्रष्टव्यः।[11] तथा च शाब्दिकाचार्यपरम्परा तावत्-आग्निवेश्य-आग्निवेश्यायन-आग्रायण-आत्रेय-आन्यतरेय-आपिशलि-आह्वरक-उख्य-

---

7 *A dictionary of Sanskrit Grammar*, Page 230

8 द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति- परा चैवापरा च। तत्रापरा- ऋग्वेदो, यजुर्वेदः, सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं छन्दो ज्योतिषमिति।मु. उ., 1.1.4

9 म. भा., 2.1.58

10 पारा. पु., अ., श्लो. 29, पृ. 33

11 इदमक्षरं छन्दसां वर्णांशः समनुक्रान्तम्। यथाचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्यचाक्षते। ऋ., साम., प्र. पा., पृ. 3

## उपोद्घातः

उत्तमोत्तरीय-उदीच्य-औदुम्बरायण-औदव्रजि-औपमन्यव-औपवि-ओर्णनाभ-काण्डमायन-काण्व-कात्थक्य-काश्यप-कौण्डिन्य-कौत्स-कौहलीपुत्र-कौष्टुकि-गार्ग्य-गालव-गौतम-चर्मशिरस्-चाक्रवर्मण-जातुकर्ण्य-तैटीकि-तैत्तरीयक-दाल्भ्य-नैगि-पञ्चाल-पौष्करसादि-प्राच्य-प्लाक्षि-प्लाक्षायण-बाभ्रव्य-भारद्वाज-माण्डुकेय-मार्शकीय-मीमांसक-यास्क-वाडभीकार-वात्स-वात्स्य-वार्ष्यायणि-वाल्मीकि-वेदमित्र-व्याडि-शतबलाक्ष-मौद्गल्य-शाकटायन-शाकपूणि-शाकल-शाकल्य-शाकल्यपितृ-स्थविर-शाङ्गवायन-शैत्यायन-शौनक-सांकृत्य-सेनक-स्थौलष्ठीवि-स्फोटायन-हारीताः।

पुनश्च पाणिन्युल्लेखाद् यद्यपि बहूनां व्याकरणानाम् अस्तित्वं प्राप्यते तथापि पाणिनेः पूर्वम् एवंविधं चतुःसहस्रसूत्रबद्धं सर्गतोमुखं, भाष्यवार्त्तिकाभिः अतिशोभितं, कैयटनागेशदीक्षितादिप्रचण्डवैयाकरणप्रतिभाव्याख्यानपूरितं किमपि व्याकरणं नासीद् इति निश्चयेन वक्तुं शक्यते। पाणिनेः यः *अष्टाध्यायी*ग्रन्थः अस्ति, तत्र संज्ञासूत्रं, परिभाषासूत्रं, विधिसूत्रम्, अतिदेशसूत्रम्, अधिकारसूत्रं, नियमसूत्रम् इति साकल्येन षड्विधसूत्राणि सन्ति।

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।

एतेषु परिभाषा किमिति चेत् क्वचित् गमनकाले वयं तथा स्थानम् आयामः यत्र मार्गद्वयम् अपि गमनाय अस्ति। यदि वयं पूर्वतः न जानीमहे यत् केन मार्गेण गमनीयं तर्हि प्रश्नः भवति। द्वयोः मार्गयोः कतरः ग्राह्यः इति। एतेन एव

गन्तव्यम् इति निश्चयः न भवति। तावद् अनियमः अस्ति। तदा वयं कस्मैचित् जनाय पृच्छामः। स जानाति चेत् मार्गम् उपदिशति। तदा अनियमः दूरीभवति। तेन अस्माकं निश्चयः जायते। नियमः भवति यद् अनेन एव मार्गेण गमनीयम् इति।

व्याकरणे क्वचित् क्वचित् तथा प्रसङ्गः आयाति यत्र एकाधिकाः पर्यायाः मार्गाः वा उपस्थिताः भवन्ति। तदा अनियमः भवति। अनियमे सति नियमः आवश्यकः। एवं यत् सूत्रम् अनियमे नियमं करोति तत्सूत्रं परिभाषासूत्रम् इति कथ्यते। यत्र यत्र अनियमः भवति तत्र तत्र नियमं करोति परिभाषासूत्रम्। अत एव “परितः व्यापृतां भाषां परिभाषां प्रचक्षते।”[12] परितो भाष्यते या सा परिभाषा प्रकीर्तिता। “परितः सर्वतो भाष्यतेऽनयेति परिभाषा”[13] इति। “भाष्यन्ते परितो यस्मात् परिभाषास्ततः स्मृताः”[14] इति भावशर्मा। “सा च पदार्थविवेचकाचार्याणां युक्तियुक्ता वाक्” इति पद्मनाभदत्तः।[15]

उदाहरणम् एकम् आलोचयामः- ‘नश्च’[16] इति एकं सूत्रम्। नः इति पञ्चमीविभक्त्यन्तं रूपम्। धुट् इति प्रथमान्तं, सस्य इति षष्ठ्यन्तं पदं च अनुवर्तते। तदा नकारात् सस्य धुट् वा इति तस्य सूत्रस्यार्थः। अत्र स्वाभाविकः

12 व्या. द. इ., पृ. 364
13 तत्रैव
14 तत्रैव
15 तत्रैव
16 पा. सू 8.3.30

प्रश्नः उदेति यत् नकारात् पूर्वस्य परस्य वा सस्य धुट् विधेयः इति। अतः अत्र अनियमः उत्पन्नः। अधुना 'तस्मादित्युत्तरस्य'[17] इति परिभाषासूत्रं नियमं करोति यत् पञ्चमीनिर्देशः अस्ति चेत् तस्मात् परस्य एव कार्यं कर्तव्यम् इति। अतः नकारात् परस्य सस्य धुट् वा इति सूत्रस्यार्थः। अतः 'तस्मादित्युत्तरस्य' इति सूत्रं परिभाषासूत्रम्। अस्य च अस्ति 'साक्षाद्विधिशास्त्रतात्पर्यग्राहकशास्त्रत्वं परिभाषासूत्रत्वम्।'

*अष्टाध्याय्यां* पाणिनिमुनिना साक्षात् 36 परिभाषाः उल्लिखिताः। एतन्मध्ये अपि काश्चन पाणिनिना स्वयं विरचिताः यथा- 'आद्यन्तौ टकितौ'[18] इत्येवमादयः, काश्चन च यथा- 'इको गुणवृद्धी'[19] इत्यादयः प्राचीनवैयाकरणतन्त्रात् संगृहीताः इति गुरुपद-हालदारमहोदयः कथयति।[20]

अन्याः परिभाषाः आचार्यस्य पाणिनेः व्यवहारात् सिद्ध्यन्ति। काश्चन परिभाषाः लौकिकव्यवहारात् सिद्ध्यन्ति। पाणिन्युच्चरितसूत्रात्मकपरिभाषा इत्येकं यथा 'मिदचोऽन्त्यात्परः'[21] इत्यादि, अपरं तावत् पाणिनीयसूत्रैः ज्ञापिता (बोधिता) वा वाचनिकी वा लोकन्यायसिद्धा वा।

---

17 पा. सू 1.1.67

18 पा. सू. 1.1.46

19 पा. सू. 1.1.3

20 व्या. द. इ., पृ. 372

21 पा. सू. 1.1.47

# उपोद्घातः

आचार्यनागेशानुसारेण वाचनिक्यः, न्यायसिद्धाः, ज्ञापकसिद्धाः च परिभाषाः परिगृहीताः *परिभाषेन्दुशेखरे* दरीदृश्यन्ते। तत्र *परिभाषेन्दुशेखरस्य* सम्पादकः पण्डितगोविन्दशर्मा कथयति यत् वस्तुतः विचार्यमाणे ग्रन्थकर्त्रा ज्ञापकन्यायसिद्धा कापि परिभाषा व्याख्येयत्वेन न परिगृहीता, तत्र तत्र वाचनिक्यैषा इत्याद्युल्लेखस्तु ज्ञापकन्यायसिद्धानामुपन्यासपर एवेति अपरिभ्रान्ताष्टीकाकृतः, तथापि वाचनिकीत्वादिना तत्तत्परिभाषाणां विभाजनं नात्यन्तमनुचितम्, बहुभिर्वैयाकरणैस्तथा विभागस्य परिग्रहाद् इति।[22]

गोविन्दशर्मानुसारेण परिभाषाणां त्रयः प्रकाराः-

वाचनिकी- 'संज्ञापूर्वको विधिरनित्यः' इत्यादिः।

न्यायसिद्धा- 'एकदेशविकृतमनन्यवत्' इत्यादिः।[23]

ज्ञापकसिद्धा- 'विप्रतिषेधे परं कार्यम्' इत्यादिः।

तत्र पुनः वाचनिकपरिभाषाणां द्वौ प्रकारौ- सूत्रसिद्धवाचनिकी स्वतन्त्रवाचनिकी च। न्यायसिद्धपरिभाषाणां पुनः प्रकारद्वयम् अस्ति- लौकिकन्याय-सिद्धा शास्त्रीयन्यायसिद्धा चेति। ज्ञापकसिद्धपरिभाषापि द्विविधा- लिङ्गवती विध्यङ्गशेषभूता च।

---

22 प. भा. शे., त. भू., भू., पृ. 10

23 छिन्नेऽपि पुच्छे श्वा श्वैव न चाश्वो न च गर्दभ इति न्यादिति भावः इति 'जराया जरसन्यतरस्याम्' (पा. सू. 7.2.101), वै. सि. कौ., प्र. भा., पृ. 229

## उपोद्घातः

प्रसिद्धेषु *परिभाषेन्दुशेखरपरिभाषावृत्त्या*दिग्रन्थेषु सूत्रात्मकपरिभाषाणां व्याख्यानं न लभ्यते। *परिभाषेन्दुशेखरा*दिषु परिभाषाणां स्वरूपं किमिति चेत् *भूतिटीका*कारो ब्रवीति “संकेतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्व-प्रकारकशास्त्र-जन्याप्रामाण्यज्ञानानास्कन्दितबोधकसहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरित-भिन्नत्वम्”[24] इति। *महाभाष्ये* तत्र तत्र “आचार्यप्रवृत्तिर्ज्ञापयति” इत्येवंरूपबहूनि वचनानि सन्ति। सूत्रस्थेन लिङ्गेन ज्ञापितानि वचनानि तत्र समुपलभ्यन्ते। तानि च वचनानि द्विविधानि परिभाषारूपाणि तद्व्यतिरिक्तानि चेति। परिभाषारूपाणि वचनानि पाणिनीयव्याकरणात् प्राचीनेष्वपि व्याकरणेषु वचनरूपेण पठितानि पाणिनिना स्वकीया*ष्टाध्याय्यां* तत्तल्लिङ्गेन स्वानुमततया सूचितानि सन्ति। तदुक्तं नागेशन *परिभाषेन्दुशेखरे* “प्राचीनव्याकरणतन्त्रे वाचनिकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते।”[25] परिभाषात्मकवचनसंकलनं सीरदेवस्य *परिभाषावृत्तौ*, नागेशस्य *परिभाषेन्दुशेखरे*, व्याडेः *परिभाषापाठे* च लभ्यते। परिभाषाव्यतिरिक्तानां *महाभाष्यो*-पनिबद्धानां ज्ञापकसिद्धवचनानां सङ्कलनं नागेशभट्टकृत*ज्ञापकसंग्रहा*ख्ये ग्रन्थे दृश्यते। ‘*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा’ इति शीर्षकाङ्किते मे शोधप्रबन्धे चितानां पाणिनिसूत्रज्ञापितवचनानाम् आलोचना विधास्यते। तानि ज्ञाप्यानि च विशदेन स्पष्टीकरिष्यन्ते।

---

24 प. भा. शे., पृ. 4

25 प. भा. शे., पृ. 2

## उपोद्घातः

दीपो यथा प्रभाद्वारा सर्वगेहप्रकाशकः।

परिभाषा तथा बुद्ध्या सर्वशास्त्रोपकारिका।।[26]

इत्येवं शास्त्रस्य नैकस्थलेषु वाक्यार्थः अनुपपन्नः प्रतीयते चेत् परिभाषाणां प्रयोगे क्रियमाणे तस्य वाक्यार्थस्य असंगतिः दूरीभवति। तस्मादेव *वैद्यशास्त्रे* अपि लिखितम् अस्ति-

अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिकाः।

परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः।।[27]

परिभाषासूत्राणां परिभाषाणां वा प्रयोजनानि एव ज्ञापकसूत्राणां ज्ञाप्यानां वा भवन्ति।

पतञ्जलिः अपि कथयति- "यथा लोके कश्चित् कश्चित् पृच्छति ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति, स तस्मा आचष्टे- अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः, अमुष्मिन्नवकाश हस्तवाम इति। यस्तत्र तिर्यक्पथो भवति न तस्मिन् सन्देह इति कृत्वा नासावुपदिश्यते"[28] इति। एवं विशेषस्थलेषु एव सूत्रादिज्ञापितवचनानां प्रयोगो भवति। तादृशज्ञापित-वचनानामाकरोऽस्ति *महाभाष्यम्*। तत्र च परिभाषात्मकतद्व्यतिरिक्तात्मकज्ञापित-वचांसि लभ्यन्ते। परिभाषातिरिक्तज्ञापितवचनानि नैकानि नागेशकृत-

---

26 व्या. द. इ., पृ. 364

27 तत्रैव

28 तदेव, पृ. 365

## उपोद्घातः

*ज्ञापकसंग्रहाख्य*ग्रन्थे लभ्यन्ते। तानि च ज्ञाप्यानि भाष्यकारसम्मतानि सन्ति न वेति आलोचयिष्यन्ते। वस्तुतः नागेशः भाष्यासम्मतं किमपि न कथयति। किन्तु *ज्ञापकसंग्रहस्य* नागेशकृतत्वे अस्ति सन्देहः, अत एव तेषां ज्ञापितवचनानां *महाभाष्य*कारसम्मतत्वमत्र शोधप्रबन्धे प्रदर्शयिष्यते। तस्य च *महाभाष्यस्य* महाभाष्यत्वव्यवहारविमर्शः प्रस्तोष्यते। पुनश्च *महाभाष्य*वैशिष्ट्यरचनाकाल-रचनापद्धत्यादिविषयविविधचर्चाः अपि करिष्यन्ते। *ज्ञापकसंग्रहस्य* च नागेशकर्तृत्वविषयिणी महती चर्चा विधास्यते। *महाभाष्यज्ञापकसंग्रहे*तरग्रन्थादिष्वपि नैकानि ज्ञापितवचनानि लभ्यन्ते, तेषु कानिचिज्ज्ञाप्यानि च पर्यालोचयिष्यन्ते।

# प्रथमोऽध्यायः

# *महाभाष्य*परिचयः

## 1.1. उपोद्घातः

भाषा हि समेषां सर्वश्रेष्ठनिधिरस्ति। तां विना जगति जनाः किमपि चारु साधयितुं न प्रभवन्ति। सा त्वस्माकं सांस्कृतिक-सामाजिक-व्यवहारस्य माध्यमरूपा भवति। उच्यते च दण्डिना काव्यादर्शे-

"वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।"[29]

यदि च भाषा न स्यात् तर्हि समग्रं भुवनत्रयमज्ञानान्धकारेण परिव्याप्तं भवेत्। तथा चोक्तं दण्डिना तत्रैव-

"इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते"।।[30]

सा च भाषा कालजयी तदैव सम्भवति यदा तस्याः भाषायाः एकम् परमसमृद्धं व्याकरणम् अस्ति। यष्टिं विना पङ्गोः यादृशी अवस्था, व्याकरणेन विना भाषायाः तादृशी स्थितिः भवति।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।।[31]

---

29 का. द., कारि. 1.3, पृ. 10

30 तदेव, कारि. 1.4, पृ. 15

31 प्र. स., पृ. 1

## *महाभाष्य*परिचयः

इति चतुर्दशसु विद्यासु अन्यतमं व्याकरणम्। तस्य व्याकरणशास्त्रस्य कर्तारः इन्द्रादयः अष्टौ। श्रूयते चेत्थम्-

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमरजैनेन्द्रा इत्यष्टावादिशाब्दिकाः।।[32]

पाणिनीयव्याकरणमेव ऐन्द्रादिव्याकरणेषु सुललितम् सुग्राह्यं च। तस्मादस्ति प्राधान्यमस्य व्याकरणान्तरापेक्षया। तत्रभगवान् पाणिनिः अष्टभिः अध्यायैः व्याकरणसूत्राणि ततान। सूत्रेण अनुक्तानां केषाञ्चित् पदानां संग्रहार्थं कात्यायनः *वार्त्तिकम्* अकार्षीत्। अनन्तरं तत्रभगवान् पतञ्जलिः पाणिनीयसूत्राणां वार्त्तिकोपस्कृतानां *भाष्यं* चकार। सूत्रवार्त्तिकयोः अनुक्तानां संग्रहार्थं भाष्यकारः स्वमपीष्टीः प्रणयाञ्चकार। पाणिनीयव्याकरणसूत्रे वाक्यार्थज्ञानं प्रति पदार्थज्ञानं कारणम्, पदार्थज्ञानं प्रति संज्ञासूत्रं परिभाषासूत्रं च कारणम् इति प्रथमं संज्ञापरिभाषे उद्येते, ततः प्रत्ययः, ततः प्रक्रिया इत्येवं क्रमः। कदाचित् संज्ञापरिभाषयोर्मध्ये 'न धातुलोप आर्धधातुके'[33] 'क्ङिति च'[34] इत्यादिगुणवृद्धिनिषेधशास्त्राणामपि सन्निवेशः गुणवृद्धिपदानुवृत्तिसौकर्यार्थं प्रसङ्गादागतम्।

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।

---

32 तत्रैव

33 पा. सू 1.1.4

34 पा. सू. 1.1.5

## प्रथमोऽध्यायः

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।[35]

वस्तुतः सूत्रक्रमम् अनुसृत्यैव *भाष्यं* लिखितम्। यच्च *प्रदीपोद्द्योता*-ख्याभिः व्याख्याभिः समलङ्कृतम्।

अखिलसंस्कृतसंसारे त्रिमुनिव्याकरणस्य माहात्म्यमनस्वीकार्यम्। तस्यां त्रिमुनिव्याकरणपरम्परायां त्रयाणां मुनीनां मध्ये पतञ्जलिरयं अन्तिमस्थानीयः। अयमाचार्यः पतञ्जलिः प्रमाणभूतः पाणिनीयपरम्परायाम्।

विशालाकायं *महाभाष्यं* लिखतापि पतञ्जलिना स्वपरिचयः स्वल्पः अपि न प्रदत्तः। पतञ्जलिः शेषनागावतारः इति रामभद्रदीक्षितस्य *पतञ्जलिचरितम्* इति ग्रन्थे। असौ पतञ्जलिः 'अहिपतिः', 'फणभृतांभर्ता' अथवा 'शेषावतारः' इति आख्यायते।

'*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा' इति शीर्षकोपेतस्य मे प्रस्तुतशोधप्रबन्धस्य '*महाभाष्य*परिचयः' इत्याख्ये अस्मिन् प्रथमाध्याये प्राधान्येन *महाभाष्यस्य* सामान्यपरिचयः, *महाभाष्यस्य* रचनाकालः इति विषयद्वयम् आलोचयिष्यते। ततः *महाभाष्यस्य* वैशिष्ट्यम् आलोचयिष्यते, पुनश्च तत्र पातञ्जलभाष्यस्य महाभाष्यत्वं, *महाभाष्यस्य* रचनापद्धतिः, *महाभाष्यस्य* गरिमा, *महाभाष्य*पाठाव्यवस्था इति एते विषयाः अपि प्रस्तोष्यन्ते। पुनः अस्य अध्यायस्य

35 पारा. पु., अष्टादश., श्लो. 13 -14, पृ. 90

अन्ते पतञ्जलेः कृतीनां तट्टीकादीनां तत्टीकाकर्तॄणामपि विषये सोपलभ्यमानप्रमाणं समासेन आलोचना करिष्यते।

सम्प्रति ते सर्वे विषयाः क्रमशः अधः प्रस्तूयन्ते-

## 1.2. प्रतिपाद्यविषयः

पाणिनेः *अष्टाध्याय्याः* सूत्राण्यादाय पतञ्जलेः लिखितं *भाष्यं* लोके *महाभाष्य*नाम्ना विख्यातम्। तच्च भाषासौष्ठवभावविवेचनदृष्ट्या अखिल-संस्कृतवाङ्मये अद्वितीयग्रन्थः समभवत्। सूत्रवार्त्तिकयोः विरोधे सति भाष्यमेव प्रामाणिकत्वेन पूज्यते। तस्य च *महाभाष्यस्य* सामान्यपरिचयपूर्वकं रचनाकालपरिचयः प्रदीयते-

### 1.2.1. *महाभाष्यस्य* सामान्यपरिचयः

*महाभाष्यं* न केवलं संस्कृतव्याकरणवाङ्मये विषयभाषाशैलीदृष्ट्या मुख्यस्थानं भजते, अपि तु सम्पूर्णसंस्कृतवाङ्मये तस्य प्राधान्यमनस्वीकार्यम्। अत्र *महाभाष्ये* पाणिनीयसूत्राणि, ततः कात्यायनवार्त्तिकानि उल्लिखितानि ततः पतञ्जलेः अभीष्टानि वाक्यानि अपि योजितानि सन्ति प्रयोजनानुसारेण।

*महाभाष्यं* विभक्तम् आह्निकेषु। तच्च पूर्णतः स्वाभाविकं, *महाभाष्यस्य* गभीराध्ययनेन स्पष्टं प्रतीयते। कुतो वा आह्निकविभागो विहितः इति चेत् पतञ्जलेः तच्छिष्याणां मध्ये अस्ति कश्चित् सम्बन्धः। *महाभाष्यस्य* 85 आह्निकानि पतञ्जलिना तच्छिष्येभ्यः पाठितानि यानि 85 दिनानां पाठाः आसन्। 'अह्ना अह्नि

वा निर्वृत्तम्' इति आह्निकशब्दः तत्समर्थयति। पूर्वेषाम् आचार्याणां ग्रन्थानां दीर्घाध्ययनात् परमेव ग्रन्थस्यास्य निर्माणं तेन विहितम्। तस्मात् सर्वे अंशाः तेनालोचनाय स्थापिताः, न कोऽपि अगोचरांशः। अयं ग्रन्थः समीक्षात्मकः निरूपणात्मकः च दृश्यते, येन न केवलं भाष्यशैल्या विरचितः सामान्योऽयं ग्रन्थः इति मन्तव्यम् अपि तु सम्पूर्णवैज्ञानिकः ग्रन्थः। तस्मात् *महाभाष्यं* दार्शनिकग्रन्थेषु अन्तर्भवति। *महाभाष्य*रचनाकारणात् पाणिनीयव्याकरणाध्ययनं सहजतया सम्भवति स्म, तस्मिन्काले लभ्यमानानां ग्रन्थानां माहात्म्यम् अस्तं गच्छति स्म। पुनश्च पाणिनिसूत्राणां केषाञ्चित् परिहारोऽपि विहितः तेन। यथा "ये कौड्यादिषु इत्यन्तेन ग्रन्थेन 'गोत्रावयवात्'[36] सूत्रं प्रत्याख्यातम्"[37] परन्तु तत् पाणिनेः अपमानमुद्दिश्य न कृतम्। पाणिनेः कृते स स्वयमेव क्वचित् 'भगवान्'[38], 'आचार्यः', 'मांगलिकः'[39], 'सुहृद्' इत्यादिशब्दान् प्रयुङ्क्ते। तेन पाणिनेः उपरि तस्य श्रद्धा आसीत् इति स्पष्टं प्रतीयते।

---

36 पा. सू. 4.1.79

37 तत्रभवतां यदपत्यं तानि गोत्राणि, अतोऽन्ये गोत्रावयवाः, तत उत्पत्तिः उत्पत्तिः प्राप्नोति। तच्चानिष्टम्। तस्मान्नार्थो योगेन। म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 93

38 कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्। म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 76

39 मांगलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 318 -319

## *महाभाष्य*परिचयः

कुत्रचित् अन्यथासिद्धे सति "सिद्‌ध्यत्येवमपाणिनीयं तु भवति, यथान्यासमेवास्तु"[40] इत्येतादृशशैलीम् आश्रयति सः। यथा 'वृद्धिरादैच्'[41] इति पाणिनीयसूत्रभाष्ये संज्ञासंज्ञिप्रत्यायनार्थम् उच्यते "संज्ञालिङ्गमनुबन्धेषु करिष्यते........तेनानुबन्धानामपि निवृत्तिर्भविष्यति"[42] इत्युच्यते। ततः परं तथा सिद्धे सति अपाणिनीयं भविष्यति, अतः यथान्यासम् एव अस्तु। तदनन्तरं तेन तत्रैव पूर्वोक्ताशङ्कायाः समाधानं प्रदत्तम्। इदमवश्यं ज्ञेयं यत् पतञ्जलिः पाणिनिसूत्रपरिहारवेलायां कथञ्चिदपि आग्रहानन्दादिकं न प्रदर्शितवान्। वस्तुतः पतञ्जलेः अनुसारेण इदं कथयितुं शक्यते यत्- पाणिनेः सूत्राणाम् रचना परमवैज्ञानिकी सूक्ष्मा चास्ति। पतञ्जलिना तस्य सूत्रार्थस्पष्टीकरणाय पाणिनिकौशलम् अस्मद्गोचरीकृतम्। अतः पाणिनेः सूत्राणां कुत्रचिद् अशुद्धत्वम् अस्ति इति तु कथयितुं न शक्यते।[43] पाणिनिं प्रति एनाम् श्रद्धां वीक्ष्य बहवः आचार्याः वदन्ति यत् अयमाचार्यः पाणिनिसमर्थकः सन्नपि कात्यायनविरोधी। परन्तु इदम् कथनं सत्यम् अस्ति इति वक्तुं न शक्यते, कुतः इति चेत्, यदा मूलतः अष्टाध्याय्याः उपरि स्वभाष्यं लिखितवान् तदा तस्मिन् संदर्भे कात्यायनस्य आक्षेपपरकवार्त्तिकानां खण्डनम् अकार्षीत्।

---

40 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 307-308

41 पा. सू. 1.1.1

42 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 307-308

43 प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकारो प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यानर्थकेन भवितुं किम् इयत्ता सूत्रेण। म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 309

पुनश्च *महाभाष्याध्ययनेन* प्रतीयते यत् *महाभाष्ये* नैकानि पाणिनीयसूत्राणि सन्ति। किन्तु पतञ्जलिः पाणिनिविषये न तथा प्रोक्तवान्। अत एव केषाञ्चिद्विदुषामभिप्रायः अस्ति यत् *महाभाष्यं* वार्त्तिकानि आदाय लिखितम् न तु पाणिनीयसूत्राणि स्वीकृत्य। कतिसूत्राणाम् उपरि भाष्याणि सन्ति इति चेत् पाणिनिसूत्राणां संख्या अस्ति 3995, तत्र भाष्याणां संख्या 1685। शिष्टानां तु तथैव स्वीकारः कृतः।

डॉ. सत्यकामः वर्मामहाभागः ब्रूते यत् *महाभाष्यं* मूलतः पाणिनि-व्याकरणस्यैव भाष्यमस्ति, तथापि तत्रान्येषाम् आचार्याणां वार्त्तिकानां विमर्शानां वा औचित्यविवेकः माहात्म्यं च अस्ति। डॉ. अग्निहोत्री कथयति यत् पतञ्जलिः यद्यपि पाणिनिकात्यायनयोः उभयोः उपरि युगपत् भाष्यम् अलेखीत् परन्तु तेन *महाभाष्यस्य* बहुषु सूत्रेषु कात्यायनाक्षेपेभ्यः पाणिनिं रक्षितुं प्रयत्नः विहितः। तेन इदं स्पष्टं प्रतीयते यत् पाणिनिं प्रति तस्य महती श्रद्धासीत्। तस्माद् विद्वत्समाजे पाणिनिपतञ्जल्योः स्थितिः उपास्योपासकयोः इव इति मन्यते। पतञ्जलिः उपासकः, पाणिनिः उपास्यः इति प्रतीयते।

**इदमत्रावाधेयम्-** पाणिनेः *अष्टाध्याय्यां* निरर्थकं किमपि नास्तीति पतञ्जलिः स्वयं कथयति।[44] विद्वांसो ब्रुवते यत्, पतञ्जलेः परम् 300 वर्षाणि यावत् बहुभिः तच्छुष्कतार्किकशिष्यैः न्यायबीजानि शुष्कतर्कैः स्थापितानि। परं

---

44 सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्। म. भा., प. ख., सम्पा. भागर्वशास्त्री, पृ. 78

## *महाभाष्य*परिचयः

चन्द्रनामकाचार्यः दक्षिणभारतस्य कस्मिंश्चित् पर्वतक्षेत्रे प्राप्तस्य हस्तलेखस्य साहाय्येन अस्य *महाभाष्यस्य* पुनरुद्धारं चकार। तथा चोक्तं भर्तृहरिणा-

पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।
स नीतो बहुशाखात्वं चन्द्राचार्यादिभिः पुनः।।[45]

दक्षिणभारते व्याकरणस्य अध्ययनपरम्परा, अध्यापनपरम्परा च वर्तते स्म, तस्माद् दक्षिणभारते *महाभाष्यं* सुरक्षितम् आसीत्। केषाञ्चित् मतेन पतञ्जलिः कश्मीरप्रदेशीयः आसीत्। तस्मात् तस्य *महाभाष्यस्य* काश्मीरीयप्रतिलिपिरपि स्यात्। महाराजाभिमन्योः आदेशेन चन्द्राचार्यः महता परिश्रमेण दक्षिणभारतीयप्रतिलिपिभिः सह अस्याः प्रतिलिपेः मेलनं कृत्वा, अस्य च *महाभाष्य*ग्रन्थस्य उद्धरणं विहितवान्। तथापि अस्य सुरक्षा न जाता। परम् भर्तृहरेः गुरुः वसुरातः चन्द्राचार्यस्य प्रतिलिप्या सह दक्षिणभारतीयप्रतिलिपीनां मेलनं कृत्वा *महाभाष्यं* सम्पादितवान्। तथा च प्रोक्तं भर्तृहरिणा-

न्यायप्रस्थानमार्गास्तानभ्यस्य स्वं च दर्शनम्।
प्रणीतो गुरुणास्माकमयमागमसंग्रहः।।[46]

पाणिनेः सर्वाणि सूत्राणि आधारीकृत्य तु पतञ्जलिः भाष्यं नैव रचितवान् इति तु अवश्यं विज्ञेयम्।

---

45 वा. प., वा., कारि. 481, पृ. 522

46 तदेव, कारि. 482, पृ. 522

## 1.2.2. *महाभाष्यस्य* रचनाकालः

पतञ्जलेः जन्मकालः नितरां विवादग्रस्तः। तस्य च *महाभाष्यस्य* नैके व्याख्याकाराः सन्ति। तेषां व्याख्याकर्तॄणाम् ऐतिहासिकविवादादिकमत्र शोधप्रबन्ध-भारभिया नालोच्यते किन्तु संस्कृतव्याकरणशास्त्रेतिहासविषयकग्रन्थेषु तज्जन्मकाल-सम्बद्धचर्चितविषयान् आधारीकृत्य केचन सिद्धान्ताः अत्र प्रस्तूयन्ते। पातञ्जल-*महाभाष्यस्य* कालनिर्णयविषये अत्र द्विविधमालोचनं प्रस्तुतम्। *महाभाष्ये* समुलब्धानि उदाहरणानि आदाय पतञ्जलिकालनिर्णयविमर्शः इत्येकम्। अपरं तावत् भाष्याद्बहिः प्राप्तानि प्रमाणानि गृहीत्वा तत्कालनिर्णयविमर्शः।

*महाभाष्ये* पाटलिपुत्रस्य नाम बहुवारं प्राप्यते।[47] वायुपुराणानुसारेण महाराजः उदयी (उदायी) गङ्गायाः दक्षिणकूलोपरि कुसुमपुराख्यं स्थानं निर्मितवान्। तदेव कुसुमपुरं पाटलिपुत्रस्य नामान्तरम् इति अद्यतनीया ऐतिहासिकाः ब्रुवते।[48] तेन महाराजाद् उदयिनः अर्वाचीनः *महाभाष्य*कारः भवति।

*महाभाष्य*कारः मौर्यराज्यात् परम् आगतः। मुद्राराक्षसे चाणक्यः चन्द्रगुप्तं प्रायः वृषलः इति सम्बोधयति स्म।[49]

विश्वप्रकाशकोशे वृषलशब्दार्थाः शूद्रचन्द्रगुप्ताश्वाः लिखिताः।[50]

---

47 क) अनुशोणं पाटलिपुत्रम्। म. भा. 2.1.15

ख) पूर्वं मथुरायाः पाटलिपुत्रम्। म. भा. 1.1.57

48 उदायी भविता यस्मात् त्रयस्त्रिंशत्समा नृपः। स वै पुरवरं राजा कुसुमाह्वयम्। गङ्गाया दक्षिणे कूले चतुर्थेऽब्दे करिष्यति। वा. पु., श्लो. 99.319, पृ. 951

49 मुद्रा., पृ. 111

वस्तुतः देवानांप्रियः इति शब्दः इव अयम् वृषलशब्दः द्व्यर्थः शब्दः। पापी धर्मात्मा च तदर्थः। निरुक्ते वृषलशब्दस्य अर्थः लिखितः अस्ति- “ब्राह्मणवद् वृषलवद्। ब्राह्मणा इव वृषला इव। वृषलो वृषशीलो भवति, वृषाशीलो वा” इति।[51] वृषं धर्मं लाति आदत्ते इति वृषलः। ‘वृषादिभ्यश्चित्’ इति उणादिसूत्रेण वृष्धातोः कर्तरि कलप्रत्यये वर्षतीति वृषलः इत्येका व्युत्पत्तिः। अपरा तावत् *मनुसंहिता*याम्-

वृषो हि भगवान् धर्मस्तस्य यः कुरुते ह्यलम्।
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत्।।[52]

अर्वाचीनाः ग्रन्थकर्तारः तु मौर्यचन्द्रगुप्तस्य कृते वृषलशब्दस्य प्रयोगं वीक्ष्य मुरानाम्न्याः शूद्रायाः उत्पन्नः चन्द्रगुप्तः इति मन्यते। यद्यपि इदं न स्वीकार्यम्। मौर्यः क्षत्रियवंशजः आसीत्। व्याकरणनियमात् मुरायाः अपत्यं पुमान् मौरेयः, न तु मौर्यः।[53] महाभाष्याध्ययनेन वयं पश्यामो यत् मौर्यबृहद्रथ-समकालिकमौर्यकुलस्य हीनतायाः उल्लेखः अस्ति।[54] पुनश्च साक्षात् मौर्यशब्दस्य उल्लेखः अपि लभ्यते।[55] अतः मौर्यराज्यात् परं *महाभाष्य*कारः भवितुमर्हति।

---

50 वृषलः कथितः शूद्रे चन्द्रगुप्ते च वाजिनि। निष्कलस्तु कलाशून्ये नष्टबीजे तु वाच्यवत्। वि. प्र., श्लो. 90, पृ. 156

51 निरु., प्र. भा., 3.16, पृ. 254

52 मनु. श्लो. 8.16

53 पा. सू. 4.1.121

54 म. भा. 1.1.50, 6.3.61

55 म. भा. 5.3.99

## प्रथमोऽध्यायः

*महाभाष्ये* अयोध्यायाः माध्यमिकायाः च उपरि कस्यापि यवनस्य आक्रमणस्य उल्लेखः प्राप्यते। तदुदाहरणं हि- “अरुणद्यवनः साकेतम्, अरुणद् यवनो माध्यमिकाम् इति।”[56] व्याकरणनियमाद् अरुणत्-शब्दस्य प्रयोगकर्ता भाष्यकारः यवनराजधर्ममीतस्य समकालिकः स्यात्।

पुनः *महाभाष्य*कारः पुष्यमित्रीयस्य अश्वमेधस्य ऋत्विग् आसीदिति सम्भाव्यते।[57] तत्र क्षत्रियस्य यज्ञसम्पादने निन्दा सूचिता।[58] पतञ्जलेः यजमानः पुष्यमित्रः ब्राह्मणवंशजः आसीत्।[59]

महाराजस्य समुद्रगुप्तस्य *कृष्णचरितात्* ग्रन्थाद् इदं ज्ञायते यत् महामुनिः पतञ्जलिः *महानन्दमयं* काव्यं निर्मितवान्। यदि श्लेषेण महानन्दः इति शब्दः महानन्दपद्मस्य वाचकः स्यात् तर्हि अयं निश्चयः अस्ति यत् पतञ्जलिः महानन्दपद्मोत्तरवर्ती आसीत्।[60]

मगधे मौर्यराजानः शासति स्म। तस्मिन् वंशे अन्तिमः राजा आसीत् बृहद्रथः। तं च हत्वा पुष्यमित्रशुङ्गः राजा समभवत्। विष्णुपुराणतथ्येनापि इदं कथनं सत्यतां प्राप्नोति। पुष्यमित्रशुङ्गः क्रिस्तपूर्व 140 वर्षपर्यन्तं शशास। एतेन

---

56 परोक्षे लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ्वक्तव्यः। अरुणद् यवनः साकेतम्। अरुणद् यवनः माध्यमिकाम्।। म. भा. 3.2.111

57 इह पुष्यमित्रं याजयामः। म. भा. 3.2.123

58 यदा भवद्विधः क्षत्रियं याजयेत्। यदि भवद्विधः क्षत्रियं याजयेत्। म. भा. 3.3.147

59 यज्ञादिषु विपर्यासो वक्तव्यः, पुष्यमित्रो यजते याजकाः याजयन्तीति तत्र भवितव्यम् पुष्यमित्रो याजयते, याजका यजन्तीति। म. भा. 3.2.123

60 सं. व्या. शा. का. इ., प्र. भा., पृ. 321

## *महाभाष्य*परिचयः

वयम् एतत् कथयितुं शक्नुमः यत् *महाभाष्य*कारः पतञ्जलिः शुङ्गवंश्यमहाराजपुष्यमित्रस्य समकालीनः आसीत्, तस्मिन्नेव काले *महाभाष्यं* चकार।[61]

पाश्चात्यपण्डिताः तदनुयायिनः भारतीयाः ऐतिहासिकाः पुष्यमित्रस्य कालः विक्रम 150 वर्षपूर्वं मन्यन्ते। किन्तु अयुक्तमेतत्। भारतीय-पौराणिककालगणनानुसारेण पुष्यमित्रस्य कालः विक्रम 1200 वर्षपूर्वं मन्यते।[62]

आचार्यभर्तृहरिकल्हणलेखेभ्यः इदं ज्ञायते यत् चन्द्राचार्यः लुप्तप्राय*महाभाष्यस्य* उद्धरणं कृतवन्। तस्मात् *महाभाष्य*कारकालनिर्णये चन्द्राचार्यकालज्ञानं सहायकम्। चन्द्राचार्यः कालोऽपि यद्यपि विवादग्रस्तः। कल्हणानुसारेण चन्द्राचार्यः कश्मीरनरेशस्य अभिमन्योः समकालिकः आसीत्। तस्य मतानुसारेण अभिमन्युः कनिष्कोत्तरवर्ती। कल्हणानुसारेण कनिष्कः बुद्धनिर्वाणात् 140 वर्षेभ्यः परम् आगतः। बुद्धनिर्वाणविषये बहूनि मतानि सन्ति। राजतरङ्गिणीग्रन्थे अभिमन्योः आरभ्य प्रतापादित्यपर्यन्तम् एकविंशतिः राजाः आसन्। केचन प्रतापादित्यं विक्रमादित्यं मन्यन्ते। पाश्चात्याः पण्डिताः अभिमन्योः कालम् अर्वाचीनं भिन्नं च मन्यन्ते। बिल्फोर्डमहोदयः 423 क्रिस्तपूर्ववर्षं, बोथलिंगमहोदयः 100 क्रिस्तपूर्ववर्षं, प्रिन्सिपमहोदयः 73 क्रिस्तपूर्ववर्षं, लासेनमहोदयः 40 क्रिस्तीयवर्षं, स्टाईनमहोदयः च 400-500 क्रिस्तीयवर्षम् अभिमन्योः कालं

---

61 प. का. व्या. द., पृ. 31

62 सं. व्या. शा. का. इ., प्र. भा., पृ. 322

मन्यन्ते। तत्र पाश्चात्यमतापेक्षया भारतीयपौराणिककालगणना राजतरङ्गिणी-कालगणना वा अधिकं विश्वसनीया।[63]

अपरे केचित् विद्वांसः चन्द्रगोमिनः आश्रयदातुः अभिमन्योः कालः गुप्तकालस्य अन्ते विक्रमपञ्चमशतकं मन्यन्ते। तेनैव आधारेण पुनः *वाक्यपदीय*कारं भर्तृहरिम् अत्यन्तम् अर्वाचीनं चिन्तयन्ति।[64]

एवं *महाभाष्य*कारः महाराजपुष्यमित्रस्य समकालिकः मन्यते चेदपि सः भारतीयकालगणनानुसारेण विक्रम 1200 वर्षपूर्ववर्ती भवत्येव। यदि च पुष्यमित्र-समकालिकत्वं *भाष्य*कारस्य तथापि दोषः एकः अस्ति एव। *वायुपुराण*स्य[65] अनुसारेण महाराजः उदयी गङ्गायाः दक्षिणकुले कुसुमपुराख्यनगरं स्थापितवान्। स एव कालान्तरेण पाटलिपुत्रः इति नाम्ना विख्यातः इति साम्प्रतिकाः ऐतिहासिकाः ब्रुवते, तदुपरि आलोचितमेव अस्ति। *मुद्राराक्षस*नाटके मौर्यचन्द्रगुप्तसमये पाटलिपुत्रस्य स्थितिः अनुगङ्गः इति, तस्मिन् कालेऽपि अनुगङ्ग इति। परन्तु *महाभाष्य*कारः पतञ्जलिः पाटलिपुत्रम् अनुशोणं लिखति। यदि च *महाभाष्य*कारकालः शुङ्गकालः मन्यते, तर्हि तु पाटलिपुत्रस्य कृते अनुशोणम् इति लेखनं समीचीनं नासीत्। [66]

---

63 तदेव, 322-323

64 तत्रैव

65 वा. पु., श्लो. 99.319, पृ. 951

66 सं. व्या. शा. का. इ., प्र. भा., पृ. 324

**इदमत्रावधेयम्-** आचार्यपाणिनेः एकं सूत्रम् अस्ति 'अनद्यतने लङ्'[67] इति। तेन सूत्रेण लङ्लकारो विधीयते। कात्यायनः अस्य सूत्रस्य एवं व्याख्यानं करोति यत् या घटना पूर्वं घटिता, परं प्रसिद्धा। पुनः क्रियाप्रयोगकर्तुः दर्शनक्षमताश्रयो न भवति तत्रैव लङ्लकारो भवति। पतञ्जलिः कात्यायन-कथनसमर्थनाय उदाहरणद्वयम् अददात्- "अरुणद्यवनः साकेतम्", "अरुणद् यवनो माध्यमिकाम्[68]"। एतेन इदं प्रतीतं भवति यत् यवनकर्तृकम् आक्रमणं तस्मिन् काले अभवत्। पाश्चात्यविद्वान् गोल्डस्टुकरमहोदयः अनेन उदाहरणद्वयेन पतञ्जलेः कालनिर्धारणविषये प्रयत्नम् अकृत। तदनुसारेण ग्रीकजनाः 160 ईसवीयवर्षपूर्वपर्यन्तं ब्राह्लीकम् अशासुः। तेषु राजसु मिनान्डरः अत्यन्तं प्रसिद्धः आसीत्। यस्य राज्यं यमुनानदीपर्यन्तम् आसीत्। तत्र तावत् प्रमाणं यमुनानदीतः प्राप्ता तन्नामाङ्किता मुद्रा। येन ज्ञायते यत् मिनान्डरः 144 ईसवीयवर्षपूर्वम् आरभ्य 20 वर्षाणि यावत् अशात्।

लासेनमहोदयः एतदाधारीकृत्य अकथयत् यत् *महाभाष्य*कारः पतञ्जलिः यदि मिनान्डरकाले विद्यते स्म इत्युच्यते तदा 140 ईसवीयवर्षपूर्वतः 120

---

67 पा. सू. 3.2.11

68 परोक्षे लोकविज्ञाते प्रोयक्तुर्दर्शनविषये लङ्वक्तव्यः। अरुणद् यवनः साकेतम्। अरूणद् यवनः माध्यमिकाम्। म. भा. 3.2.11

ईसवीयवर्षपूर्वपर्यन्तं पाणिनेः तृतीयाध्यायस्य द्वितीयपादस्य एकादशाधिकशत-संख्यकसूत्रपर्यन्तं *महाभाष्यस्य* रचना सम्पन्ना स्यात्।[69]

पतञ्जलिना प्रदत्ते उपरि उल्लिखिते उदाहरणद्वये 'माध्यमिकाम्' इति पदम् आगतम्। तत्र गोल्डस्टुकरमहोदयः भ्रान्तः अभवत्। सः अस्य पदस्य अर्थं बौद्धसम्प्रदायं मत्वा माध्यमिकसम्प्रदायस्य प्रवर्तकेन आचार्येण नागार्जुनेन सह मिलित्वा पतञ्जलिः व्याख्यानं करोति इति वदति। नागार्जुनः कश्मीराधिपत्य-भिमन्युसमकालीनः आसीत्। यस्य कालः 40 ईसवीयवर्षपूर्वम् आरभ्य 65 क्रिस्तीयवर्षपर्यन्तः आसीत्। तस्मात् मिनान्डरद्वारा माध्यमिकपदज्ञातानां माध्यमिकानाम् आक्रमणम् असम्भावितम्।[70]

ओयेवरमहोदयः उपर्युक्तोदाहरणद्वयेन पतञ्जलेः कालनिर्धारणविषये बहुप्रयत्नम् अकार्षीत्। तस्य कथनं तावत्- कश्मीराधिपतेः अभिमन्योः काले पतञ्जलिः विशिष्टः विद्वान् आसीत्। अतः पतञ्जलिस्थापितः धर्मसम्प्रदायः बहु पूर्वमेव स्थापितः, सः धर्मसम्प्रदायः 40 वर्षपर्यन्तं पूर्वं नेतुम् अशक्यमिति सन्देहः। कारणं हि अस्मिन् काले नागार्जुनः बाल्यावस्थायां स्यात्। अतः बाल्यकाले नागार्जुनेन सम्प्रदायस्थापनम् असम्भवम्। लासेनमहोदयगणनानुसारेण अभिमन्युः प्रायः 45 क्रिस्तीयवर्षे कश्मीरराज्यं शासति स्म। यवनकर्तृकसाकेतविरोधः, केनापि यवनेन माध्यमिकसम्प्रदायोपरि पीडनं, *महाभाष्यरचना*, 45 क्रिस्तीयवर्षतः 66

---

69 प. का. व्या. द., पृ. 29

70 तत्रैव

क्रिस्तीयवर्षपर्यन्तकाले अभिमन्योः भाष्यविषये समादारप्रदर्शनम् इति तस्मिन् काले एताः चतस्रः घटनाः समजायन्त। यदि एताः घटनाः वीक्ष्य ग्रीकराजानः लक्ष्यन्ते तदा भ्रमः भविष्यति। कारणं हि लासेनमहोदयानुसारेण 85 ईसवीयपूर्ववर्षतः ग्रीक्-नरेशानां पतनम् आरब्धम्। अतः तत्र प्रयुक्तः यवनशब्दः ग्रीक-ईण्डोनेशियान् राजानः प्रति प्रयुक्तः।[71]

एवं समुपलभ्यमानप्रमाणैः विभावयितुं शक्यते यत् असौ आचार्यः पतञ्जलिः पुष्यमित्रस्य समकालिकः आसीत्। तस्मात् तस्य कालः आनुमानिकः 150 ईसवीयपूर्ववर्षम् कथयितुं शक्यः। अत्र च पण्डितयुधिष्ठिर-मीमांसक-वर्णितकालनिर्णय एव प्रामाणिक इति मत्वा बहुत्र तमनुसृत्य आलोचना विहिता इति ज्ञेयम्।

## 1.3. वैशिष्ट्यम्

अखिलव्याकरणेषु साङ्गोपाङ्गवेदाङ्गं पाणिनीयव्याकरणमेव रत्नम् इव शोभते। तत्तु पाणिनि-कात्यायन-पतञ्जलिप्रणीतं व्याकरणं हि त्रिमुनिव्याकरणम्। तत्र पाणिनिः ढक्कावादनात्[72] जातानि चतुर्दशसंख्यकानि माहेश्वरसूत्राणि आदाय अष्टाध्यायीं रचितवान्। तत्रत्यानां सूत्राणाम् उपरि कात्यायनेन वार्त्तिकानि रचितानि। तेषां कात्यायनप्रणीतानां वाक्यानां पतञ्जलिप्रणीतं विवरणं भाष्यम्

---

71 प. का. व्या. द., पृ. 29-31

72 नृत्तावसाने नटराजराजो ननादढक्कां नवपञ्चवारम्। उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।। नन्दि. का., श्लो. 1, पृ. 3

इत्युच्यते। तस्य च भाष्यस्य *महाभाष्यत्व*व्यवहारः अग्रे वक्ष्यमाणः एव। *महाभाष्यस्य* रचनायाः वैशिष्ट्यं, शैली च, *महाभाष्यस्य* माहात्म्यम्, *महाभाष्य*-पाठोच्छेदः, तस्य च पुनरुद्धारः इत्येते विषयाः क्रमशः प्रतिपादयिष्यमाणाः सन्ति।

### 1.3.1. पातञ्जलभाष्यस्य महाभाष्यत्वम्

सूत्रव्याख्यानयोः विशेषज्ञानं तावल्लभ्यते पारिभाषिकशब्दसमूहज्ञानेन। *महाभाष्यप्रदीपोद्द्योतच्छाया*टीकायां वैद्यनाथः पायगुण्डः लिलेख- तत्रातिशयवर्णना व्याख्यानम् इति। व्याख्यानमूलकग्रन्थास्तावद् बहुविधाः भवन्ति। भाष्य-संग्रह-वार्त्तिक-वृत्ति-चूर्णि-*न्यास*-पञ्जिका-टीका-टिप्पणी-ढुण्ढिका-प्रकरणादयः। तेषु च सूत्रभाष्यवार्त्तिकानाम् अधिकं व्यवहारः आसीत्। अत एव आचार्यस्य श्रीतत्त्वनिधेः *लक्ष्मीनारायणसंवादे* स्मृतं यत्- "सूत्रं भाष्यं वार्त्तिकं च त्रयं शास्त्रेषु वर्ण्यते" इति। अत्र तावदवधेयं यत् भाष्यवार्त्तिकयोः कालान्तरे दुर्गमत्वात् मुनयः वृत्तिसंग्रहादीन् चक्रुः। हनुमन्तं लक्ष्यीकृत्य सीता अचकथत्- "ससूत्रवृत्त्यर्थपदं महार्थं ससंग्रहं सिध्यति वै कपीन्द्रः।"[73] भाष्यते व्याख्यायते तद् भाष्यम्- *महाभाष्य*मिति शास्त्रार्थे व्याख्यानार्थे वा भाष्यशब्दः प्रयुज्यते। महच्च तद् भाष्यम्- *महाभाष्यम्*। इतरस्मात् भाष्यात् किं तावद् वैशिष्ट्यम् अस्येति चेत्- पातञ्जलमहाभाष्ये इष्टीनां सूत्रवत्

73 वा. रा., उ., स. 36, श्लो. 49, पृ. 114

समादारः क्रियते। तस्मात् पातञ्जलभाष्यं *महाभाष्य*मुच्यते। प्रसङ्गे अस्मिन् वाक्यपदीयग्रन्थः द्रष्टुं शक्यः।[74] भाष्यकारपतञ्जलिसिद्धान्तः इष्टिरुच्यते।

सन्ति भाष्यस्य नैकानि लक्षणानि संस्कृतवाङ्मयप्राचीनपरम्परायां प्रसिद्धानि। तथा हि *पाराशरोपपुराण*स्य अष्टादशाध्याये अध्याये उच्यते-

सूत्रार्थं भाष्यरूपेण यथावद् दर्शयन्ति च।
सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः।।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।[75]

तथा च प्रसिद्धिः वैयाकरणसम्प्रदाये-

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।[76]

राजशेखरस्य काव्यमीमांसायामुच्यते- "आक्षिप्य भाषणात् भाष्यम्" इति।[77]

वैयाकरणसम्प्रदाये भाष्यशब्दस्य स्थाने महाभाष्यशब्दस्य व्यवहारो भवति यथा- पातञ्जलमहाभाष्यम्, जैनेन्द्रमहाभाष्यम्। महावैयाकरणः हरदत्तः

---

74 क) कृतेऽथ पतञ्जलिना गुरूणा तीर्थदर्शिना। सर्वेषां न्यायबीजानां महाभाष्यनिबन्धनाः।।
वा. प., 2.486
ख) तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनम्, यावत् सर्वेषां न्याय-बीजानां बोद्धव्यमित्यत एव महत्शब्देन विशिष्य महाभाष्यमित्युच्यते लोके। वा. प., पुण्य., 2.486

75 पारा. पु., अष्टादश., श्लो. 15 -16, पृ. 90

76 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 4

77 का. मी., पृ. 20

*पदमञ्जरी*प्रारम्भे कथयति- "आक्षेपसमाधानपरो ग्रन्थो भाष्यम्" इति।[78] तदिह कात्यायनप्रणीतानां वाक्यानां पतञ्जलिप्रणीतं विवरणम्। पतञ्जलेः बहोः कालात् पूर्वं कात्यायनस्य गुरुः मीमांसावृत्तिकारः भगवान् उपवर्षः *महाभाष्य*कारः उच्यते स्म। यतो हि मीमांसायाः उपरि स *महाभाष्यं* प्रणिनाय। ग्रन्थः यद्यपि न प्राप्यते, तदुल्लेखस्तु लभ्यते। *शाबरभाष्ये* उल्लिखितं यत्- "तेनोच्यते तृतीयायाः स्थाने द्वितीयेति"[79]। कुमारिलभट्टः लिलेखात्र- "प्राधान्यविवक्षैव न्याय्या। ततश्च तृतीयार्थसिद्धिरिति मत्वा महाभाष्यकारेणोक्तम्- ततश्च तृतीयायाः स्थाने द्वितीयेति"[80] अत्रत्यः *महाभाष्य*कारः उपवर्षः न तु पतञ्जलिः। अत्र तावत् समर्थिका सोमेश्वरस्य *न्यायसुधा* इति।[81]

सन्ति पतञ्जलेः ऋते अन्ये वार्त्तिकभाष्यकाराः ये अपि कात्यायन-कृतवार्त्तिकानाम् उपरि भाष्यं चक्रुः। तथा च हेलराजः *वार्त्तिकोन्मेषः* इत्याख्यं ग्रन्थम् अलेखीत्, तत्तस्य *वाक्यपदीय*टीकातः विज्ञायते- "वाक्यकारस्यापि तदेव दर्शनम् इति वार्त्तिकोन्मेषे कथितमस्माभिः। वार्त्तिकोन्मेषे विस्तरेण

---

78 का. वृ., प्र. भा., पृ..4

79 जै. मी. भा., द्वि. भा., जै. सू. 2.1.12, पृ. 380

80 तन्त्र., जै. सू. 2.1.12, पृ. 390

81 देवतोद्देशद्रव्यत्यागप्रक्षेपाख्यधात्वर्थत्रयसमुदायरूपं जुहोत्यर्थं प्रति देवताया द्रव्यस्य वा कर्मत्वायोगाज् जुहोतियोगे कर्मणि द्वितीयानुपपत्तेस्तृतीयार्थवाचितोपवर्षेणोक्ता। व्याकरणे द्वितीयायास्तृतीयार्थवाचित्वानभिधानाद्या परीष्टिर्निमित्तानां कर्त्तव्येत्युपपादिता सा महाभाष्यकारेण न कर्तव्येति वर्णितेत्युपवर्षे महाभाष्यकारशब्दप्रयोगाच्चैवं व्याख्यातः। न्या. सु., द्वि. भा., पृ. 632

यथातत्त्वमस्माभिर्व्याख्यातमिति तत एवावधार्यम्। वार्त्तिकोन्मेषे यथागमं व्याख्यातम्, तत एवावधार्यम्।"[82]

**इदमत्रावधेयम्-** त्रिमुनिव्याकरणपरम्परायां अन्तिमस्थानीयः असौ आचार्यः व्याकरणशास्त्रस्य भाष्यपरम्परायाः वृक्षरूपः, तत्प्रणीतं भाष्यं तु फलरूपम्। तत्र सकलन्यायबीजानां संग्रहत्वात् तत् महाभाष्यमुच्यते।[83]

पतञ्जलिकाले सम्भवतः आकारदृष्ट्या असौ ग्रन्थः विशालः आसीत्, तस्माद्विशालाकायदृष्ट्या पातञ्जलभाष्यं *महाभाष्यम्* इति नाम्ना विख्यातं समजायत।

परमकारुणिकः सर्वशास्त्रविद् नागेशः *महाभाष्य*स्य माहात्म्यप्रतिपादन-काले कथयति- "व्याख्यातृत्वेऽप्यस्येष्ट्यादिकथनेनान्वाख्यातृत्वा-दितरभाष्यवैलक्षण्येन महत्त्वम्" इति।[84]

जयशङ्करलालत्रिपाठीमहोदयः कथयति- "भाष्यते व्याख्यायते विस्तरेण अनेन यद् वा" इत्येवंप्रकारेण शास्त्रार्थे व्याख्यानार्थे वा भाष्यशब्दं प्रयुक्तवान्। महच्च तद् भाष्यम् इति *महाभाष्यम्*। भाष्यान्तरापेक्षया अस्य वैशिष्ट्यं तावद्- अत्र

---

82 सं. व्या. शा. का. इ., प्र. भा., पृ. 340

83 कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना। सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।
वा. प., 2.477

84 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 5

*महाभाष्ये* पतञ्जलिः याः इष्टीः रचितवान् ताः पाणिनिसूत्राणि इव पूज्यन्ते।[85] भाष्यं कात्यायनप्रणीतानां वाक्यानां विवरणं पतञ्जलिप्रणीतम्।[86]

इत्येवम् इष्टयादिव्यवहारविमर्शैः पातञ्जलभाष्यस्य महाभाष्यत्वव्यवहारः भवति इति कथयितुं शक्यते।

### 1.3.2. *महाभाष्यस्य* रचनापद्धतिः

संस्कृतशब्दवाङ्मये *महाभाष्य*मेकाभूतपूर्वा सृष्टिः। तस्य *महाभाष्यस्य* शैली भाषा चाद्वितीया इत्यत्र नास्ति संदेहलेशः। व्याकरणाध्येतॄणां *प्रौढमनोरमा*दिकठिनग्रन्थाध्ययनं सम्भवति यावता क्लेशेन, तावता सुखेन तु *महाभाष्यस्या*ध्ययनं सम्भवति। यद्यपि अस्य मार्गः सरलः, परन्तु भाषा गम्भीरा रहस्यमयी च इत्यस्ति पतञ्जलेः सामर्थ्यम्।

प्रश्नोत्तरशैली तेनैव सर्वप्रथमम् आविष्कृता यस्याः अद्यतनीये काले काले परमप्रासङ्गिकता अस्ति। पार्थक्यम् एतत् स छात्रवद् आदौ प्रश्नम् उपस्थापयति, परम् आचार्यवद् उत्तरं प्रदाय अस्माकं मनांसि आनन्दीकरोति। कदाचिद् अनेकासां पृच्छानां पङ्क्तिः भवति। क्रमेण तासां पृच्छानां समाधानमपि प्रददाति। कदाचिच्च वास्तविकसिद्धान्तस्य अवगमनाय महान् क्लेशः अनुभूयते। तत्रापि यः व्याकरणशास्त्रीयपरम्परानभिज्ञः तस्य न सम्भवति सहजतया बोधः। तथाहि कदाचिच्च पूर्वपक्षमतानि इव सिद्धान्तपक्षमतानि मत्वा ते सिद्धान्तपक्षाः

---

85 तदेव, पृ. 4

86 का. वृ., प्र. भा., पृ. 4

पूर्वपक्षत्वेन तेन उपस्थापिताः। अन्ते च सर्वेषां दोषाणां परिहारं विधाय सिद्धान्तान् अपि प्रस्तौति। एतस्मिन् विषये बहूनि उदाहरणानि सन्ति। तद्यथा- *महाभाष्यस्य* पस्पशाह्निके शब्दः कः इति विचारः द्रष्टुं शक्यते।[87]

पतञ्जलिः तादृशः आचार्यः आसीत् यः छात्राणां भावयितव्यान् प्रश्नान् स्वयं विचिन्त्य उपस्थापयति। छात्राणां पुनः चिन्तनस्यावसर एव न भवति।

नागेशभट्टादिवद् दीर्घसमासस्य व्यवहारस्तथा नास्ति। अल्पसमास-युक्तवाक्यानां प्रयोगस्तेन कृतः। तदेतत् पतञ्जलेः भाषासामर्थ्यं सूचयति। कुत्रापि अनावश्यकः शब्दभारः नास्ति। *पराशरपुराणस्य* अष्टादशाध्याये उच्यते-

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्।।[88]

महाभाष्यानुसारेण सूत्राणां न केवलं पदच्छेदः व्याख्यानमुच्यते, अपि तु सः सूत्राणां व्याख्यानाय स्वरूपमेकं प्रास्तौत्। स स्वयमेव वदति- “न केवलं चर्चापदानि व्याख्यानम्- वृद्धिः आत् ऐजिति। किं तर्हि। उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः इत्येतत्समुदितं व्याख्यानं भवति।”[89] *काशिकावैयाकरण-सिद्धान्तकौमुद्या*दिषु शब्दप्रक्रियाग्रन्थेषु उदाहरण-प्रत्युदाहरण-अनुवृत्तपदसमूहानाम्

---

87 अथ व्याकरणमित्यस्य कः पदार्थः। सूत्रम्। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः। शब्दाप्रतिपत्तिः। एवं तर्हि शब्दः। शब्दे ल्युडर्थः। भवे च तद्धितः। प्रोक्तादयश्च तद्धिताः। एवं तर्हि.....। लक्ष्यलक्षणे व्याकरणम्। अथवा पुनरस्तु सूत्रम्। म. भा. पस्पशा.

88 पारा. पु., अष्टादश., श्लो. 17-18, पृ. 90

89 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 121-122

उल्लेखः लभ्यते। अतः इयं च व्याख्यानपद्धतिः सर्वैः विद्वद्भिः आदृता इति कथयितुं शक्यते। *सिद्धान्तकौमुद्याम्* अनुवृत्तपदानां कादाचित्कः उल्लेखः कादाचित्कः अनुल्लेखः। *काशिकायां* तु सूत्रस्य कियान् अंशः अग्रिमसूत्रेषु कियत्पर्यन्तम् अनुवृत्तः भवति इति स्पष्टं लिखितः अस्ति इत्यस्ति तयोः विशेषः।

अह्ना निर्वृत्तम् इति आह्निकम् इति व्युत्पत्त्या आह्निकशब्दः सिद्धः। अत्र तावत् संदेहः स्यात् किं पतञ्जलिना एकस्मिन् अहनि यत् लिखितवान् तद् आह्निकम् उत एकस्मिन् अहनि यत् पाठितवान् तद् आह्निकम् इति चेत् अत्र उच्यते पण्डितैः, एकस्मिन् अहनि यत् लिखितवान् तदेव आह्निकम् इति जयशङ्करलालत्रिपाठी अपि समर्थयति। एतेन इदम् अनुमातुं शक्यते यत् महर्षिपतञ्जलिः यदा कदापि लिखति स्म अहनि, न तु नित्यम्। तस्मात् केवलेषु 85 दिनेषु एव एतादृशविशालाकायस्य ग्रन्थस्य रचना सञ्जाता। पाणिनेः *अष्टाध्याय्याम्* अष्टौ अध्यायाः सन्ति। प्रत्येकम् अध्याये चत्वारः पादाः सन्ति। यत्र साकल्येन सूत्रसंख्या सामान्यतया समाना एव इति मन्यते। केषाञ्चित् सूत्राणां योगविभागकारणेन सूत्राणि पृथक् पृथक् क्रियन्ते। वार्त्तिकम् अपि सूत्रम् इति केचित्। केचिच्च गणसूत्रमपि सूत्रम्। तस्मात् कदाचित् सूत्रसंख्यापार्थक्यं दृश्यते। यतो हि व्याकरणं षट्सु अङ्गेषु प्रधानम् इति अतः यथाशक्ति अस्याः अष्टाध्यायाः सूत्रसंख्या सामान्यतया एवं स्थिरीकृता विद्वद्भिः-

*महाभाष्य*परिचयः

| अध्यायः | पादः | | | | सूत्रसंख्या (योगेन) |
|---|---|---|---|---|---|
| | प्रथमः | द्वितीयः | तृतीयः | चतुर्थः | |
| **प्रथमः** | 75 | 73 | 93 | 110 | 351 |
| **द्वितीयः** | 72 | 38 | 73 | 85 | 268 |
| **तृतीयः** | 150 | 188 | 176 | 117 | 631 |
| **चतुर्थः** | 178 | 145 | 168 | 144 | 635 |
| **पञ्चमः** | 136 | 140 | 119 | 160 | 555 |
| **षष्ठः** | 223 | 199 | 139 | 175 | 736 |
| **सप्तमः** | 103 | 11 | 120 | 97 | 438 |
| **अष्टमः** | 74 | 108 | 117 | 68 | 367 |
| **साकल्येन** | | | | | **3981** |

यदि चात्र चतुर्दशानां माहेश्वरसूत्राणां योगः क्रियते तर्हि साकल्येन माहेश्वरसूत्राणां संख्या 3995 भवति। इयं च सूत्रसंख्या *स्वरसिद्धान्तचन्द्रिका*याम् लिखिता-

चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
*अष्टाध्यायी* पाणिनीया सूत्रैर्माहेश्वरैः सह।। [90]

*महाभाष्यं* तु न सर्वाणि पाणिनीयसूत्राणि आदाय लिखितम्। पतञ्जलिः समेषां पाणिनीयसूत्राणाम् उपरि भाष्यं नैव रचयामास। सर्वत्र नवाह्निकस्यैव पाठः प्रचलति। अत्र च आह्निकविभागः सपादसंख्यं प्रदर्शितः अस्ति-

90 स्वर. सि. च., आ. प्र., पृ. 3

# प्रथमोऽध्यायः

| अध्यायः | पादः | आह्निकम् | | अध्यायः | पादः | आह्निकम् |
|---|---|---|---|---|---|---|
| प्रथमः | 1 | 9 | | द्वितीयः | 1 | 3 |
| प्रथमः | 2 | 3 | | द्वितीयः | 2 | 2 |
| प्रथमः | 3 | 2 | | द्वितीयः | 3 | 3 |
| प्रथमः | 4 | 4 | | द्वितीयः | 4 | 2 |
| **साकल्येन** | | 18 | | **साकल्येन** | | 10 |
| **अध्यायः** | **पादः** | **आह्निकम्** | | **अध्यायः** | **पादः** | **आह्निकम्** |
| तृतीयः | 1 | 6 | | चतुर्थः | 1 | 4 |
| तृतीयः | 2 | 3 | | चतुर्थः | 2 | 2 |
| तृतीयः | 3 | 2 | | चतुर्थः | 3 | 2 |
| तृतीयः | 4 | 1 | | चतुर्थः | 4 | 1 |
| **साकल्येन** | | 12 | | **साकल्येन** | | 9 |
| **अध्यायः** | **पादः** | **आह्निकम्** | | **अध्यायः** | **पादः** | **आह्निकम्** |
| पञ्चमः | 1 | 2 | | षष्ठः | 1 | 3 |
| पञ्चमः | 2 | 2 | | षष्ठः | 2 | 2 |
| पञ्चमः | 3 | 2 | | षष्ठः | 3 | 3 |
| पञ्चमः | 4 | 1 | | षष्ठः | 4 | 4 |
| **साकल्येन** | | 7 | | **साकल्येन** | | 12 |
| **अध्यायः** | **पादः** | **आह्निकम्** | | **अध्यायः** | **पादः** | **आह्निकम्** |
| सप्तमः | 1 | 2 | | अष्टमः | 1 | 2 |
| सप्तमः | 2 | 2 | | अष्टमः | 2 | 2 |
| सप्तमः | 3 | 2 | | अष्टमः | 3 | 2 |
| सप्तमः | 4 | 1 | | अष्टमः | 4 | 1 |
| **साकल्येन** | | 7 | | **साकल्येन** | | 7 |

## *महाभाष्य*परिचयः

**इदमत्रावधेयम्-** पतञ्जलिः कश्चिद् तादृशः व्याख्याता वा समीक्षकः वा अध्यापकः वा यः निष्पक्षवर्त्मना विषयान् प्रस्तौति इति विभावयामि। कात्यायनस्य वार्त्तिकानि सः पूर्वपक्षत्वेन उपस्थापितवान्। कुत्रचित् कात्यायनेन सह विरोधे सति सः स्वमतं नीरक्षीरविवेकेन प्रस्तौति, यतो हि पूर्वपक्षमतं खण्डनीयमेव इत्येतदर्थं सः *महाभाष्य*रचनायां प्रवृत्तः इति न दृष्टः। बहुत्र वार्त्तिकानि खण्डितानि, क्वचिच्च पाणिनीयसूत्राणि अपि खण्डितानि। तस्य च चिन्तनविमर्शः परमपूज्यः।

कठिनस्य व्याकरणशास्त्रस्य सहजतया बोधनाय लौकिकोदाहरणप्रयोगः नितरां अस्माकं चेतसां आनन्दम् आश्चर्यं च जनयति। अइउण् इत्यत्रत्यः भाष्यग्रन्थः द्रष्टुं शक्यः।[91]

ज्ञाप्यानां वा परिभाषाणां वा यः संग्रहः *परिभाषेन्दुशेखर-परिभाषावृत्त्या*दिषु प्राप्यते वस्तुतः तस्य आकरग्रन्थः *महाभाष्य*मेव। तत्तु नागेशः *परिभाषेन्दुशेखर*स्य प्रारम्भे अवोचत्।[92] तेषु ग्रन्थेषु अनुक्तानि अपि बहूनि ज्ञापितवचनानि सन्ति येषाम् आलोचनादिकं *महाभाष्ये* लभ्यते। तेषाम् अनुक्तानां बहूनां ज्ञाप्यानाम् व्याख्यानं विहितं रामानुजतातार्येण नागेशकृत*ज्ञापकसंग्रह*स्य व्याख्यानावसरे। तत्तु शोधप्रबन्धे नैवालोचयिष्यते। *महाभाष्य*कारज्ञापितवचनानाम् अध्ययनं पाणिनीयसूत्राणाम् अर्थावगमनाय महान्तम् उपकरोति।

---

91 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 109 -140

92 प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते। प. भा. शे., पृ. 2

शबरस्वामी *मीमांसाभाष्य*लेखने महान् प्रयासः विहितः परन्तु तादृशभाषारचनायाम् असमर्थः प्रतीयते। शाङ्करभाष्यस्य भाषा अपि सरला, सरसा भावप्रकटनाय समर्था च। तथापि *महाभाष्य*रचना इव स्वाभाविकी नास्ति। चरकसहितायाः गद्यभागस्य भाषा यद्यपि सरला सरसा स्वाभाविकी किन्तु विषयप्रतिपादने *महाभाष्य*वदुत्कृष्टता नास्ति।

अन्ते एतदेव वक्तुं शक्यते यत् संस्कृतवाङ्मये *महाभाष्य*सदृशः तादृशः कश्चिद् आदर्शग्रन्थः नास्ति, यत्र भाषायाः सारल्यं, प्राञ्जलत्वं, स्वाभाविकत्वम्, उत्कृष्टविषयप्रतिपादनशैली, लौकिकोदाहरणप्रयोगः, लौकिकोक्तिप्रयोगश्च अस्ति इत्यस्ति पातञ्जलमहाभाष्यरचनायाः परमवैशिष्ट्यम्।

वस्तुतः सम्पूर्णव्याकरणदर्शनमेव *महाभाष्ये* विस्तृतम् अस्ति, तस्मादेव पुण्यराजः कथयति- "*महाभाष्ये* हि बहुविधिविद्यावादबलमार्ष व्यवस्थितम्" इति।[93]

## 1.3.3. *महाभाष्यस्य* गरिमा

अद्यतनीयं संस्कृतव्याकरणं तावत् त्रिमुनिव्याकरणमित्युच्यते। पाणिनिना सूत्रं विरचितम्, कात्यायनेन च वार्त्तिकं रचितम्। तर्हि पतञ्जलिना किं कृतम् इति स्वाभावाविकः प्रश्नः। अत्रावधेयं यत् पतञ्जलिरपि शब्दप्रयोगेषु स्वनियमान् कल्पयामास। केषुचित्स्थलेषु स्वतन्त्रं मतम् उपस्थापयामास। तच्च 'इष्टि'रित्यभिधीयते।

---

93 वा. प., पुण्य., 2.488

## *महाभाष्य*परिचयः

वस्तुतः पतञ्जलिकाले नैके पाणिनीयव्याकरणग्रन्थाः, अनेके च पाणिनीयेतरव्याकरणग्रन्थाः विराजमानाः आसन्। पातञ्जलमहाभाष्यं तु समेषां पाणिनीयव्याकरणग्रन्थानां सारभूतः इति विद्वद्भिः स्वीकृतः।

पाणिनिकात्यायनौ तु परम्पराप्राप्तशब्दरूपसमर्थकौ आस्ताम्। भाष्यकारः लोकव्यवहारं शब्दरूपनिर्धारणे मुख्यं कारणं मन्यते स्म। एवञ्च सः परम्पराप्राप्तशब्दरूपप्रयोगस्य समर्थकः नासीत्। क्वचित् शास्त्रसिद्ध-लोकव्यवहार-सिद्धशब्दरूपयोः विरोधे सति तस्य लोकव्यवहारसिद्धशब्दरूपस्य शास्त्रविरुद्धत्वे अपि स्वीकारः कृतः।

अत्रोदाहरणं तावत्- 'अजेर्व्यघञपोः'[94] इति पाणिनीयसूत्रस्थं भाष्यम्। तत्र तावत्- "किं च भो इष्यते एवैतद्रूपम्। वाढमिष्यते। एवं हि कश्चिद् वैयाकरण आह- कोऽस्य रथस्य प्रवेता। सूत आह- अहमायुष्मन्नस्य रथस्य प्राजितेति। वैयाकरण आह- अपशब्द इति। सूत आह- प्राप्तिज्ञो देवानांप्रियः, न त्विष्टिज्ञः, इष्यते एतद् रूपमिति। वैयाकरण आह- अहो नु खल्वनेन दुरुतेन बाध्यामहे। सूत्रम्-आह- न खलु वेञः सूतः, सुवतेरेव सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या दुःस्सूतेनेति वक्तव्यम्।"[95] इत्यत्र पाणिनिः लोकप्रयुक्तशब्दरूपस्यैव समर्थकः न तु व्याकरणशास्त्रप्रयुक्तशब्दरूपस्य।

---

94 पा. सू. 2.1.45

95 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 20 -21

सारल्येन विषयबोधनाय तद्रुचिवर्धनाय च पतञ्जलिः लौकिकोक्तीनामपि प्रयोगम् अकार्षीत्। येन अल्पशब्दैः महतः अपि अर्थस्य बोधनं सम्भवति।

*महाभाष्ये* केवलं सूत्राणां पदानाम् आलोचनं विद्यते इत्युच्यते इति भ्रमे तु कदापि न पतेत् कोऽपि। तत्र व्याकरणदर्शनेन सह विविधमतानामपि उपस्थापनम् अस्ति। न्याय-मीमांसा-वेदान्तादिशास्त्रोद्भूतसूक्ष्मातिसूक्ष्मविषयाणामपि वैयाकरणमतविमर्शः तेन प्रस्तुतः अस्ति। उदाहरणार्थं पस्पशाह्निके जातिव्यक्ति-पदार्थताविचारः, शब्दनित्यत्वानित्यत्वविमर्शः च द्रष्टुं शक्यः।

महामुनेः पतञ्जलेः काले पाणिनीयव्याकरणाद् ऋते नैके प्राचीनाः व्याकरणग्रन्थाः विद्यमानाः आसन्। पाणिनीयव्याकरणरूप*महाभाष्ये* तेषां सकलग्रन्थानां सारसंग्रहः विद्यते। अन्येभ्यः प्राचीनग्रन्थेभ्यः कतिपयवचनानि अपि अस्मिन् उल्लिखितानि सन्ति। *महाभाष्यस्य* अध्ययनेन इदं स्पष्टं भवति यत्, न केवलं व्याकरणशास्त्रस्य अयं प्रामाणिकग्रन्थः अपि तु सर्वासां विद्यानाम् अयम् आकरग्रन्थः। तस्मादेव भर्तृहरिः कथयाञ्चकार-

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां *महाभाष्ये* निबन्धने।।[96]

एतावता कालेन *महाभाष्यस्य* पठनपाठनस्य बहुवारं व्याघातः जातः। तस्य च त्रिवारं लोपः जातः इति इतिहासाद् अनुमीयते। प्रथमं तावत्-वैजि-सौभव-

96 वा. प. 2.486

## *महाभाष्य*परिचयः

हर्यक्षादिशुष्काः तार्किकाः *महाभाष्यस्य* प्रचाराय व्याघातं जनयन्ति स्म इति भर्तृहरेः लेखेभ्यः प्राप्यते। चन्द्राचार्यः महता परिश्रमेण दक्षिणप्रदेशे प्राप्तात् कस्माच्चित् पर्वतप्रदेशीयहस्तलेखात् तस्य उद्धारम् अकरोत्। तथा च भर्तृहरिः अलेखीत्-

वैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके।।
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः।।
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।
स नीतो बहुशाखात्वं चन्द्राचार्यादिभिः पुनः।।[97]

द्वितीयं तावत्- अत्र तावदवधेयं यत् महाराजस्य अभिमन्योः आदेशेन *महाभाष्यस्य* उद्धारम् अकार्षीत् कल्हणः। कल्हणस्य *राजतरङ्गिणी*ग्रन्थतः ज्ञायते यत् अष्टमविक्रमशतके *महाभाष्यस्य* पुनः प्रचारस्य नाशः अभूत्। तदा कश्मीरप्रदेशीयमहाराजः जयापीडः देशान्तरं क्षीरनामकं शब्दविशारदम् आहूय अस्य विच्छिन्नस्य *महाभाष्यस्य* प्रचारम् आरब्धवान्। तथा च कल्हणः लिलेख-

देशान्तरादागमय्याथ व्याचक्षाणान्क्षमापतिः।
प्रावर्तयत विच्छिन्नं *महाभाष्यं* स्वमण्डले।।
क्षीरभिधानाच्छब्दविद्योपाध्यायात्संभृतश्रुतः।

97 वा. प. 2.479 -81

बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः।।[98]

महाराजस्य जयापीडस्य शासनकालः विक्रम 808 संवत्सरतः विक्रम 839 संवत्सरपर्यन्तः। वैयाकरणक्षीरस्वामी, क्षीरतरङ्गिणी, *अमरकोश*टीकादि-व्याख्याता इति अनेके सन्ति क्षीरनाम्ना। क्षीरस्वामी स्वग्रन्थेषु महाराजभोजस्य तथा तस्य *सरस्वतीकण्ठाभरणस्य* उल्लेखम् अकरोत्। तस्मात् क्षीरस्वामिकालः अस्ति विक्रम 11 शताब्द्याः उत्तरार्धकालः।

तृतीयं तावत्- विक्रम 18 शतके तथा विक्रम 19 शतके *वैयाकरणसिद्धान्तकौमुदी-लघुशब्देन्दुशेखरा*दीनामर्वाचीनग्रन्थानां बहुप्रचारकारणात् *महाभाष्यस्य* पठनपाठनं लुप्तप्रायं संजातम्। तथा काशीवैयाकरणानाम् इदं चिन्तनम् अस्ति यत्-

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः।।[99]

अत्र परमहंसदण्डिस्वामिविरजानन्दमहाभागः, तच्छिष्यः स्वामिदयानन्द-सरस्वतीमहोदयः च तस्य *महाभाष्यस्य* उद्धारम् अकृत। श्रीस्वामिविरजानन्दः तात्कालिकपण्डितानां विरोधं जनयन् इदम् अघोषयत्-

*अष्टाध्यायीमहाभाष्ये* द्वे व्याकरणपुस्तके।
ततोऽन्यत् पुस्तकं यत्तु तत्सर्वं धूर्तचेष्टितम्।।[100]

---

98 राज., च. त., पृ. 109

99 ल. श. शे., सम्पा. सत्यनारायणमूर्तिः, पृ. 4

*महाभाष्य*परिचयः

भारतवर्षे *महाभाष्यस्य* पठनपाठनं सम्भवति तयोः गुरुशिष्ययोः परिश्रमफलेन।[101]

## 1.3.4. *महाभाष्य*पाठाव्यवस्था

*महाभाष्यस्य* बहुवारं पठनपाठनोच्छेदकारणात् पाठेषु अव्यवस्था समुत्पन्ना। तत्र भर्तृहरिकैयटनागेशादिटीकाकाराः बहुषु स्थानेषु पाठान्तरम् उल्लिलिखुः। तत्र नागेशः *महाभाष्यस्य* अपपाठान् निर्देशितवान्। केषुचित् स्थलेषु *महाभाष्यस्य* पाठानां पौर्वापर्यं नष्टम्। टीकाकर्तारः तस्य केषुचित् स्थलेषु निर्देशान् विहितवन्तः, केषुचिच्च विना निर्देशं अत्यजन्। एवमपि भवितुमर्हति यत्, टीकाकर्तॄणां वेलायां पाठाः समीचीनाः आसन् परन्तु कालेन मूलस्य तथा टीकानां पार्थक्यम् आगतम्। बहुत्र च *महाभाष्यस्य* पाठः नष्टः। अत्र पण्डितप्रवरेण युधिष्ठिरमीमांसकेन प्रोक्तं विवरणमनुसृत्य उदाह्रियन्ते।[102]

तथा च कतिपयानि स्थलानि तावत्-

अव्ययीभावश्च इत्यस्य शास्त्रस्य भाष्ये लिखितम् अस्ति यत्-

‘अस्य च्वौ-अव्ययप्रतिषेधश्चोद्यते, दोषाभूतमहर्दिवाभूता रात्रिरित्येवमर्थम्। स इहापि प्राप्नोति- उपकुम्भीभूतम्। उपमणिकीभूतम्’ इति।

---

100 सं. व्या. शा. का. इ., प्र. भा., पृ. 333

101 तदेव, पृ. 341

102 तदेव, पृ. 342

सम्पूर्णे *महाभाष्ये* कुत्रापि अस्य सूत्रस्य विषये भाष्यं नैव लभ्यते। तत्र कुत्रापि 'अस्य च्वौ'[103] इति सूत्रविषये अव्ययप्रतिषेधविधानं नास्ति। तस्माद् इदं स्पष्टं यत् *महाभाष्ये* 'अस्य च्वौ' इति सूत्रसम्बन्धिभाष्यम् अनशत्।

*महाभाष्यस्य* कारिका एका उपलभ्यते-

अनुसूर्लक्ष्यलक्षणो सर्वसादेर्द्विगोश्च लः।

इकन् पदोत्तरपदात् शतषष्टेः धिकन् पथः।।[104]

*महाभाष्ये* केवलस्य द्वितीयचरणस्य व्याख्या उपलब्धा भवति, अन्येषां त्रयाणां चरणानां व्याखा अप्राप्तैवास्ति।

पतञ्जलिः 'कृन्मेजन्तः'[105] इति सूत्रभाष्ये "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य"[106] इति परिभाषायाः कांश्चिद् दोषान् परिगणितवान्। तत्र दोषपरिगणनप्रसङ्गे कष्टायपदसम्बन्धिदीर्घत्वस्य अप्राप्तिरूपदोषस्य निर्देशं न कृतवान्। परन्तु कैयटः *प्रदीप*व्याख्याने तद्दोषसमाधानान् प्रदर्शयन् प्रथमं तावत् कष्टायपदस्य दीर्घत्वस्य अप्राप्तेः समाधानं ददाति। तस्मादेव नागेशः लिखितवान् "कष्टायेति यादेशो दीर्घत्वस्येति ग्रन्थो भाष्यपुस्तकेषु भ्रष्टोऽतो न दोषः।"[107]

---

103 पा. सू. 7.4.32

104 म. भा. 4.2.60

105 पा. सू. 1.1.39

106 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 359

107 तदेव, पृ. 367

पुनः कैयटः 'अनचि च'[108] सूत्र*भाष्यप्रदीपे* लिखति- "पाठोऽयं लेखकप्रमादान्नष्टः, 'पर्युदासे ह्यच्सदृशस्य वर्णान्तरस्य निमित्तत्वेनोपादानादवसाने द्विर्वचनस्याप्रसङ्गात्।' तस्मात् 'नायं पर्युदासो यदन्यश्च इति। किं तर्हि- प्रसज्यप्रतिषेधोऽचि नेत्ययं पाठः।' "[109] अर्थात् *महाभाष्ये* नायं प्रसज्यप्रतिषेधः इति पाठः लेखकप्रमादेन नष्टः। एतत्कतिपयोदाहरणैः स्पष्टं प्रतीयते यत् सम्प्रति उपलभ्यमाने *महाभाष्ये* कतिपयानि स्थानानि खण्डितानि।

एतावता कतिपयेभ्यः स्थलेभ्यः *महाभाष्यस्य* प्रकाशनं यद्यपि अभूत् तथापि यथायोग्यं प्रकाशनम् अद्यापि नाभूत्। डॉ. कील्हार्नमहोदयस्य संस्करणं सर्वोत्कृष्टं मन्यते, तस्यापि संशोधनम् आवश्यकम्। डॉ. कीलहार्नमहोदयात् परं *महाभाष्यस्य* अनेके प्राचीनाः हस्तलेखाः टीकाश्च उपलब्धाः सन्ति, तेषामपि नूतनं संस्करणम् आवश्यकम्।

सर्वोपरि अद्यतनीयकाले सम्पूर्णस्य *महाभाष्यस्य* अध्ययनस्य एका सप्राचीनपरम्परम् आधुनिकपरम्परा आवश्यकी, येन पाणिनीयव्याकरणस्य यथासम्भवं संरक्षणं स्याद् इत्यंह चिन्तयामि।

## 1.4. पतञ्जलेः कृतयः तट्टीकादयः तत्कर्तारश्च

*महाभाष्यं* विहायापि नैके ग्रन्थाः सन्ति पतञ्जलेः। तेषामालोचना विधास्यते। पुनश्च पातञ्जल*महाभाष्यो*परि सन्ति विदुषां नैके टीकाग्रन्थाः। सम्प्रति

108 पा. सू. 8.4.47

109 म. भा., ष. ख., सम्पा. दधिरामशर्मा, पृ. 229-230

तेषु केचन उपलब्धाः केचन च अनुपलब्धाः। उपलब्धासु अपि टीकासु काश्चन सम्पूर्णतया न लभ्यन्ते। काश्चन तु नाम्ना एव विराजमानाः। पुनश्च अनेकेषां टीकाग्रन्थानां कर्तृत्वपरिचयः अज्ञातः। एवञ्चात्र उपलभ्यमानप्रमाणैः तत्संक्षिप्तपरिचयः सविमर्शम् आलोच्यते-

### 1.4.1. पतञ्जलेः कृतयः

पतञ्जलेः सम्प्रति त्रयः ग्रन्थाः प्राप्यन्ते। *निदानसूत्रम्, योगदर्शनम्, महाभाष्यं* चेति। किन्तु तेषु निदानसूत्रयोगदर्शनयोः रचना केनचित् प्राचीनेन पतञ्जलिना विहिता इत्यपि उच्यते।[110] अनयोः ग्रन्थयोः पतञ्जलित्वविषये पण्डितानां मतभेदः लभ्यते। चक्रपाणि-पुण्यराज- भोजदेवप्रभतयः विद्वांसः तेषां त्रयाणां ग्रन्थानाम् एककर्तृकत्वं मन्यन्ते। सत्स्वपि विदुषां मतभेदे विभिन्नग्रन्थानुशीलनेन अधोलिखितानां केषाञ्चिद्ग्रन्थानां पतञ्जलिकर्तृत्वं विभाव्यते, तेषां ग्रन्थानां परिचयस्तावत्-

#### 1.4.1.1. *महानन्दकाव्यम्*

महाराज-समुद्रगुप्त-विरचित*कृष्णचरिता*ज्ज्ञायते यत् *महानन्दः महानन्दमयः* वेति महाकाव्यं पतञ्जलेः रचना। महाराजः समुद्रगुप्तः *कृष्णचरित*स्य प्रस्तावनायाम् अलेखीत्-

विद्ययोद्रिक्तगुणतया भूमावमरतां गतः।

---

110 सं. व्या. शा. का. इ., प्र. भा., पृ. 335

*महाभाष्य*परिचयः

पतञ्जलिर्मुनिवरो नमस्यो विदुषां सदा।।

कृतं येन व्याकरणभाष्यं वचनशोधनम्।

धर्मावियुक्ताश्चरके योगारोगमुखःकृता।।

महानन्दमयं काव्यं योगदर्शनमद्भूतम्।

योगव्याख्यानभूतं तद् रचितं चित्तदोपहम्।।[111]

तत्र काव्येन सह योगस्य व्याख्या विहिता। मगधाधिपतिना महानन्देन सह अस्य नास्ति कश्चित्सम्बन्धः।

### 1.4.1.2. *चक्रपाणिपरिष्कारः*

चक्रपाणिपुण्यराजभोजदेवादयः ग्रन्थकर्तारः पतञ्जलिम् *चरकसंहिता*-प्रतिसंस्कारकं मन्यन्ते स्म। *चरकसंहिता*याः प्रत्येकं स्थानान्ते लिखितं यत्- 'अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते' इति। तर्हि किं पतञ्जलेः नामान्तरं चक्रपाणिः इति। तदर्थं *महाभाष्ये* उद्धृतानां केषाञ्चिद् वैदिकपाठशाखानां तुलना कार्या। पतञ्जलिः *काठकसंहिता*याः पाठान् उद्धृतवान् अधिकतया।

'सह सुपा'[112] इति पाणिनीयसूत्रभाष्यप्रतिपादनकाले "पुनरुरत्सस्यूतं वासो देयम्, पुनर्निष्कृतो रथः।"[113] भाष्यकृता उक्तम्। एवं 'सह सुपा' इत्यत्रत्य*महाभाष्य*ग्रन्थस्य *काठकसंहिता*दिग्रन्थैः समं तुलना विधीयते। तथा हि-

111 तदेव, पृ. 318

112 पा. सू. 2.1.4

113 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 357

"पुनरुत्स्यूतं वासो देयम्, पुनरुत्सृष्टोऽनड्वान्, पुनर्निष्कृतो रथः।"[114]

"पुनरुत्स्यूतं वासो देयम्, पुनर्णवो रथः पुनरुत्सृष्टोऽनड्वान्।"[115]

"पुनर्निष्कृतो रथो दक्षिणा, पुनरुत्स्यूतं वासः।"[116]

*महाभाष्यप्रदीप*व्याख्याकर्ता कैयटस्तु उद्धृतचरणं *काठकंसहिता*वचनं मन्यते। स लिखति- "काठकेऽन्तोदात्तः पठ्यते, तदभिप्रायेण पुनःशब्दस्य गतित्वाभावादिदमुदाहरणम्" इति।[117]

पुनश्च 'धि च'[118] इति पाणिनीयसूत्रभाष्यप्रतिपादनकाले "आम्बानां चरुः। नाम्बानां चरुरिति प्राप्ते"[119] इति भाष्यकृता प्रोक्तम्। एतस्य तुलना कतिपयवेदवचोभिः कर्तुं शक्यते। तथा हि-

"आम्बानां चरुः।"[120]

"आम्बानां चरुम्।"[121]

"नाम्बानां चरुम्।"[122]

---

114 काठक. 8.15, पृ. 67
115 मैत्रायणी. 1.7.2, पृ. 64
116 तैत्तिरीय. 1.5.2, पृ. 28
117 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 359
118 पा. सू. 8.2.25
119 म. भा., ष. ख., सम्पा. दधिरामशर्मा, पृ. 113
120 काठक. 15.5, पृ. 144
121 तैत्तिरीय., 1.8.10, पृ. 53
122 मैत्रायणी., 2.6.6, पृ. 145

अनया वैदिकपाठतुलनया एतद्वक्तुं शक्यते यत् पतञ्जलेः अपरं नाम चरकः अपि भवितुम् अर्हति।[123]

### 1.4.1.3. *सिद्धान्तसारावली*

वातस्कन्धपैतस्कन्धोपेत*सिद्धान्तसारावली*नाम्ना कश्चिद् वैद्यकग्रन्थः पतञ्जलिना विरचितः। पण्डितः गुरुपदः हालदारमहोदयः अपि समर्थयति।[124]

### 1.4.1.4. *कोषः*

हेमचन्द्रविरचिताम् *अभिधानचिन्तामणि*टीकाम् आधारीकृत्य *कोषस्य* कर्ता अपि पतञ्जलिः इति वक्तुं शक्यते। कोषग्रन्थानां बह्वीषु टीकासु 'वासुकिः', 'शेषः', 'भोगीन्द्रः', 'फणिपतिः' इत्यादिनामभिः कस्यापि *कोषस्य* उद्धरणं क्रियते। हेमचन्द्रः तस्य *अभिधानचिन्तामणौ कोषस्य* टीकायाः प्रारम्भे अन्यकोषकारैः सह वासुकेः निर्देशं करोति। किन्तु ग्रन्थे बहुत्र 'शेषः' इति पाठः लभ्यते। एवञ्च 'शेषः', 'वासुकिः' इत्युभौ एकम् पतञ्जलिं निर्दिशतः। विश्वप्रकाशकोषस्य आरम्भे 'भोगीन्द्रः'[125], 'फणिपतिः'[126] इति नामद्वयं प्राप्यते। *भाष्यप्रदीप*कर्ता कैयटः अपि *महाभाष्ये* 'शेषे'[127] इति पाणिनीयसूत्र-*भाष्यप्रदीप*व्याख्यायां पतञ्जलिं नागनाथं

---

123 सं. व्या. शा. का. इ., प्र. भा., पृ. 336

124 तदेव, 337

125 वि. प्र., श्लो. 1.16, पृ. 3

126 तदेव, श्लो. 1.19, पृ. 4

127 पा. सू. 4.2.92

ब्रूते।[128] चक्रदत्तः चरकटीकायां पतञ्जलिम् ‘अहिपतिं’ वदति। तेन इदम् आयातं यत् ‘शेषः’, ‘वासुकिः’, ‘भोगीन्द्रः’, ‘फणिपतिः’ ‘अहिपतिः’, ‘नागनाथः’ चेति सर्वे पर्यायवाचिनः शब्दाः। अतः पतञ्जलिः कमपि *कोष*ग्रन्थं निर्मितवान् इति प्रतीतः भवति।

### 1.4.1.5. *सांख्यशास्त्रम्*

शेषः सेश्वरसांख्यस्य कारिकाग्रन्थं कञ्चिद् रचितवान्। तस्य नाम आसीद् *आचार्यपञ्चाशीतिः*। अभिनवगुप्तपादाचार्यः किञ्चित्परिवर्तनं कृत्वा उक्तवान्- *परमार्थसारः* इति।[129] शेषः तु नागनाथः पतञ्जलिः, तस्मात् तस्य ग्रन्थस्य तत्कर्तृत्वं विभाव्यते। पतञ्जलेः चिन्तनमेकं *योगसूत्रव्यासभाष्ये* अपि उद्धृतम् अस्ति। तथा च *न्यायवार्त्तिकतात्पर्यटीका*याम्- “यथाहुरत्रभवन्तः पतञ्जलिपादाः- ‘को हि योगप्रभावादृते अगस्त्य इव समुद्रं पिबति स इव च दण्डकारण्यं सृजति’ ” इति।[130] एतस्य वचनस्य तुलना *व्यासभाष्य*वचनेन कर्तुं शक्या। तथा च *व्यासभाष्ये* उच्यते- “दण्डकारण्यं च चित्तबलव्यतिरेकेण कः शारीरेण कर्मणा शून्यं कर्तुमुत्सहेत, समुद्रमगस्त्यवद् वा पिबेत्।”[131]

---

128 म. भा. 4.2.92

129 तत्रैव

130 न्या. वा. ता. 1.1.1, पृ. 9

131 व्या. भा. 4.10, पृ. 51

#### 1.4.1.6. *साहित्यशास्त्रम्*

शारदातनयविरचिते *भावप्रकाशन*ग्रन्थे वासुकिरचिते कस्मिंश्चित् *साहित्यशास्त्रे* भावैः रसोत्पत्तेः उल्लेखः प्राप्यते।[132] तदधिकं तु न ज्ञायते।

#### 1.4.1.7. *लोहशास्त्रम्*

शिवदासः उक्तवान् यत् *चक्रदत्त*स्य टीकायां पतञ्जलिविरचित-*लोहशास्त्र*स्य उल्लेखः अस्ति।[133]

इत्येवं ग्रन्थादिषु उपलभ्यमानानि प्रमाणानि आधारीकृत्य भगवतः पतञ्जलेः के तावद् विरचिग्रन्थाः आसन् इत्यस्मिन् विषये आलोचनं विहितम्।

### 1.4.2. तट्टीकादयः तत्कर्तारश्च

पातञ्जलमहाभाष्यस्य अनेकाः टीकाग्रन्थाः विद्वद्भिः रचिताः सन्ति। किन्तु दौर्भाग्यस्य विषयः अस्ति यत् सम्प्रति काश्चन एव टीकाः उपलभ्यन्ते। तत्रापि काश्चन पूर्णतया लभ्यन्ते। काश्चन च नाम्ना एव। अनेकासां टीकानां कर्तृपरिचयः अज्ञातः। एवञ्च यासां टीकानां परिचयादिकं लभ्यते, ताः अत्र आलोच्यन्ते।

---

132 सं. व्या. शा. का. इ., प्र. भा., पृ. 338

133 तत्रैव

### 1.4.2.1. *महाभाष्यदीपिका*

आचार्यभर्तृहरिः *महाभाष्यदीपिकाख्यं* व्याख्यानं रचयामास। तत्र च *महाभाष्यस्य* विशदेन प्रौढव्याख्यास्ति। परवर्तिव्याख्यासु अस्याः टीकायाः प्राचीनत्वं प्रामाण्यं च सादरं स्वीक्रियते। व्याकरणशास्त्रे इयं टीका *त्रिपदी* इति नाम्ना भूषितः अस्ति। वर्तमानकाले अस्याः टीकायाः सप्त आह्निकानि उपलब्धानि सन्ति। अत्र युधिष्ठिरमीमांसकः कथयति यत्- त्रिपद्याः अध्ययनेन ज्ञायते यत्, *दीपिका*पूर्वं प्राचीनाः टीकाः आसन् *महाभाष्यस्य*। अत एव *दीपिकायां* भर्तृहरिः लिखति- 'अपरे', 'अन्ये', 'केचित्'। परन्तु टीकाकर्तृणां नामानि अज्ञातानि, अत एव तेषां परिचयादिकं न लभ्यते। यदि ततः पूर्वं लिखिताः टीकाग्रन्थाः द्वित्राः प्राप्स्यन्, तदा भ्रमः अयं दूरीभूतः अभविष्यत्। रामचन्द्रप्रकाशः तस्य ग्रन्थे लिखति- *अष्टाध्यायाः* प्रथमपादस्य आद्यानां 55 सूत्रभाष्याणाम् उपरि *दीपिका*व्याख्यानं लभ्यते। विभिन्नग्रन्थटीकादितः ज्ञायते यत् भर्तृहरिः सम्पूर्ण*महाभाष्यो*परि व्याखानम् अलेखीत् इति।[134]

अस्य भर्तृहरेः ग्रन्थाः तावत्-

1. *महाभाष्यदीपिका*
2. *वाक्यपदीयम्* (त्रीणि काण्डानि)
3.. *वाक्यपदीयम्* (*स्वोपज्ञटीका*)

---

134 प. म. न. की. व्या. में. कै. औ. शि. का. तु. अ., पृ. 11

4.. *भट्टिकाव्यम्*

5.. *भागवृत्तिः*

6.. *शतकत्रयम्* (नीति-शृङ्गार-वैराग्यात्मकम्)

7.. *मीमांसाभाष्यम्*

8.. *वेदान्तसूत्रवृत्तिः*

9.. *शब्दधातुसमीक्षा*

10.. *षष्ठीश्रावी*

एतेषु *महाभाष्यदीपिकाया*ः, *वाक्यपदीयस्य*, तस्य च *स्वोपज्ञटीका* इत्येतेषां कर्ता किम् एकः एव भर्तृहरिः इति प्रश्नः उदेति। तदा उच्यते, तेषां कर्ता एक एव भर्तृहरिः। तत्र तावत् प्रमाणम्- *महाभाष्यदीपिका*याम् उल्लिखितम्- "यथैव गतं गोत्वमेदमिङ्गितादयोऽप्यर्थतः महिष्यादिषु दृष्टं व्युत्पत्त्यापि कर्मण्याश्रीयमाणो गमिवत्, विशेषणं दुरन्व्याख्यानम्, उपाददानो गच्छति गर्जति गति वा गौरिति।"[135]

वाक्यपदीये -

कैश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः।
गवतेर्गदतेर्वापि गौरित्यत्र दर्शितम्।।[136]

*वाक्यपदीयस्वोपज्ञटीका*याम्- "यथैव गमिक्रिया जात्यन्तरैकसमवायि-नीभ्यो गमिक्रियाभ्योऽत्यन्तभिन्ना तुल्यरूपत्वविधौ त्वन्तरेणैव यमभिधीयमाना गौरिति

135 सं. व्या. शा. का. इ., प्र. भा., पृ. 339

136 वा. प., वा., कारि. 175, पृ. 256

शब्दव्युत्पत्तिकर्मणि निमित्तत्वेनाश्रीयते।"[137] भर्तृहरेः अन्यग्रन्थानां विषये अत्रालोचना न विधीयते प्रबन्धभारभिया।

तस्य महात्मनः जन्मकालः विवादग्रस्तः। केचन विद्वांसः तं भर्तृहरिं महाराजविक्रमादित्यसहोदरं मन्यन्ते। विक्रमादित्यस्य कालः 66 ईसवीयवर्षः, तेन 60 ईसवीयवर्षतः 70 ईसवीयवर्षपर्यन्तकालः भर्तृहरिकालः स्यात्। परन्तु तद्दृढप्रमाणं नास्ति। एवञ्च अन्ततः भर्तृहरेः कालः चन्द्रगुप्तद्वितीयसमकालिक-वाग्भट्टात् पूर्ववर्ती कालः इति विक्रम 400 वर्षेभ्यः अर्वाचीनस्तु भवितुं नार्हति इति रामप्रकाशः ब्रूते तद्ग्रन्थे।[138]

### 1.4.2.2. *महाभाष्यप्रदीपः*

*महाभाष्य*टीकाग्रन्थेषु *दीपिका*याः परं *प्रदीप*व्याख्यानस्य माहात्म्यं गृह्यते। अस्याः *प्रदीप*व्याख्यायाः कर्ता कैयटः। कश्मीरप्रदेशीयः सः जैयटपुत्रः महेश्वरशिष्यः आसीत्। *महाभाष्यस्य* प्रत्येकम् अध्यायस्य अन्ते तत्परिचयः प्राप्यते।[139] विभिन्नग्रन्थपरिशीलनेन तस्य कालः 11 विक्रमशतकोत्तरार्धः इति विभावयितुं शक्यते। स तु ग्रन्थारम्भे कथितवान् यत् भर्तृहरिनिबद्धसाररूपग्रन्थसेतोः आश्रयेण रचितवान् *प्रदीप*व्याख्याम्। तथा चोक्तम्-

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना।

---

137 वा. प., वा., स्वोपज्ञ., कारि. 175

138 प. म. न. की. व्या. में. कै. औ. शि. का. तु. अ., पृ. 12

139 इत्युपाध्यायजैयटपुत्रकैयटकृते *महाभाष्यप्रदीपे*। म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 147, 281, 407, 543, 716, ......

क्रममाणः शनैः पारं तस्य प्राप्तास्मि पङगुवत्।।[140]

वस्तुतः कैयटस्य अभिप्रायः अस्ति यत् साररूपग्रन्थसेतुः इत्यस्य अर्थः अस्ति भर्तृहरिविरचितं *वाक्यपदीयम्, प्रकीर्णकाण्डं* चेति। कैयटः सम्पूर्ण*प्रदीप*-व्याख्यायाम् एकस्मिन्नेव स्थाने भर्तृहरिविरचितायाः *महाभाष्यदीपिका*-टीकायाः नाम उल्लिखितवान्। *दीपिका* इति पाठः कुत्रापि नास्ति। किन्तु *वाक्यपदीयस्य* तथा *प्रकीर्णकाण्डस्य* पाठः बहुत्र अस्ति। अस्य ग्रन्थस्य अध्ययनेन कैयटस्य व्याकरणपाण्डित्यं स्पष्टं ज्ञायते। व्याकरणस्य गूढतत्त्वस्य प्रकाशः अस्यां *प्रदीप*टीकायां निहितः अस्ति। *प्रदीपं* विना *महाभाष्यस्य* अवगमः दूरूहः। केचन विद्वांसः तु *महाभाष्यस्य* व्याख्याग्रन्थम् अलिखित्वा *प्रदीपस्यैव* उपरि व्याख्यां लिखितवन्तः यथा रामचन्द्रसरस्वतीकृत*लघुविवरणम्,* ईश्वरानन्द-सरस्वतीकृत-*बृहद्विवरणम्,* अन्नंभट्टकृ*तोद्योतनम्,* नारायण-शस्त्रीकृत-*प्रदीपविवरणम्* इत्यादयः व्याख्याग्रन्थाः लिखिताः सन्ति।[141]

कैयटः *महाभाष्य*कारकृतसूत्रात्मकरहस्य व्यासशैल्या उद्घाटनम् अकार्षीत्। “येन उच्चारितेन सास्नालाङ्गूल” इत्यत्रत्यः *प्रदीप*ग्रन्थः द्रष्टव्यः।[142] *भाष्य*व्याख्यानकाले यावन्तः विकल्पपक्षाः सम्भवन्ति, तत्सर्वम् उपस्थापयितुं प्रयत्नं विहितवान्। यथा- “तत्र लौकिकास्तावद्गौरश्वः, पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण

140 तदेव, पृ. 4

141 प. का. व्या. द., पृ. 32

142 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 17

इति। वैदिकाः खल्वपि-”।[143] पूर्ववर्तिनाम् आचार्याणां सविनयं समालोचना विहिता। केषाञ्चित् मतानां खण्डनमपि विहितम्। “सिद्धे शब्दार्थसम्बन्धे” (वा. 1) इत्यत्र व्याडेः मतं खण्डितम्।[144] ‘एङ् प्राचां देशे’[145] इत्यत्र वृत्तिकारकुणेः मतं खण्डितम्। इत्येवं कैयट*भाष्यप्रदीप*विषयविमर्शः समासेन प्रस्तुतः।

### 1.4.2.3. *प्रदीपोद्द्योतः*

तत्र *प्रदीप*व्याख्यासु महत्स्थानम् अलंकरोति *प्रदीपोद्द्योत*व्याख्या। अस्याः कर्ता नागेशमहाभागः। नागेशदेशकालकृतिपरिचयस्य विस्तृतं विवरणं परस्मिन्नध्याये करिष्यते, अतोऽत्र नालोच्यते। *प्रदीपोद्द्योत*टीकायाः अपरं नाम *विवरणम्*। ग्रन्थः अयं महाभाष्यानुसारी अस्ति। केवलं *महाभाष्य*स्य व्याख्या तु *भाष्यप्रदीपा*ध्ययनेन सम्भवति। परन्तु *महाभाष्ये* केषुचित् स्थलेषु अस्पष्टता अस्ति, येषां सोदाहरणं परिष्कारः *प्रदीपोद्द्योते* अस्ति इत्यस्ति तट्टीकायाः माहात्म्यम्। अस्याः *प्रदीपोद्द्योत*व्याख्यायाः अध्ययनेन इदम् अवश्यं प्रतीतं भवति यत् नागेशः व्याकरणांशं विहाय अपि दार्शनिकचिन्ताम् अकार्षीत्।

**इदमत्रावधेयम्-** नागेशः न केवलं कैयट*प्रदीप*स्य व्याख्याम् अकृत, अपि तु बहुत्र *महाभाष्यो*परि व्याख्यानम् अकरोत्। *महाभाष्य*स्य यथार्थज्ञानाय यथैव कैयटस्य माहात्म्यम् अनस्वीकार्यम्, तथैव नागेशस्य।

---

143 तत्रैव

144 तदेव, पृ. 76

145 पा. सू. 1.1.75

### 1.4.2.4. *शब्दकौस्तुभः*

नागेशात् परम् अस्ति श्रीमद्भट्टोजिदीक्षितः यः *महाभाष्य*व्याख्यां रचितवान्। लक्ष्मीधरपुत्रस्य रङ्गोजिभट्टभ्रातुः च अस्य महाराष्ट्रीयब्राह्मणस्य जन्मकालः अपि विवादग्रस्तः। बहुषु मतेषु सत्स्वपि 1570 विक्रमसंवत्सरतः - 1650 विक्रमसंवत्सरपर्यन्तः कालः भट्टोजिदीक्षितस्य इति युधिष्ठिरमीमांसकमतम् अधिकं ग्राह्यम्। तेन रचितस्य ग्रन्थस्य नाम अस्ति *शब्दकौस्तुभः* इति। न केवलं अयं ग्रन्थः *महाभाष्य*स्य टीकाग्रन्थः अपि तु स्वमाहात्म्याद् अयं पृथग् एव कश्चिद् श्रेष्ठः ग्रन्थः। *महाभाष्य*स्य विषयविभागशैली आश्रिता चेदपि प्रत्येकं पङ्क्तेः व्याख्यानं तु नैव कृतम्। अपि तु *दीपिका*याः तथा *वाक्यपदीय*स्य अपि साहाय्यं गृहीतम्। एवञ्च स्ववैशिष्ट्यकारणादेव युधिष्ठिरः मीमासंकः *शब्दकौस्तुभम्* *अष्टाध्यायी*वृत्तिग्रन्थं मन्यते।[146] *महाभाष्या*नुसारिणी इयं टीका अस्ति इति हेतोः *महाभाष्य*टीकाग्रन्थेषु अस्याः परिगणं क्रियते इति डॉ. वर्मामहोदयः वदति।[147] इयं टीका तु सम्पूर्णतया नोपलभ्यते।

### 1.4.2.5. *अष्टाध्यायीभाष्यम्*

स्वामी दयानन्दसरस्वती *महाभाष्य*स्य व्याख्याग्रन्थं लिखितवान् *अष्टाध्यायी*भाष्यम् इति नाम्ना। वस्तुतः *अष्टाध्यायी*स्थसूत्राणां व्याख्यानं कृतं

146 सं. व्या. शा. का. इ., प्र. भा., पृ. 448

147 प. का. व्या. द., पृ. 33

किन्तु *महाभाष्यस्य* सारः अपि निवेशितः। सूत्राणां व्याख्यासु भाष्यशैली आश्रिता अस्ति। तस्माद् इयमपि *महाभाष्यस्य* टीका इति डॉ. वर्मामहोदयः वदति।

### 1.4.2.6. *प्राणपणावृत्तिः*

*महाभाष्यम्* आधारीकृत्य पुरुषोत्तमदेवः *प्राणपणाख्यां* काञ्चित् लघुवृत्तिम् अलिखत्। मणिकण्ठः तु वृत्तेः नाम *प्राणपणितः* इति वदति। अस्याः वृत्तेः प्रथमपरिचयः तावत् दिनेशचन्द्रभट्टाचार्येण कारितः। ऐतिहासिकैः अश्-हश्-बश्-झश्-जश्-पुनर्वश्[148] इति पुरुषोत्तमदेवकृतात् पुनः इति प्रयोगाद् अयं बङ्गदेशीयः इति अनुमीयते। पुरुषोत्तमदेवकृत*भाष्यवृत्तेः* व्याख्याता शङ्करपण्डितः ब्रूते-

"अथ भाष्यवृत्तिव्याचिख्यासुर्देवो विघ्नविनाशाय सदाचारपरिप्राप्तमिष्ट-देवतानतिस्वरूपं मङ्गलमाचचार।" तत्पद्यं यथा-

नमो बुधाय बुद्धाय यथात्रिमुनिलक्षणम्।
विधीयते प्राणपणा भाषायां लघुवृत्तिका।....इतिदेव....।[149]

पुरुषोत्तमदेवः कुत्रचिद् देवः इति नाम्ना अपि अभिधीयते। तस्य जन्मकालः विवादग्रस्तः। 1174 विक्रमसंवत्सरः लक्ष्मणसेनकालः तत्कालः मन्यते ऐतिहासिकैः। एवं पुरुषोत्तमदेवेन *महाभाष्यस्य* तथा *अष्टाध्याय्याः* व्याख्यानां मङ्गलश्लोके भगवतः बुद्धस्य नमस्कारः क्रियते। *भाषावृत्तिं* विना अन्यत्रापि बौद्धदर्शनं प्रति तथा महाबोधिं प्रति तस्य समादारः सूचितः अस्ति। अतः

---

148 भाषा. वृ., पृ. 1

149 नमो बुधाय बुद्धाय.........म. भा.। नमो बुद्धाय........भाषा. वृ.।

बौद्धधर्मानुयायी आसीत् पुरुषोत्तमदेवः इति निश्चितः।[150] सन्ति अपरे अपि ग्रन्थाः तस्य, *कुण्डलीव्याख्यान- कारककारिका- भाषावृत्ति- परिभाषावृत्ति- दुर्घटवृत्ति- परिभाषावृत्ति ज्ञापकसमुच्चय- उणादिवृत्ति- कारकचक्राख्याः*। पुरुषोत्तमदेवः बङ्गीयवैयाकरणेषु प्रामाणिकत्वेन गण्यते इत्यस्ति तस्य वैशिष्ट्यम्।

### 1.4.2.7. *चिन्तामणिः*

पण्डितः धनेश्वरः *महाभाष्यस्य चिन्तामणि*नाम्नीं टीकाम् अलेखीत्। अयं धनेश्वरः धनेशः अपि उच्यते। *चिन्तामणिं* विहाय *प्रक्रियारत्नमणि*नामानं व्याकरणग्रन्थं व्यरचयत्। अस्याः अडियारपुस्तकालये प्रतिलिपिः लभ्यते। *महाभाष्यस्य चिन्तामणि*टीकायाः उल्लेखः गुरुपदहालदारमहोदयेन अपि कृतः।[151] धनेश्वरः बोपदेवस्य गुरुः आसीत्। धनेशः अस्य नामान्तरम्। वोपदेवस्य कालः विक्रम 13 शतकोत्तरार्धभागः, अतः धनेश्वरस्य कालः विक्रम 13 शतकमध्यवर्तीभागः भवितुम् अर्हति।

### 1.4.2.8. *सूक्तिरत्नाकरः*

शेषवंशावतंशः शेषनारायणः *महाभाष्यस्य सूक्तिरत्नाकर*नाम्नीं प्रौढव्याख्याम् अलेखीत्। बहुषु पुस्तकालयेषु अस्य ग्रन्थस्य हस्तलेखः प्राप्यते। राजकीयप्राच्यशोधहस्तलेखपुस्तकालये बडोदास्थिते अस्याः व्याख्यायाः कश्चिद्

---

150 सं. व्या. शा. का. इ., प्र. भा., पृ. 372-375

151 व्या. द. इ., पृ. 457

हस्तलेखः फिरिंदाप-भट्टकृत*महाभाष्य*टीकानाम्ना विद्यमानः अस्ति।[152] बौधायन-श्रौतसर्वस्व-बौधायनाग्निष्टोमप्रयोगादिग्रन्थान् अलेखीत्। तस्य विदुषः पितुः नाम वासुदेवदीक्षितः, पितामहस्य च नाम अनन्तदीक्षितः आसीत्। आनुमानिकः 1500 विक्रमसंवत्सरः शेषनारायणजन्मकालः मन्यते।[153]

### 1.4.2.9. *क्षीरोदः*

विष्णुमिश्राख्यः कश्चिद् वैयाकरणः *महाभाष्यस्य* टीकां लिखितवान् *क्षीरोद*नाम्ना। अस्य ग्रन्थस्य उल्लेखः शिवरामेन्द्र-सरस्वती-विरचित-*महाभाष्य*-टीकायां[154] तथा श्रीमद्भट्टोजिदीक्षितस्य *शब्दकौस्तुभे*[155] प्राप्यते। तद्भिन्न-स्थले तु न वा विष्णुमित्रस्य उल्लेखः नापि वा *क्षीरोदस्य* उल्लेखः लभ्यते। अतः तस्य कालनिर्धारणं दुष्करम्। भट्टोजिदीक्षितस्य कालः 1550 ईसवीयवर्षतः - 1650 ईसवीयवर्षपर्यन्तः। तस्मात् तत्समीपवर्ती कालः विष्णुमित्रस्य स्यादिति विभाव्यते।

### 1.4.2.10. *भाष्यतत्त्वविवेकः*

नीलकण्ठवाजपेयीमहाभागः *महाभाष्यस्य* काञ्चित् टीकां निर्मितवान्। तस्याः नाम *भाष्यतत्त्वविवेकः* इति। अस्याः टीकायाः हस्तलेखः मद्रासराजकीय-हस्तलेखपुस्तकालयस्य सूचिपत्रस्य द्वितीयभागस्य प्रथमखण्डे लभ्यते। अस्याः

---

152 सं. व्या. शा. का. इ., प्र. भा., पृ. 377

153 तदेव, पृ. 378

154 तदिदं सर्वं क्षीरोदाख्ये त्रैलिंगतार्किकविष्णुमिश्रविरचितमहाभाष्यटिप्पण्यां स्पष्टम्। सं. व्या. शा. का. इ., प्र. भा., पृ. 382

155 हयवरट् सूत्रे क्षीरोदकारोऽप्याह। श. कौ. 1.1.8

टीकायाः अन्ते च नीलकण्ठयज्वा इति टीकाकर्तृनाम लिखितम् अस्ति। असौ महाभागः *तत्त्वबोधिनी*कारज्ञानेन्द्रसरस्वत्याः शिष्यः बभूव।

नीलकण्ठवाजपेयीमहोदयः *सिद्धान्तकौमुद्याः सुखबोधिनी*व्याख्यायाः प्रारम्भे स्वपरिचयं कारयति-

पदवाक्यप्रमाणानां पारगं विबुधोत्तमम्।

रामचन्द्रमहेन्द्राख्यं पितामहमहं भजे।

आत्रेयाब्धिकलानिधिः कविबुधालंकारचूडामणिः

तातः श्रीवरदेश्वरो मखिवरो योऽयष्ट देवान् मखैः।

अध्यैष्टाप्पयदीक्षितार्यतनयात् तन्त्राणि काश्यां पुनः।[156]

एवञ्च नीलकण्ठस्य पितुः नाम वरदेश्वरः, पितामहस्य नाम रामचन्द्रः। सः ज्ञानेन्द्रसरस्वतीतः विद्याग्रहणम् अकृत। तस्य अपरे अपि ग्रन्थाः सन्ति। यथा- *पाणिनीयदीपिका*, *परिभाषावृत्तिः*, *सिद्धान्तकौमद्याः सुबोधिनी*टीका, *तत्त्वबोधिनी-व्याख्यानगूढार्थदीपिका*। सः भट्टोजिदीक्षितसमकालिकः स्यात् अथवा ज्ञानेन्द्र-सरस्वतीसमकालिकः स्याद् इति विचिन्त्य तस्य कालः 1600 विक्रमसंवत्सरतः - 1675 विक्रमसंवत्सरपर्यन्तः भाव्यते।[157]

---

156 रामचन्द्रमहेन्द्राख्यं पितामहमहं भजे। आत्रेयाल्लब्धिकलानिधिः कविबुधाङ्ककारचूडामणिः। तातः श्रीवरदेश्वरो मरिववरो योऽयष्ट देवान् मखैः। सि. कौ., सुबो., प्रा.

157 सं. व्या. शा. का. इ., प्र. भा., पृ. 383

### 1.4.2.11. *सिद्धान्तरत्नप्रकाशः*

शिवरामेन्द्रसरस्वत्या सम्पूर्ण*महाभाष्य*माधारीकृत्य *महाभाष्यरत्नाकरः सिद्धान्तरत्नप्रकाशः* वा इति काचिद् व्याख्या लिखिता सरलभाषया सुबोधशैल्या च। अस्य अध्ययनेन *महाभाष्यस्य* अध्येतॄणां महान् उपकारः भवति।

अत्र *सिद्धान्तरत्नप्रकाशे* बहुषु स्थलेषु कैयटस्य खण्डनं कृतम्। वस्तुतः भर्तृहरेः मतानि अपि कानिचित् खण्डितानि सन्ति। यतो हि *प्रदीप*व्याख्यानस्य आधारः भवति भर्तृहरिकृतः *महाभाष्यदीपिका वाक्यपदीय*ग्रन्थश्च। कदाचिच्च साक्षादेव खण्डनं क्रियते। कदाचिच्च परम्परोच्छेदं कृत्वा स्वमतं स्थापितम् नूतनरीत्या। तस्य विषयप्रतिपादनशैली अत्यन्तं प्रौढा।

ग्रन्थकारस्तु कमपि परिचयं न दत्तवान्, तेन तस्य विषये देशकालपरिचयादिकं किमपि न ज्ञायते। *मयूखमाला* इति व्याकरणग्रन्थः अपि तस्य कृतिः। सः हरिहरेन्द्रसरस्वतीमहाभागस्य शिष्यः आसीत् इति विज्ञायते।[158]

### 1.4.2.12. *विद्वन्मुखभूषणम्*

प्रयागवेङ्कटाद्रिः इति नाम्ना कश्चित् पण्डितः *महाभाष्यो*परि *विद्वन्मुखभूषणनाम्नीं* टिप्पणीं विरचयामास। अस्य कश्चिद् हस्तलेखः मद्रासराजकीयपुस्तकालयस्य सूचिपत्रस्य द्वितीयभागे षोडशखण्डे प्राप्यते। अपरः कश्चिद् हस्तलेखः अडियारपुस्तकालये अस्ति। तस्य सूचिपत्रे द्वितीयखण्डस्य 74

---

158 श्रीमत्परमहंसपरिब्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचित-महाभाष्यसिद्धान्तरत्नप्रकाशे। सि. र., अ.

पृष्ठायां *विद्वन्मुखमण्डनम्* इति नाम लिखितम् अस्ति।[159] एतस्य विदुषः देशकालौ उभावपि अज्ञातौ।

### 1.4.2.13. अन्यटीकाग्रन्थाः

पूर्वोल्लिखितटीकाः विहाय अपि काश्चन टीकाः सन्ति। तासां च नाम्नैव परिचयः कार्यते। *महाभाष्य*टीकापरम्परायां तत्र तिरुमलयज्वा *अनुपदा*नाम्नीं *महाभाष्य*टीकां लिलेख। वासुदेवः अभ्यङ्करशास्त्रीमहोदयः मराठीभाषायां *महाभाष्य*टीकां लिखितवान्। मधुसूदनमिश्रेण व्याख्यातं *महाभाष्यं* तथा *प्रदीप*व्याख्यायाः अनुवादश्च चौखम्बा संस्कृत सिरीजतः प्रकाशितः। चारुदेवमहोदयस्यापि नवाह्निकं यावत् हिन्दीव्याख्या अस्ति *महाभाष्य*स्य। श्रीरुद्रधरझामहोदयः तस्य *तत्त्वालोक*ग्रन्थे *महाभाष्यप्रदीप*स्य तथा *प्रदीपोद्द्योत*स्य च व्याख्यानं कृतवान्। युधिष्ठिरमीमांसकः अपि *महाभाष्यं* सम्यक् व्याख्यातवान्। तेषाम् अध्ययनेन *महाभाष्य*स्य अवगमनं सहजतया सम्भवति।

इतः अपि सन्ति नैकाः टीकाः *महाभाष्य*स्य। मैत्रेयस्य अज्ञातनामा कश्चिद्ग्रन्थः अस्ति *महाभाष्य*व्याख्यायाः। शेषविष्णोः *महाभाष्यप्रकाशिका*, गोपालकृष्णशास्त्रिणः *शाब्दिकचिन्तामणिः*, नारायणभट्टस्य *भाष्यविवरणम्*, सर्वेश्वरदीक्षितस्य *महाभाष्यस्फूर्तिः*, राजन्सिंहकृत*शब्दबृहती*, नारायणविरचित-

159 सं. व्या. शा. का. इ., प्र. भा., पृ. 383-385

*महाभाष्यविवरणम्,* सदाशिवकृत*महाभाष्यगूढार्थदीपिनी,* छलारीनरसिंहाचार्यविरचित-*शाब्दिककण्ठमणिः* इत्येतेषां *महाभाष्य*व्याख्यानानां परिचयः प्राप्यते।[160]

## 1.5. उपसंहृतिः

त्रिमुनिव्याकरणपरम्परायां त्रिषु मुनिषु अन्तिमस्थानीयः असौ पतञ्जलिः। अयं पतञ्जलिः पाणिनीयव्याकरणपरम्परायां प्रमाणभूतः आचार्यः अस्ति। नानाग्रन्थेषु अस्य आचार्यस्य गोनर्दीय-गोणिकापुत्र-अहिपति-नागनाथ-फणिभृत्-शेषाहि-शेषराज-नागनाथ-चूर्णिकार-पदकारप्रभृतिनामान्तराणि उपलभ्यन्ते। यद्यपि अस्य आचार्यस्य विषये कालनिर्णयः स्पष्टं न ज्ञायते। तथापि असौ पुष्यमित्रसमकालिकः इति मन्यते। तस्माद् आनुमानिकः कालः भवति 150 ईसवीयपूर्ववर्षः। मातुः नाम गोणिका आसीत्, जन्मस्थानं गोनर्ददेशः।

अस्य आचार्यस्य न केवलं *महाभाष्यं* इति ग्रन्थः अस्ति अपि तु *योगसूत्रं, निदानसूत्रं, महानन्दकाव्यं, चक्रपाणिपरिष्कारः, सिद्धान्तसारावली, कोषः, सांख्यशास्त्रं, साहित्यशास्त्रं, लोहशास्त्रम्* इत्येते ग्रन्थाः अपि सन्ति। अत्र ते समासेन आलोचिताः सन्ति। *महाभाष्यं* तु वैयाकरणसंसारे सम्पत्तिः अस्ति।

*महाभाष्यं* संस्कृतनिकाये विषयभाषाशैलीदृष्ट्या मुख्यस्थानं लभते। अत्र *महाभाष्ये* पाणिनीयसूत्राणि, परं कात्यायनवार्त्तिकानि समुल्लिखितानि परं पतञ्जलेः अभीष्टानि वाक्यानि अपि समायोजितानि सन्ति प्रयोजनानुसारेण।

---

160 प. का. व्या. द., पृ. 36

## *महाभाष्य*परिचयः

*महाभाष्यं* विभक्तम् आह्निकेषु। *महाभाष्यस्य* 85 आह्निकानि पतञ्जलिना तच्छिष्येभ्यः पाठितानि यानि 85 दिनानां पाठाः आसन्। अह्ना अह्नि वा निर्वृत्तम् इति आह्निकशब्दः तत्समर्थयति। पूर्वेषाम् आचार्याणां ग्रन्थानाम् दीर्घाध्ययनात् परमेव ग्रन्थस्यास्य निर्माणम् आचार्यः अकार्षीत्। तस्मात् सर्वे अंशाः प्रस्तुताः सन्ति। असौ ग्रन्थः समीक्षात्मकः निरूपणात्मकः च भवति, येन केवलं भाष्यशैल्या निर्मितः सामान्योऽयं ग्रन्थः इति न ग्राह्यम्, अपि तु असौ ग्रन्थः कश्चित् सम्पूर्णवैज्ञानिकः ग्रन्थः। अतः *महाभाष्यं* दार्शनिकग्रन्थेषु परिगणितं भवति। कुत्रचित् (अन्यथासिद्धे सति) सूत्रपरिहारकाले स एवं कथयति- 'सिद्ध्यत्येवमपाणिनीयं तु भवति' इत्येवंरूपेण तस्य परिहारः कृतः। वस्तुतः पतञ्जलेः अनुसारेण इदं कथयितुं शक्यते यत्- पाणिनेः सूत्राणाम् रचना परमवैज्ञानिकी सूक्ष्मा चास्ति। पतञ्जलिना तस्य सूत्रार्थस्पष्टीकरणाय पाणिनिकौशलम् अस्मद्गोचरीकृतम्। अतः पाणिनेः सूत्राणां कुत्रचिद् अशुद्धत्वम् अस्ति इति तु कथयितुं न शक्यते।[161] पाणिनिं प्रति एनाम् श्रद्धां दृष्ट्वा बहवः आचार्याः ब्रुवते यत्, अयमाचार्यः पाणिनिसमर्थकः सन्नपि कात्यायनविरोधी। परन्तु इदम् कथनं ग्राह्यं नास्ति, यतो हि मूलतः अष्टाध्याय्याः उपरि स्वभाष्यं लिखितवान् तदा तस्मिन् प्रसङ्गे कात्यायनस्य आक्षेपपरकवार्त्तिकानां खण्डनम् अकृत।

---

161 प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनात्यानर्थकेन भवितुं किम् इयत्ता सूत्रेण। म. भा. 1.1.1

पुनश्च *महाभाष्यस्य* अध्ययनेन प्रतीयते यत् *महाभाष्ये* नैकानि पाणिनीयसूत्राणि सन्ति। किन्तु पतञ्जलिः पाणिनिविषये न तथा प्रोक्तवान्। अत एव *महाभाष्यं* वार्त्तिकानि आदाय लिखितम् न तु पाणिनीयसूत्राणि गृहीत्वा इति केषाञ्चिद्विदुषाम् अभिप्रायः अस्ति। वैयाकरणसम्प्रदाये भाष्यशब्दस्य स्थाने महाभाष्यशब्दस्य व्यवहारो भवति। दीर्घसमासस्य व्यवहारः पतञ्जलिना न तथा विहितः। अल्पसमासयुक्त-वाक्यानां प्रयोगे सः पटुः इति दृश्यते। एतच्च पतञ्जलेः भाषासामर्थ्यं सूचयति। कुत्रापि शब्दभारः अनवावश्यकः न दृश्यते। *महाभाष्यस्य* बहुवारं पठनपाठनोच्छेदे सत्यपि सम्प्रति उपलभ्यमान-महाभाष्याध्ययनेन इदं स्पष्टं प्रतीतं भवति यत्, न केवलं व्याकरणशास्त्रस्य अयं प्रामाणिकग्रन्थः अपि तु अखिलविद्यानाम् अयम् आकरग्रन्थः अस्ति। तस्मादेव भर्तृहरिः कथयाम्बभूव-

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां *महाभाष्ये* निबन्धने।। इति[162]

अन्ते च पतञ्जलेः कृतयः आलोचिताः। पुनश्च *महाभाष्यस्य* प्रसिद्धा-प्रसिद्धटीकानां विषये समासेन परिचयः प्रदत्तः। इत्येवं *महाभाष्यपरिचयाख्यः* प्रथमः अध्यायः संक्षेपेण सविमर्शम् आलोचितः इति शिवम्।

---

162 वा. प. 2.486

# द्वितीयोऽध्यायः

# *ज्ञापकसंग्रह*कर्तृत्वविचारः

## 2.1. उपोद्घातः

व्याकरणसाहित्यालंकारधर्मशास्त्रसांख्ययोगपूर्वोत्तरमीमांसाज्योतिषादिविषयनिष्णातस्य नागेशस्य वैयाकरणसंसारे भर्तृहरेः परं प्रामाणिकत्वं गण्यते। प्रसिद्धिरस्ति यत्- नागेशभट्टः *महाभाष्यस्य* अष्टादशवारमध्ययनमकार्षीद्गुरोर्मुखात्। वेदोपकारिषु सकलवेदाङ्गेषु मुख्यस्थानीयव्याकरणस्यास्ति माहात्म्यम्। ऐन्द्रादिषु श्रीकात्यायन-पतञ्जल्युपबृंहितं पाणिनिमुनिकृतं शशिशोभितशेखराच्छिवाजानेः श्रीशङ्करादागतं व्याकरणं प्रधानतममिति नास्ति संदेहलेशः। सोऽयं विदुषाम् अग्रणीः सर्वतन्त्रस्वन्त्रः सुक्षत्रियैः धर्मप्रचारं कृत्वा अखिलशास्त्रेषु नैकान् ग्रन्थान् रचयित्वा शताधिकान् सर्वशास्त्रपारङ्गतान् सुशिष्यान् सम्पाद्य परमवार्धके काश्यामेव मुक्तिं लेभे। सफलीचकार च एनं श्लोकम्-

असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यामेव वासः सतां सङ्गः गङ्गाम्भः शम्भुपूजनम्।।[163]

'*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा' इति शीर्षकस्य मे प्रस्तुतशोधप्रबन्धस्य '*ज्ञापकसंग्रह*कर्तृत्वविचारः' इत्याख्ये अस्मिन् द्वितीयाध्याये *परिभाषेन्दुशेखर-लघुमञ्जूषा-शब्देन्दुशेखर-प्रदीपोद्योता*दिकर्ता यः नागेशः स एव

---

163 प. भा. शे., त. भू., भू., पृ. 7

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

नागेशः *ज्ञापकसंग्रह*स्यापि कर्ता अस्ति नवेति विचारयिष्यते यथाशक्ति सयुक्तिसोपलभ्यमानप्रमाणं च।

पाणिनीयव्याकरणस्य विकासपरम्परा परिलक्ष्यते चेत् सूत्रपरम्परा, वृत्तिपरम्परा, वार्त्तिकपरम्परा, भाष्यपरम्परा, दर्शनपरम्परा, प्रक्रियापरम्परा, सिद्धान्त-परम्परा, व्यवहारपरम्परा, अभिधानपरम्परा, अनुवादपरम्परा, पारायणपरम्परा, आधुनिकपरम्परा चेति द्वादशप्रकारिका परम्परापि विज्ञायते।

अस्मिन् शोधप्रबन्धे ताः परम्पराः नैव आलोच्यन्ते। अपि तु शोधप्रबन्धप्रसङ्गाद् भिन्नः कश्चित् क्रमः अत्र आश्रीयते। तथा च पाणिनीयव्याकरणस्य अध्ययनस्य अध्यापनस्य वा धारात्रयं नितान्तं वहमानं वर्तते। ते च क्रमास्तावत्-

1) *अष्टाध्यायी*क्रमः

2) प्रक्रियाक्रमः

3) दार्शनिकक्रमः

अधुना एषां क्रमाणां क्रमशः सामान्यं परिचयः दीयते-

### 2.1.1. *अष्टाध्यायी*क्रमः

मम प्रतिपाद्येषु त्रिषु क्रमेषु प्रथमक्रमो हि *अष्टाध्यायी*क्रमः इति। पाणिनेः पूर्वं व्याकरणस्य कतिचन नियमाः सूत्रात्मकत्वेन आसन्। तथापि पाणिनेः

# द्वितीयोऽध्यायः

*अष्टाध्यायी* सूत्रात्मकपरम्परायां मुख्यग्रन्थरूपेण आद्रियते। सूत्रमेव लक्षणं[164], योगः इति कथ्यते। सूत्रं किमिति चेत्, पाराशरोपपुराणस्य अष्टादशाध्याये उच्यते-

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।[165]

ततः परम् अस्याः सूत्रात्मकशैल्याः प्रयोगः कात्यायननागेशानां *वार्त्तिकपरिभाषेन्दुशेखरा*दिग्रन्थेषु दृश्यते। सूत्रं तावद् षड्विधं भवति संज्ञापरिभाषा-विधिनियमातिदेशाधिकारात्मकम्। क्वचिद् दशविधम् अपि स्वीक्रियते तथा च-

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।
प्रतिषेधोऽनुवादश्च विभाषा च निपातनम्।
एतच्चतुष्टयं क्षिप्त्वा दशधा सूत्रलक्षणम्।।[166]

यद्यपि ग्रन्थस्य व्याख्यानमेव वृत्तिस्तथापि वृत्तिव्याख्यानयोर्भेदः स्पष्टः। व्याख्यानं किमिति तत्र *महाभाष्य*कारः अपि कथयति- "न केवलं चर्चापदानि व्याख्यानम्- वृद्धिः आत् ऐज् इति। किं तर्हि। 'उदाहरणम्, प्रत्युदाहरणम्, वाक्याध्याहारः' इत्येतत् समुदितं व्याख्यानं भवति।"[167]

---

164 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 6
165 पारा. पु., अष्टादश., श्लो. 13 -14, पृ. 90
166 ल. सि. कौ., प्र. भा., पृ. 34
167 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 121

**ज्ञापकसंग्रहकर्तृत्वविचारः**

तत्र कथं तावत् सूत्रार्थः करणीयः इत्यस्मिन् विषये वैयाकरणसम्प्रदाये पाराशरोपपुराणप्रोक्तप्रसिद्धश्लोकः अस्ति-

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।

आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्।।[168]

किं नाम व्याकरणम्। अस्याः शङ्कायाः समाधानम्- सूत्रं व्याकरणं, शब्दः व्याकरणम् अनयोः समुदितरूपं वा व्याकरणम् इति पक्षत्रयम् उपस्थापयित्वा अन्ते सूत्रं व्याकरणमिति सिद्धान्तं प्रतिपादयति पतञ्जलिः। तथा चोक्तं तेन- "अथ वा पुनरस्तु सूत्रम्। ननु चोक्तम्। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः इति। नैष दोषः। व्यपदेशिवद्भावेन भविष्यति"[169] इति।

पाणिनीयसूत्रपरम्परा महती विद्यते। संदर्भभारभिया विस्तरशः सूत्रप्रकारः न आलोच्यते। *ज्ञापकसंग्रहे* ज्ञाप्यालोचनवेलायां यानि ज्ञापकसूत्राणि गृहीतानि, तानि पाणिनेः सूत्राणि एव सन्ति, न तु कात्यायनस्य वार्त्तिकानि न वा पतञ्जलेः इष्टयः इति विज्ञेयम्।

## 2.1.2. दार्शनिकक्रमः

द्वितीय-क्रमस्तावत् दार्शनिकक्रमः इति। अस्य च दार्शनिक्रमस्य प्रथमं दर्शनं तावद् वेदादौ अभवत्, ततः प्रातिशाख्यादौ, ततः शिक्षादौ, ततश्च संग्रहे अभवत्। परिपूर्णविकाशः तु *वाक्यपदीये* दृश्यते। *भाष्या*दीनां इष्टीः अर्थात्

168 पारा. पु., अष्टादश., श्लो. 17-18, पृ. 90

169 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 128

## द्वितीयोऽध्यायः

सिद्धान्तवचांसि संगृह्य वसुरातशिष्यः चतुर्थमुनिभर्तृहरिः *वाक्यपदीय*मिति दार्शनिकग्रन्थं रचयामास। स च ग्रन्थः पाणिनीयव्याकरणदार्शनिकग्रन्थेषु अत्यन्तं माहात्म्यम् आवहति। परवर्तिनि काले कौण्डभट्टः, नागेशः प्रभृतयः आचार्याः इमां परम्परां परिवर्धयामासुः। भट्टोजिदीक्षितस्य *कारिकावली*, तस्याः च टीकारूपः कौण्डभट्टविरचितः *वैयाकरणभूषणसारः*, *बृहद्वैयाकरणभूषणं* च, श्रीमद्रामाज्ञापाण्डेय-विरचिता *व्याकरणदर्शनभूमिका*, कपिलदेवस्य *भाषाविज्ञान एवं व्याकरणदर्शन*, सत्यकामवर्मणः *भाषातत्त्व एवं वाक्यपदीय*, रामसुरेशत्रिपाठिनः *संस्कृतव्याकरणदर्शन* इत्यादि सर्वमपि व्याकरणदर्शनमाहात्म्यं प्रकटयति।

अस्याः दार्शनिकधारायाः प्रधानम् आचार्यः यथैव भर्तृहरिः तथैव नागेशभट्टः नागोजिभट्टः वा। अस्य च आचार्यस्य उपनाम काल इति। तथा चोक्तम्- श्री-कालोपनामकशिवभट्टसुत-सतीगर्भज-नागेशभट्ट-विरचित*सिद्धान्तकौमुदी*-व्याख्याने *शब्देन्दुशेखराख्ये* पूर्वार्धं समाप्तम्। उपाध्याय[170] इत्यपि उपनाम तस्य। पितृमातृभक्तः अयमाचार्यः प्रत्येकं ग्रन्थस्य आदौ अन्ते च पित्रोः उल्लेखमकृत। पितुर्नाम शिवभट्टः, मातुश्च नाम सती। *महाभाष्यप्रदीपोद्द्योत*स्य प्रत्येकम् आह्निकस्य अन्ते एवमुल्लेखः लभ्यते। (यथा- इति श्रीशिवभट्टसुतसती-गर्भसंभवनागोजीभट्टेन कृते *भाष्यप्रदीपोद्द्योते* प्रथमस्य प्रथमे आद्यमाह्निकम्।)[171]

---

170 श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागेशभट्टरचिते *लघुशब्देन्दुशेखराख्ये* *सिद्धान्तकौमुदी*व्याख्याने उत्तरार्धं समाप्तम्। वै. सि. कौ., च. भा., पृ. 622

171 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 147

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

*बृहच्छब्देन्दुशेखरे*, *वैयाकरणसिद्धान्तमञ्जूषायां*, *स्फोटवादे*, *परमलघुमञ्जूषायां*, *परिभाषेन्दुशेखरः* इत्यादिषु ग्रन्थेषु तस्य पितृमातृपरिचयः प्राप्यते।

यद्यपि *भूषणाख्ये* ग्रन्थे नैके दार्शनिकविषयाः परमतप्रत्याख्यानाय निरूपिताः बहवः अपेक्षितपदार्थाः च उपेक्षिताः, केचन अपसिद्धान्ताः अपि सिद्धान्तत्वेन उपस्थापिताः, अतः ग्रन्थः अयं शब्दानुशासनसम्मतदार्शनिक-सिद्धान्तपिपासां वैयाकरणानां शाब्दिकानां न दूरीकृतवान्।[172] अतः नागेशः शाब्दिकानां महते उपकाराय मुक्तामञ्जूषाम् इव *वैयाकरणसिद्धान्तबृहन्मञ्जूषां* रचितवान्। सः नागेशः *वाक्यपदीयस्य* दर्शनान्तरीयान् अपसिद्धान्तान् अपास्य *वाक्यपदीयस्थ*निगूढशाब्दिकसिद्धान्तान् स्वप्रतिभया प्रकाशयित्वा सर्वान् दोषान् च दूरीकृत्य व्याकरणशास्त्रस्य दर्शनशास्त्रत्वं प्रतिष्ठापयामास इत्यत्र नास्ति विदुषां विप्रतिपत्तिः। परं परमकारुणिकः नागेशभट्टः *बृहन्मञ्जूषां* संक्षिप्तवान्। तस्याः एव संक्षिप्तः अंशः *लघुमञ्जूषा*। तस्या अपि संक्षिप्ततरः अंशः *परमलघुमञ्जूषा* इति व्यवहारः भवति। इत्यवं नागेशः दार्शनिक्रमे अग्रगण्यः इत्यत्र नास्ति सन्देहलेशः। इदमत्रावधेयं यत्, विद्वद्भिः *ज्ञापकसंग्रहः* इति ग्रन्थः नागेशेन रचितः इत्युच्यते, परन्तु असौ ग्रन्थः शब्दप्रक्रियोपयोगितया प्रक्रियाक्रमे अन्तर्भवति न तु दार्शनिकक्रमे।

---

172 प. ल. म., सम्पा. कालिकाप्रसादः शुक्लः, पृ. 3

## 2.1.3. प्रक्रियाक्रमः

अन्तिक्रमस्तावत् प्रक्रियाक्रमः इति। वामनजयादित्यौ *काशिकावृत्तिम्* अलिखताम्। औरम्भट्टः *व्याकरणदीपिकाम्* अलेखीत्। धरणीधरः *वैयाकरणसर्वस्वं* विरचयामास। भट्टोजिदीक्षितः *शब्दकौस्तुभम्* अलिखत्। दीक्षितः कथयते-

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम्।

विस्तरस्तु यथास्तु दर्शितः *शब्दकौस्तुभे*।।[173]

अन्नंभट्टेन *अन्नंभट्टीया* वृत्तिः लिखिता। सा च *मिताक्षरा* इति आख्यायते। पुनः *पाणिनीयसूत्रलघुवृत्ति*रपि प्राप्यते। निखिलशास्त्रनिष्णातः माधवाचार्यः *धातुवृत्ति*मपि लिखितवान्। रामचन्द्राचार्यः *प्रक्रियाकौमुदीं* लिलेख। *रूपावतारं* लिखितवान् धर्मकीर्तिः। *प्रक्रियाकौमुदी रूपावतारः* च इत्युभयमपि रूपसिद्ध्युपयोगि सूत्रक्रमम् अनुसृत्य प्रवृत्तं तथापि उभयत्र प्रथितलौकिकशब्दसाधनोपयुक्तानि एव सूत्राणि आदृतानि न तु सर्वाणि। इदमेव कारणं *प्रक्रियासर्वस्वम्* इति ग्रन्थनिर्माणे। ग्रन्थोऽयं नारायणभट्टेन विरचितः संज्ञादिविंशतिखण्डैः। अस्यां परम्परायां विरचितः शाब्दिकचक्रचक्रवर्तिना श्रीमद्भट्टोजिदीक्षितेन *वैयाकरणसिद्धान्तकौमुदी*ग्रन्थः सम्पूर्णपाणिनिसूत्रानुसारेण एकमात्ररचितप्रक्रियाग्रन्थः भवति। तथा चोक्तमस्ति वैयाकरणपरम्परायाम्-

कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः।

173 वै. सि. कौ., च. भा., पृ. 379

*ज्ञापकसंग्रहकर्तृत्वविचारः*

कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः।।[174]

वरदराजाचार्यस्य *लघुसिद्धान्तकौमुदी, मध्यसिद्धान्तकौमुदी* च इति ग्रन्थद्वयमपि अस्मिन् क्रमे अन्तर्भवति।

*ज्ञापकसंग्रहाख्यः* प्रकृतग्रन्थः प्रक्रियाक्रमे एव अन्तर्भवति। यतो हि सूत्रार्थस्पष्टीकरणाय एव ज्ञाप्यानाम् उपयोगः भवति, येन पदानां सिद्धिः साधुतां गच्छेत्। चन्द्रकलङ्कान् इव व्याकरणदोषान् प्रक्षालयितुकामः पदवाक्य-प्रमाणपारावारीणः श्रीमद्भट्टोजिदीक्षितः *शब्दकौस्तुभे* विशदीकृतवैयाकरणसिद्धान्तान-नुसृत्य एव शब्दजन्यप्रतीतिप्रकारप्रदर्शिकां *कारिकावलीं* निर्मितवान्। अनन्तरं रङ्गोजिभट्टपुत्रः कौण्डभट्टः तामेव शाब्दिकसिद्धान्तवलीं *कारिकावलीं* विशदयितुं नैयायिकादिपरिशीलितपरिपाटीपुरस्सरं *भूषणाख्यं* सन्दर्भं रचयामास।

इत्येवं शोधप्रबन्धप्रसङ्गाद् अत्र समासेन धारात्रयं प्रतिपादितम्।

## 2.2. नागेशकालदेशकृत्यध्ययनम्

सर्वशास्त्रविदः परमवैयाकरणस्य नागेशस्य पितृमातृपरिचयः स्पष्टम् अस्ति। किन्तु तस्य नागेशस्य जन्मकालः, जन्मस्थानम्, विरचितग्रन्थसंख्या इति विषये अत्यन्तं सन्देहः अस्ति। तादृशं दृढं प्रमाणं किमपि नोलभ्यते येन तेषां विवादग्रस्तानां विषयाणां निष्पत्तिः स्यात्। अत्र मया नागेशस्य गुरुशिष्यपरम्परा अपि आलोच्यते उपलभ्यप्रमाणानि आधारीकृत्य।

---

174 ल. श. शे., पृ. 9

## 2.2.1. नागेशस्य कालपरिचयः

परमप्रामाणिकस्य सर्वशास्त्रनिष्णातस्य नागेशस्य अस्य जीवनवृत्तान्त-विषये मनस्सन्तोषमूलकप्रमाणाभावो नितरां नः सहृदयानां मनसः खेदं जनयति। अद्यावधि प्राप्तेषु संस्कृतग्रन्थेषु तत्कर्तृभिः नागेशस्य इतिवृत्तविषये यावान् यत्नः विहितः, स आनुमानिकः। नागेशस्य न कोऽपि सन्तानः आसीत्, तथा ह्युच्यते *लघुशब्देन्दुशेखर*स्यान्तिमे श्लोके-

शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका।
स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया।।[175]

प्रणम्योऽयं महात्मा प्राणिमात्रं प्रति मुक्तिप्रदायिनि परमपावने काशीक्षेत्रे स्वकीयज्ञानमहिम्नार्जिते उपाध्यायपदवीके विद्वत्कुलसंकुले कालनामकवंशे भगवच्छिवतुल्यशिवभट्टात् साक्षात् सतीतुल्यसतीदेव्याम् 1674 ईसवीयवर्षस्य अर्वाक् पश्चाद्वा जनिमलभत। नासीत् पुत्रोऽस्य, पुत्री तु एकासीत्तस्य। काशीस्थे देवनामककुले तस्या विवाहः समजायत। तस्यैऽन्ते स्वगृहं ददौ दानरूपेण। देवकुलस्थाः गृहमिदं विक्रीय उदयपुराख्ये राजस्थानप्रदेशान्तर्गते भूतपूर्वराज्ये निवसन्ति। कुत्रचित् उच्यते- काश्याः गमनवेलायां सः नागेशः भ्रातुष्पुत्र्यै दत्तं,

175 वै. सि. कौ., च. भा., पृ. 622

## *ज्ञापकसंग्रहक*र्तृत्वविचारः

तद्गृहं सम्प्रत्यपि काश्यामस्ति। भगवदापदेवस्य मीमांसान्यायप्रकाशकर्तुः जन्मनात्मनः सौभाग्यातिशयं निर्वहति कुलमिदम्।[176]

वस्तुतः नागेशस्य जीवनकालोऽज्ञातः। 1772 क्रिस्ताब्दे जयपुराधीशोऽश्वमेधयज्ञमकृत, तस्मिन् नागेशभट्टस्य सश्रद्धं निमन्त्रणमासीत्, परन्तु स*न्यास*कारणात् क्षेत्रनिवासव्रतकारणात् निमन्त्रणं न स्वीचकार। कलियुगे तादृशयागस्य निषिद्धत्वाद् आयोजकस्यापात्रत्वात् च स नागमत्, काशीक्षेत्रसन्यास-व्याजेनेत्यपि लभ्यते। जयपूरं गताः केचित् पण्डिताः तं नागेशं निरादरितुं प्रचक्रमिरे। ततः क्षुब्धः नागेशः काशीं परित्यज्य शृङ्गवेरपुरं गत्वा राज्ञः आश्रयं लब्ध्वा शेषजीवनं तत्रैव यापितवान्। अनेन ज्ञायते यत् शृङ्गवेरपुराधीशस्य स्थितिकाल एव नागेशकालः अनुमातुं शक्यते।[177] प्रसङ्गे अस्मिन् *प्रदीपोद्द्योत*स्य प्रारम्भिकः श्लोकः स्मर्तव्यः-

नागेशभट्टो नागेशभाषितार्थविचक्षणः।<br>
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः।<br>
याचकानां कल्पतरोररिकक्षहुताशनात्।<br>
शृङ्गवेरपुराधीशाद् रामतो लब्धजीविकः।।[178] इति।

---

176 सं. व्या. शा. का. इ., प्र. भा., पृ. 394

177 तदेव, 392

178 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 2

## द्वितीयोऽध्यायः

भानुदत्तकृत*रसमञ्जर्याः* उपरि नागेशभट्टस्य काचिट्टीकास्ति। तस्याः कश्चित् हस्तलेखः इण्डिया अफिस लन्दन् इत्यस्य पुस्तकालये विराजमानः। तस्य लेखनकालः 1769 क्रिस्ताब्दः।[179] नागेशस्य पट्टशिष्य आसीत् वैद्यनाथः, यः *लघुमञ्जूषायाः* *कलाख्यां* टीकां *लघुशब्देन्दुशेखरस्य* *चिदस्थिमालां* च प्रणिनाय। वैद्यनाथपायगुण्डस्य पुत्रः बालशर्मा नागेशभट्टस्य शिष्य आसीत्। यस्य *मिताक्षराया* *बालभट्टी* व्याख्यातीव प्रसिद्धा। हैनरी टामस कोलब्रुकमहोदयस्य समाज्ञया धर्मशास्त्रविदः मन्नुदेवस्य च साहाय्येन सः *धर्मशास्त्रसंग्रहं* रचयामास। कोलब्रुकः 1783 क्रिस्ताब्दतः 1815 क्रिस्ताब्दपर्यन्तं भारते आसीत्। तस्मात् नागेशभट्टः 1730 क्रिस्ताब्दतः 1810 क्रिस्ताब्दपर्यन्तं जीवितः आसीत् इति सर्वत्र संदर्भेषु प्राप्यते।[180]

सप्तदशशतकोत्तरार्धभागः तथा अष्टादशशतकपूर्वार्धभागः (1675 क्रिस्ताब्दतः 1745 क्रिस्ताब्दपर्यन्तः) नागेशकालः इति बलदेवः उपाध्यायः।[181]

जयपुरस्य नागेशकालीनस्य अश्वमेधयज्ञं तथा कतिपयान् हस्तलेखान् आधारीकृत्य डॉ. सीतारामः शास्त्री महाभागः नागेशकालः 1674 क्रिस्ताब्दतः 1753 क्रिस्ताब्दपर्यन्तः इति मन्यते।[182]

---

179 सं. व्या. शा. का. इ., प्र. भा., पृ. 395

180 ना. भ. का. व्या. द., पृ. 4

181 तत्रैव

182 बृ. श. शे., भू., पृ. 58-61

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

नागेशकालः अष्टादशशकस्य प्रारम्भिकभागः इति पि. वी. काणे महाभागः प्रतिपादितवान्।[183]

बंगाल रायल एशियाटिक सोसाइटि इत्यनेन संगृहीतायाः ग्रन्थसूचेः प्रस्तावनायां हरप्रसादः शास्त्री महोदयः नागेशस्य परलोकगमनकालः 1775 क्रिस्ताब्दः इति मन्यते ।[184]

युधिष्ठिरः मीमांसकः 1730 विक्रसंवत्तः 1810 विक्रमसंवत्पर्यन्तं नागेशकालः इति स्वीकरोति।[185]

पण्डितराजः जगन्नाथः *प्रौढमनरोमा*खण्डनाय *मनोरमाकुचमर्दिनी*नामकं ग्रन्थं लिखितवान्। तस्य मृत्योः अनन्तरं हरिदीक्षितः तस्याः टीकायाः खण्डनं कृतवान् *शब्दरत्न*द्वारा। पण्डितराजस्य कालः क्रिस्तीयसप्तदशशतकप्रारम्भिकभागः। हरिदीक्षितकालः 1625 क्रिस्तीयवर्षसन्निहितकालः सम्भाव्यते। तस्मात् तस्य शिष्यस्य नागेशस्य कालः 1650-1670 क्रिस्तीयवर्षयोः मध्यवर्ती कालः स्यात्।[186]

---

183 ध. शा. का. इ., प्र. भा., पृ. 95

184 The great supporter of Bhattoji Dixit however was Nāgoji Bhatta pupil of Hari Dixit, who commented upon all his works and the works of his school. He had a long life and lived more than hundred years and died in 1775. ना. भा. का. व्या. द., पृ. 3

185 सं. व्या. शा. का. इ., प्र. भा., पृ. 394

186 ना. भा. का. व्या. द., पृ. 5

ततोऽधिकं तु न ज्ञायते। तदेतद् दुःखदम्। तस्य कदा जन्म अभवदिति तु अद्यापि विवादविषय एव। समुपलभ्यप्रमाणैः नागेशमहाभागस्य दीर्घायुष्यत्वं तु प्रतीयते।

## 2.2.2. नागेशस्य देशपरिचयः

नागेशस्य जन्मस्थानचर्चा अपि विवादग्रस्ता। अयं महावैयाकरणः महाराष्ट्रियः पुनश्च ब्राह्मणकुलोद्भवः अपि आसीत्।[187] अस्य महाभागस्य पितृमातृपरिचयस्तु स्पष्ट एवास्ति। पिता शिवभट्टः। माता सती। *महाभाष्यस्य प्रदीपोद्द्योत*व्याख्यायां प्रत्येकम् आह्निकस्य अन्ते स परिचयः लभ्यते।[188] *परिभाषेन्दुशेखरे*[189], *परमलघुमञ्जूषायां*[190] चापि तत्परिचयः प्राप्यते।

डॉ. सत्यकामवर्मानुसारेण तु तासगाँवनामकः ग्रामः तस्य जन्मस्थानम्, यो हि ग्रामः महाराष्ट्रस्य सतारानामकमण्डले अन्तर्भवति।[191]

---

187 नागेश or Nāgoji Bhatta; Prolific writer on grammer, dharamsastra, alankar, etc, and recognised authority on grammer; son of Śiva Bhatta and Satī of Kāle Family of Maharashtra Brahmans. *New Catalogus Catalogorum*. Volume Ten, Page 20

188 इति शिवभट्टसुतसतीगर्भसंभवनागोजीभट्टेन कृते *भाष्यप्रदीपोद्द्योते* प्रथमस्य प्रथमे आद्यमाह्निकम्। म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 147।

189 इति श्रीमन्महामहोपाध्यायशिवभट्टसुतसतीगर्भजनागोजीभट्टकृत*परिभाषेन्दुशेखरः* समाप्तः, प. भा. शे., पृ. 480।

190 इति शिवभट्टसुतसतीदेवीगर्भजनागेशभट्टकृतावैयाकरणसिद्धान्त*परमलघुमञ्जूषा* समाप्ता। प. ल. म., सम्पा. आचार्यलोकमणिदाहालः पृ. 321

191 सं. व्या. का. उ. औ. वि., पृ. 254

पुनश्च सः 'कालः' वा 'काले' इत्यभिधीयते स्म। तथा चोक्तम्- इति "श्रीकालोपनाम-शिवभट्टसुत-सतीगर्भज-नागेशभट्ट-विरचिते *सिद्धान्तकौमुदी*व्याख्याने *शब्देन्दुशेखर*राख्ये पूर्वार्धं समाप्तम्।"[192] 'कालः' 'काले' वा उपनाम भवितुमर्हति अथवा कुलस्य नाम स्यात्। महाराष्ट्रपरम्परानुसारेण नागेशस्य उपनाम 'काले' इति आसीद् इति बलदेवः उपाध्यायः अवोचत्। तस्मात् महाराष्ट्रपरम्परानुसारेण नागेशस्य सम्पूर्णं नाम भवति नागेशः शिवभट्टः काले इति।[193]

न्यू कैटलागस इत्यस्मिन्नपि 'काले' इति नागेशस्य कुलनाम उच्यते।[194]

पि. वी. काणे महाभागः अपि 'कालः' 'काले' वेति नागेशस्य उपाधिं मन्यते।[195]

उपर्युक्तसमुपलभ्यप्रमाणैः नागेशस्य महाराष्ट्रियत्वे न तथा विदुषां विप्रतिपत्तिः।

### 2.2.3. नागेशस्य कृतयः

निरन्तरसारस्वतोपासनाकारणाद् अस्य चाचार्यस्य सन्तानोत्पत्तेः चिन्तनमेव नासीत् इति जयशङ्करलालत्रिपाठीमहोदयः अपि *परमलघुमञ्जूषा*ग्रन्थस्य

---

192 वै. सि. कौ., च. भा., पृ. 622

193 ना. भा. का. व्या. द., पृ. 2

194 नागेश or Nāgoji Bhatta; Prolific writer on grammar son of Śiva Bhatta and Satī of Kāle Family of Maharashtra Brahmins. *New Catalogus Catalogorum*. Volume Ten, Page 20

195 ध. शा. का. इ., प्र. भा., पृ. 95

भूमिकायां वर्णितवान्। अतः पितृ-ऋणपरिशोधार्थम् असौ महानुभवः *लघुमञ्जूषाया*ः समाप्तिकाले *शब्देन्दुशेखरं* ग्रन्थरत्नं पुत्रत्वेन *मञ्जूषां* च कन्यात्वेन स्वीकृत्य द्वयोः अनयोः समर्पणं शिवयोः चरणारविन्देषु अकार्षीत्। तथा हि-

शब्देन्दुशेखरं पुत्रं मञ्जूषां चैव कन्यकाम्।
स्वमतौ सम्यगुत्पाद्य शिवयोर्पितौ मया।।[196]।

अपत्यहीनः असौ नागेशः महाविचक्षणः आसीत्। स शताधिक-विभिन्नविषयकग्रन्थान् कृत्वा शतवर्षाणि यावत् धरित्रीं स्पृष्ट्वा शिवसायुज्यमलब्ध इति केषाञ्चिद्विदुषां मतम्। *महाभाष्यस्य* *प्रदीप*व्याख्यानस्य व्याख्याकर्तृष्वग्रणीः सर्वतन्त्रस्वतन्त्रः नागेशः *प्रदीपद्द्योत*नाम्नीं टीकामलेखीत्, या *विवरणी* इत्यपरनाम्ना भूषिता। *प्रदीपोद्द्योत*व्याख्यानं विहायापि *लघुशब्देन्दुशेखर-बृहच्छब्देन्दुशेखर-परिभाषेन्दुशेखर-लघुमञ्जूषा-परमलघुमञ्जूषा*-स्फोटवादान् ग्रन्थानकार्षीत्। *महाभाष्य-प्रदीपोद्द्योत*स्योद्धरणमकृत *लघुमञ्जूषायां* *शब्देन्दुशेखरे* चेति तयोस्समकालिकलेखनत्वं सम्भवम् आसीत्।

परमविद्वान् सर्वशास्त्रवेत्ता असौ नागेशभट्टः नैकान् ग्रन्थान् विरचयामास। तेन कृतानां ग्रन्थानां परिचयसंकेतः तावल्लभ्यते आफ्रेख्ट्-के-कैटलगस्-कैटलोगरम्तः पुनश्च डॉ. के. कुंजुनी राजा महोदयसम्पादित-न्यू-कैटलगस्- कैटलोगरम्तः। अस्य च विदुषः वैदुष्यप्रभा स्पष्टं प्रतीयते। आफ्रेख्ट्-

196 वै. सि. कौ., च. भा., पृ. 622

### *ज्ञापकसंग्रह*कर्तृत्वविचारः

के-कैटलगस्-कैटलोगरम्तः लब्धानां नागेशकृतीनां परिचयः अत्र न कार्यते। आफ्रेख्ट्महोदयेन सप्तचत्वारिंशत्कृतीनाम् उल्लेखः विहितः। अत्र च *न्यू-कैटलगस्- कैटलोगरम्* आश्रित्य नागेशप्रणीतग्रन्थाः अधः लिख्यन्ते-

#### 2.2.3.1. व्याकरणशास्त्रसम्बन्धिकृतयः

1) *परमलघुमञ्जूषा*

2) *परिभाषेन्दुशेखरः*

3) *बृहच्छब्देन्दुशेखरः* अथवा *शब्देन्दुशेखरः* (भट्टोजिदीक्षितकृत*सिद्धान्तकौमुदी*टीका)

4) *उद्द्योतः* - *महाभाष्य*व्याख्या*प्रदीप*टीका

5) *लघुमञ्जूषा* अथवा *वैयाकरणसिद्धान्तमञ्जूषा*

6) *लघुशब्देन्दुशेखरः*

7) *विषमपदी* - *शब्दकौस्तुभ*टीका

8) *स्फोटवादः*

9) *कारकार्थनिर्णयः*

10) *तात्पर्यदीपिका*

11) *तिङन्तसंग्रहः*

12) *धातुपाठवृत्तिः*

13) *णेरणावितिसूत्रार्थविचारः*

14) *नेरणिवादार्थः*

15) *परिभाषासंग्रहः* अथवा *परिभाषेन्दुशेखरः*

16) *लघुशब्दरत्नम्* - *प्रौढमनोरमाटी*का

17) *वैयाकरणकारिका*

18) *शब्दानन्तसागरसमुच्चयः*

19) *सुप्तिङन्तसारसमुच्चयः*

### 2.2.3.2. धर्मशास्त्रसम्बन्धिकृतयः

20) *आचारेन्दुशेखरः*

21) *आशौचनिर्णयः*

22) *आशौचेन्दुशेखरः*

23) *इष्टिकालनिर्णयः*

24) *तिथिनिर्णयः*

25) *तीर्थेन्दुशेखरः*

26) *त्रिषष्टिसेतुप्रघट्टकः*

27) *प्रायश्चित्तेन्दुशेखरः* अथवा *सारसंग्रहः*

28) *श्राद्धेन्दुशेखरः*

29) *सापिण्डी मंजरी*

30) *सापिण्डदीपिका* अथवा *निर्णयः*

31) *सापिण्ड्यनिर्णयः*

32) *सापिण्ड्यप्रदीपिका*

### 2.2.3.3. अलंकारशास्त्रसम्बन्धिकृतयः

33) *उदाहरणप्रदीपिका* - *काव्यप्रकाश*टीका

34) *उद्द्योतः* - गोविन्दठक्करकृत*काव्यप्रकाश*टीका*काव्यप्रदीप*टीका

35) *अलंकारसुधा* - *कुवलयानन्द*टीका

36) *गुरुमर्मप्रकाशिका* - *रसगंगाधर*टीका

37) *काव्यमाला* - *रसतरंगिणी*टीका

38) *प्रकाशः* - *अनुदत्तरसमंजरी*टीका

### 2.2.3.4. तन्त्रादिग्रन्थाः

39) *देवीमाहात्म्यम्* - *चण्डीसप्तशती*टीका अथवा *दुर्गासप्तशती*टीका।

40) *चण्डीस्तोत्रप्रयोगविधि* - स्वकृत*देवीमाहात्म्य*टीका

### 2.2.3.5. अपरे सम्भाविताः ग्रन्थाः

41) *अष्टश्लोकीसपिण्डनिर्णयः*

42) *उपाकर्मप्रयोगः*

43) *कुण्डपद्धतिः*

44) *कात्यायनीयतन्त्रम्*

45) *गर्भवतीव्यभिचारिणीप्रायश्चित्तम्*

46) *गार्भिणीकृतिः*

47) *गोत्रप्रवरनिर्णयः*

48) *युक्तिमुक्तावली*

49) *दत्तमीमांसा*

50) *दानसंग्रहः*

51) *नागेशव्याख्या/ पुराणम्*

52) *नमस्कारेण रुद्रानुष्ठानप्रयोगः*

53) *पदार्थदीपिका*

54) *पर्वनिर्णयः*

55) *पातंजलसूत्रवृत्तिः*

56) *प्रत्याख्यानसंग्रहः*

57) *प्रयोगविधिः* (तन्त्रम्)

58) *प्रयोगसरणिः* (तन्त्रम्)

59) *रामायणटीका*

60) *वेदसूक्तभाष्यम्*

61) *व्रात्यसंग्रहः*

62) *शंकासमाधानम्*

63) *शतचण्डी* – (सहस्रचण्डीप्रयोगः)

64) *संस्काररत्नमाला*

65) *लघुसांख्यसूत्रवृत्तिः* - (*सांख्यवचनसूत्रो*परि टीका)

एवं पञ्चषष्टिग्रन्थनामानि न्यू कैटलोगस कैटलोगोरमतः प्राप्तानि।[197] ग्रन्थाः महामहोपाध्यायवैयाकरणमूर्धन्येन नागेशन विरचिताः। पुनः जयपुरस्थिते महाराजसार्वजनिकपुस्तकालये *व्रात्यता प्रायश्चित्तनिर्णयः* (बृहत् लघु च) *व्रात्यताशुद्धिसंग्रहः* इति ग्रन्थत्रयमुपलभ्यते।[198] तेषु तृतीयग्रन्थं जयपुरराज्ञः आदेशेन नागेशः लिखितवान्। नागेशभट्टः नवत्यधिकान् प्रायेण शतं ग्रन्थान् व्याकरण-दर्शन-धर्मशास्त्र-ज्योतिष-तन्त्रप्रभृतिविषयेषु प्रणीतवान्। एवम् नागेशस्य कति कृतयः सन्ति इति स्पष्टं वक्तुं न शक्यन्ते। नागेशः नैकशास्त्रचतुर्वेद-व्याकरणालंकारदर्शन-धर्मशास्त्रतन्त्रसाहित्यपुरणादिविषयान् आधारीकृत्य तत्तद्ग्रन्थान् प्रणीतवान्। तदेतत् तस्य वैदुष्यम् आवहति। यद्यपि कृतीनां विषये मतपार्थक्यम् अस्ति। आफ्रेख्टमहोदयः मुख्यान् ग्रन्थानेव गणितवान्। तत्र डॉ. कुंजुनी-राजासम्पादिततालिकायां गौणमुख्यग्रन्थाः सर्वे सङ्कलिताः सन्ति। अथवा केचन परं प्राप्ताः ग्रन्थाः सङ्कलिताः सन्ति यान् ग्रन्थान् आफ्रेख्टमहोदयः न संकलितवान्। डॉ. सीतारामशास्त्रिमहोदयः तस्य संग्रहे कतिपयभिन्नाः कृतीः उल्लिखितवान्। *प्रभाकरचन्द्रतत्त्वदीपिका*, *व्याससूत्रेन्दुशेखरः*, *एकश्रुतिवादः*, *कालेन्दुशेखरः*,

---

197 *New Catalogus Catalogorum*. Volume Ten, Page 20-22

198 ना. भा. का. व्या. द., पृ. 13

*गीतगोविन्दटीका, सुधालहरीटीका, परमार्थसारविवरणम्* [199] इत्यादिग्रन्थाः। भवतु वा कृतिसंख्यावैषम्यं, किन्तु नागेशवैदुष्यविषये तु नास्ति संदेहलेशः।

## 2.3. नागेशस्य गुरुशिष्यपरम्परापरिचयः

अहोरात्रकठोरोपासनेन सन्तुष्टायाः वागीश्वरीदेव्याः सकाशाद् वरप्राप्तेः परं नागेशभट्टः अध्यैष्ट व्याकरणादिशास्त्रं भट्टोजिदीक्षितस्य पौत्रात् श्रीवीरेश्वर-दीक्षितस्य पुत्रात् श्रीहरिदीक्षितात्। श्रीमद्रामरामभट्टाचार्याद् न्यायशास्त्रम् अधीतवान्। एवम् अल्पकालेनैव अखिलशास्त्रपाण्डित्यम् अलभत। गुरुचरणकमलेषु तस्य मातृपितृवद्भक्तिः आसीत्। तथोक्तं *लघुमञ्जूषा*याम्-

अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितात्।

न्यायतन्त्रं रामरामाद् वादिरक्षोघ्नरामतः।।[200]

कथितम् अस्ति यत् नागेशः गुरोः मुखाद् अष्टादशावृत्तिभिः *महाभाष्यम्* अध्यैष्ट। तस्मादेव *प्रदीपोद्द्योते* कृतिभूरिपरिश्रमः अयं महात्मा वदति-

नागेशभट्टो नागेशभाषितार्थविचक्षणः।

हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः।।[201]

भट्टोजिदीक्षितः *वैयाकरणसिद्धान्तकौमुदीं* रचयित्वा तदुपरि *प्रौढमनोरमा*-टीकां रचयामास। तस्याः अपि काठिन्यम् अनुभूय नागेशः *शब्दरत्न*नाम्नीं टीकां

---

199 बृ. श. शे., भू., पृ. 59-61


200 वै. सि. ल. म., पृ. 8

201 म. भा., सम्पा. जयशङ्करलालः त्रिपाठी, पृ. 2

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

गुरोः श्रीहरिदीक्षितस्य नाम्ना लिखितवान्, तदपि गुरुभक्तिं प्रकाशयति। *लघुशब्देन्दुशेखरे* यादृशी सिद्धान्तनिरूपणशैली आश्रिता सैव *शब्दरत्ने* दृश्यते इति नागेशस्य *शब्दरत्न*कर्तृत्वम् अनुमातुं शक्यते।

नागेशस्य सत्सु अपि शिष्येषु नैकेषु वैद्यनाथपायगुण्डः प्रधानं शिष्य आसीत्। गुरुः इव सः अपि महान् वैयाकरणः समजायत। सः नागेशस्य नैकानां ग्रन्थानां व्याख्यानम् अकृत। तस्य पुत्रः बालभट्टपायगुण्डः अपि नागेशभट्टस्य शिष्यः आसीत्। वैद्यनाथस्य शिष्यः आसीत् मन्नुदेवः। इत्येवं नागेशस्य गुरुशिष्यपरम्परा तालिकया अधस्तावत् प्रस्तूयते-



सोऽयं नागेशभट्टः किं *ज्ञापकसंग्रहाख्यं* ग्रन्थं विरचयामास इति इदानीम् आलोच्यते। अस्मिन् समानकर्तृकत्वसमर्थकत्वं समानकर्तृकत्वासमर्थकत्वं चेति द्विविधः विषयः उपस्थाप्यते। तयोः प्रथमविषयस्तावत्-

## 2.4. समानकर्तृकत्वसमर्थकत्वम्

महावैयाकरणः सर्वशास्त्रनिष्णातः नागेशः नैकान् व्याकरणग्रन्थान् लिखितवान्, येषां नामानि उपरि उल्लिखितानि सन्ति एव। किन्तु कुत्रापि सः *ज्ञापकसंग्रहस्य* उद्धरणं नैव कृतवान्। तत्कारणं तु अज्ञातमेव। *ज्ञापकसंग्रहस्य* कर्ता कः इत्यस्मिन् विषये नास्ति किमपि स्पष्टं दृढं प्रमाणम्। अतः विदुषाम् अस्ति मतपार्थक्यं *ज्ञापकसंग्रहस्य* नागेशकर्तृत्वविषये। तत्र निश्चयेन कश्चिदपि वक्तुं न शक्नोति यद् अयं *ज्ञापकसंग्रहः* इति ग्रन्थः नागेशभट्टेन विरचितः।

*ज्ञापकसंग्रहः* इत्येतन्नाम्नैव ग्रन्थोऽयं पार्थसारथिभट्टाचार्यैः आन्ध्रलिप्यां मुद्रापितः, किन्तु नामकरणं केन विहितमिति तु चिन्त्यम्। ज्ञापकानां वचनज्ञापकानां सूत्राणां सङ्ग्रहः सङ्कलनम् इति ग्रन्थनाम्नोऽर्थः। संग्रहः संकलनम्। भवन्ति च संग्रहश्लोकः (Summary Verses), संग्रहकारः (Compiler), संग्रहग्रन्थः (Compilation work) इत्यादयः व्यवहाराः। *काशिका* कश्चित् संग्रहग्रन्थः। जयादित्यः लिखति- 'विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः'। असौ स्वप्रणीतः वा स्यात् परप्रणीतः वा स्यात्। तस्मादेव व्याख्याकर्तारः वदन्ति- 'सः (सारसंग्रहः) अत्र क्वचिदन्येन क्वचिन्मया वा निबध्यते इत्यर्थः।' किं तर्हि असौ *ज्ञापकसंग्रहाख्यः*

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

ग्रन्थः परप्रणीतः स्यात् परं नागेशनाम्नेव व्यवहारः समभवदिति चिन्त्यम्। 'बह्वर्थकवाक्यानामेकत्र संकलनं संग्रहः' इति प्राचीनाः विद्वांसः ब्रुवते। एतत्समबद्धा परमप्रसिद्धा कारिका तावत्-

विस्तरेणोपदिष्टनामर्थानां सूत्रभाष्ययोः।

निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः।।[202]

अस्मिन् *ज्ञापकसंग्रहाख्य*ग्रन्थे नैकानि पाणिनिसूत्रज्ञापिवचनानि सन्ति इति उपरि उल्लिखितानां प्रायः समैः लक्षणैः संग्रहत्वं ग्रन्थस्यास्य उपपद्यते। पाणिन्यष्टाध्यायीक्रमेणैव संकलितस्यास्य ग्रन्थस्य नाम 'ज्ञापकसिद्धवचनंग्रहः' इति तु युक्तं स्यात्। परन्तु तन्नाम्नि दीर्घता प्रसज्येत।[203]

अस्य च  ग्रन्थस्य प्रारम्भे, मध्ये वा अन्ते कुत्रापि नागेशस्य नाम न लभ्यते। पुनश्च *परिभाषेन्दुशेखरा*दिषु ग्रन्थेषु अपि परिचयः न कारितः *ज्ञापकसंग्रह*विषये। तस्माद् अस्यां परिस्थितौ *ज्ञापकसंग्रहस्य* कर्ता कः इति विषये तु जिज्ञासा भवत्येव। नागेशरचितः *ज्ञापकसंग्रहः* न वेति संदेहः जायते एव।

आन्ध्रलिप्यां विंशतिपृष्ठात्मना मुद्रितस्य अस्य *ज्ञापकसंग्रहस्य* उपोद्घाते पार्थसारथिभट्टाचार्यः लिखितवान् यत्-

"अस्य ग्रन्थस्य एकैव मातृका गुरुवर्याणां दक्षिणदेशे अपरनागेशत्वेन प्रथितानां श्रीमतां महामहोपाध्यायसुब्बरायाचार्याणां तनूजन्मभिः सेतुमाधवाचार्यैः

---

202 व्या. द. इ., पृ. 389

203 ज्ञा. स., पृ. 4

प्रत्ता। तथा तैरेव नागेशकृतत्वेन प्रोक्तोऽयं ग्रन्थः इति।"[204] अस्य ग्रन्थस्य मूलकोशः तु भारतवर्षस्य कुत्रापि पुस्तकभाण्डारे न लभ्यते। श्रीसुब्बरायाचार्यः उत्तरदेशं गत्वा व्याकरणं पठित्वा च दक्षिणदेशे तस्य अध्यापनेन तस्य प्रचारम् अकृत इत्येवम् उत्तरदेशे कदाचिदियं मातृका तैः लब्धा स्यात् इति सम्भावयितुं शक्यते।

वस्तुतः *ज्ञापकसंग्रह*स्य यदि सम्यक् परिशीलनं क्रियते तदा ज्ञास्यते यत् ज्ञापकसंहस्य कर्ता नागेशः इत्यस्मिन् विषये सन्देहः न भविष्यति। नागेशः तु *महाभाष्यप्रदीप*स्य व्याख्यानं कृतवान् *प्रदीपोद्द्योत*नाम्ना। अस्य च *प्रदीपोद्द्योत*-स्यापि यदि सम्यग् अध्ययनं क्रियते तदा ज्ञायते यत् केषुचित् स्थलेषु *प्रदीपोद्द्योत*स्य सिद्धान्ताः *ज्ञापकसंग्रह*सिद्धान्तैः सह समानाः दृश्यन्ते। तेन उभयोः ग्रन्थयोः कर्ता समानः एव इति विभावयितुं शक्यते। एवञ्च तादृशानि कानिचित् स्थलानि अत्र एन. एस. रामानुजताताचार्यमार्गदिशा प्रस्तूयन्ते। आदौ तावत् तालिका एका प्रदर्श्यते। ततः विस्तरशः आलोचना करिष्यते।

### 2.4.1. *प्रदीपोद्द्योतज्ञापकसंग्रह*योः क्षेत्रविशेषाध्ययनम्

| *ज्ञापकसंग्रहः* | पाणिनीयसूत्रम् | *प्रदीपोद्योतः* |
|---|---|---|
| अपवादत्वात्सिद्धे इयमेकदेश्युक्तिः | इको गुणो वृद्धी | एकदेश्युक्तित्वेनादोषात् |
| अल्त्वाद्याश्रयानेकग्रहणमिति तदर्थः | निपात एकाजनाङ् | तज्जात्याश्रयानेकव्यक्तिग्रहणमिति भावः |

204 तदेव, पृ. 2

| | | |
|---|---|---|
| ज्ञापिते कथं चारितार्थ्यम्, तस्मात् एक देश्युक्ति-रेतद्भाष्यम् | जनसनखनां सञ्झलोः | ज्ञापितेऽपि चारितार्थ्याभावात् कथं ज्ञापकत्वमिति चिन्त्यमेतत्। तस्मादत्र ज्ञापकोपन्यासपरो ग्रन्थ आचार्यदेशीयस्य |
| तेन भाषायामपि बेभिदीति चेच्छिदीतीत्येतत् सिद्धं भवतीति भाष्योक्त्या अन्ययङ्लुगन्तानां भाष्ये असाधुतैव लभ्यते | हुश्नुवोः सार्वधातुके | एवं चैतत्प्रयोगद्वयातिरिक्तय ङ्लुगन्तं भाषायामसाध्वेव |
| इत उत्तरं स्थानिवत्त्वाभावज्ञापकमग्लो-पिग्रहणमिति भाष्यं त्वेकदेश्युक्तिः | नाग्लोपिशास्वृदिताम् | इत उत्तरं स्थानिवत्त्वाभावज्ञापन-परं पूर्वभाष्यं त्वेकदेश्युक्तिः |
| केशाद्वोऽन्यतरस्यांग्रहणस्य पुनःकरणाच्चेदं समुच्चयार्थम् | सिध्मादिभ्यश्च | समुच्चयार्थो न विकल्पार्थ इत्यर्थः |

सम्प्रति उपर्युक्तानि तानि सूत्राणि *ज्ञापकसंग्रह*दिशा *प्रदीपोद्द्योत*वर्त्मना च अत्र अधुना आलोचयिष्यन्ते। तत्र उभयोः ग्रन्थयोः निर्दिष्टसूत्रेषु सिद्धान्तसाम्यम् अत्र प्रदर्शयिष्यते। तेन उभयोः ग्रन्थयोः कर्ता एक एव नागेशः इति प्रतिपत्तिः स्याद् इति आशासे। क्रमशः विमर्शः क्रियते-

### 2.4.1.1. अपवादत्वात्सिद्धे इयमेकदेश्युक्तिः।

'अपवादत्वात्सिद्धे इयमेकदेश्युक्तिः' इति *ज्ञापकसंग्रहे*, 'एकदेश्युक्तित्वेनादोषात्' इति *प्रदीपोद्द्योते*।

'इको गुणवृद्धी'[205] इति सूत्रे ननु वृद्धिग्रहणेऽक्रियमाणे 'क्ङिति च'[206] इति सूत्रेण गुणमात्रस्य निषेधः स्यात्। तेन न्यनुवीत् न्यधुवीत् इत्यादिषु 'सिचि वृद्धिः परस्मैपदेषु'[207] इति सूत्रेण वृद्धिर्भवेत्। 'इको गुणवृद्धी'[208] इति सूत्रे वृद्धिग्रहणे कृते तु गुणेन सह वृद्धेरपि निषेधान्नोक्तदोषः। अत्रोच्यते नैतदस्ति प्रयोजनं, यतो हि अन्तरङ्गत्वाद् अत्र उवङादेशे विहिते उकारस्यान्ते अविद्यमानत्वाद् वृद्धिर्न भविष्यति। तस्मादत्र वृद्ध्यभावफलकम् इको गुण इति वृद्धिग्रहणं मास्तु इति पूर्वपक्षमतमुपस्थापयित्वा "न सिच्यन्तरङ्गं भवति, यदयम् 'अतो हलादेर्लघोः' इत्यकारग्रहणं करोति" इति भाष्यकृता उक्तम्।

न सिच्यन्तरङ्गं भवतीति ज्ञाप्यज्ञापकप्रदर्शनं तावत्- 'अतो हलादेर्लघोः'[209] इति लक्षणेन हलादेर्लघोरकारस्य इडादौ परस्मैपदपरे सिचि वृद्धिर्विकल्पेन विधीयते। तदुदाहरणं हि अखादीत् अखदीत् इति। अत्र अकारस्य इत्यनुक्तौ अकोषीत् अमोषीत् इत्यादौ अ+कुष्+ईत् इत्यवस्थायां हलादेः लघोः

---

205 पा. सू. 1.1.3
206 पा. सू. 1.1.5
207 पा. सू. 7.2.1
208 पा. सू. 1.1.3
209 पा. सू. 7.2.7

उकारस्यापि वृद्धिः भवेत्। तन्माभूत् इत्येवमर्थम् अकारस्य इत्युक्तमिति वक्तव्यम्। यदि तु सिचि परतः अन्तरङ्गं कार्यं भवेत् तदा सिच्परस्मैपदोभयसापेक्षवृद्ध्यपेक्षया अन्तरङ्गत्वात् लघूपधगुणे विहिते ओकारस्यापि लघुत्वाभावादेव वृद्धिः न भविष्यति इति अकारग्रहणं व्यर्थं स्यात्। व्यर्थं च तत् 'न सिच्यन्तरङ्गं भवति' इति ज्ञापयति। ततश्चान्तरङ्गगुणाप्रवृत्त्या परत्वादुकारस्य वृद्धिर्भवेदिति तद्वारणार्थमकारग्रहणमिति स्वांशे चारितार्थ्यम्।

अस्ति अन्यदपि ज्ञापकं तज्ज्ञाप्यस्य। 'ह्म्यन्तक्षणश्वस-जागृणिश्व्येदिताम्'[210] इति सूत्रस्थं णिश्विग्रहणम् अपि उक्तज्ञाप्यस्य ज्ञापकम्। तथा हि ह्मयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिः न स्यादिडादौ सिचि इति तस्य सूत्रस्यार्थः। औनयीत् अश्वयीत् इत्युदाहरणम्। यदि च सिचि अन्तरङ्गं भवेत् तर्हि अन्तरङ्गत्वात् गुणे कृते इष्टरूपसिद्ध्या णिश्विग्रहणमकर्तव्यं स्यात्। कृतं च तत् 'न सिच्यन्तरङ्गं भवति' इति ज्ञापयति। ततश्चान्तरङ्गगुणाप्रवृत्त्या वृद्धिप्राप्तौ तत्प्रतिषेधार्थं णिश्विग्रहणम्। इत्थं च न्युनवीत् इत्यादौ सिचि अन्तरङ्गस्य उवङः अप्रवृत्त्या वृद्धिप्राप्तौ सत्यां 'क्ङिति च' इति सूत्रेण इग्लक्षणवृद्धेर्निषेधसिद्धये सिचि वृद्धिरिग्लक्षणा आस्थेया इति तदर्थम् 'इको गुणवृद्धी' इति सूत्रे वृद्धिग्रहणमिति स्थितम्।

---

210 पा. सू. 7.2.5

वस्तुतः अन्तरङ्गगुणस्यापवादभूतया वृद्ध्या बाधनात् वृद्धिप्राप्तौ तन्निषेधार्थं णिश्विग्रहणमिति तस्य उक्तवचनज्ञापकत्वं न सम्भवति इति सर्वशास्त्रनिष्णातः नागेशः कथयति “अपवादत्वात्सिद्धे इयमेकदेश्युक्तिः”[211] इति *ज्ञापकसंग्रहे*।

‘इको गुणवृद्धी’ इति योगे इग्ग्रहणाभावे अकोषीत् इत्यादौ व्यञ्जनस्य वृद्धिवारणाय बाध्यविशेषचिन्तापक्षे सिचिवृद्ध्यपवादहलन्तलक्षणाया निषेधे भ्रष्टावसरन्यायेन सिचि वृद्ध्यप्राप्तेः स्वीकारेण अकुटीदित्यादावपि तेन न्यायेन तदप्राप्तेः ज्ञापकमेवेति भावः। तेन सिचि अन्तरङ्गाभावेऽपि परत्वाद्गुणस्य वृद्धिबाधकताया दुर्वारत्वेन अकोषीत् इत्यादौ लघुत्वाभावाद् एव वृद्ध्यभावेऽत इति व्यर्थमेव इत्यन्त्यं ज्ञापकम् असङ्गतम्, तथा णिश्विग्रहणम् अपि आवश्यकम् इत्याद्यमपि असङ्गतम् इत्यपास्तम्। “एकदेश्युक्तित्वेनादोषात्”[212] इति *उद्द्योते* नागेशः। एवमुभयोः स्थलयोः सिद्धान्तसाम्यं *ज्ञापकसंग्रहस्य* नागेशभट्टकर्तृत्वं सूचयति।

## 2.4.1.2. अल्त्वाद्याश्रयानेकग्रहणमिति तदर्थः।

‘अल्त्वाद्याश्रयानेकग्रहणमिति तदर्थः’ इति *ज्ञापकसंग्रहे*, ‘तज्जात्याश्रयानेकव्यक्तिग्रहणमिति भावः’ इति *प्रदीपोद्द्योते*।

211 ज्ञा. स., पृ. 11

212 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 197

## *ज्ञापकसंग्रहकर्तृत्वविचारः*

'निपात एकाजनाङ्'[213] इति सूत्रे एकग्रहणाभावे 'येन विधिस्तदन्तस्य'[214] इति शास्त्रेण अचो निपातविशेषणत्वात्तदन्तविधौ अजन्तनिपातस्य प्रगृह्यसंज्ञा स्यादित्यर्थे प्रेदं ब्रह्म इत्यादौ प्र+इदम् इत्यवस्थायां प्र इत्यजन्तनिपातस्य प्रगृह्यसंज्ञकत्वे सन्धिकार्यं न स्यादिति तु वक्तुं न शक्यते। यतो हि निपातस्य अज्विशेषणत्वमाश्रित्य निपातरूपो योच् तस्य प्रगृह्यसंज्ञा इति सूत्रार्थस्वीकारे प्र इति निपातस्य अज्रूपत्वाभावेन प्रगृह्यत्वस्य प्राप्तिरेव नास्ति। एवं सति सूत्रस्थम् एकग्रहणं व्यर्थमित्याशङ्क्य भाष्यकारो ब्रूते- "एवं तर्हि सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यः 'अन्यत्र वर्णग्रहणे जातिग्रहणं भवति' "[215] इति। एवञ्च सति वर्णग्रहणे जात्याश्रयानेकवर्णग्रहणमिति अच् इत्यनेन अच्त्वाश्रयानेकवर्णसमुदायग्रहणं स्यात्। ततश्च तितउशब्दैकदेश अ उ शब्दानुकरणे निपातसंज्ञके अउ अकरोदित्यादौ अउ इति समुदायस्य प्रगृह्यसंज्ञकत्वात् प्रकृतिभावात् यणादेशः न स्यात्। एकग्रहणे तु तत्सामर्थ्याद् एको योऽच् तद्रूपस्य निपातस्यैव प्रगृह्यत्वमिति न दोष इति अतः तद्वारणाय एकग्रहणमिति स्वांशे चारितार्थ्यम्।

---

213 पा. सू. 1.1.14

214 पा. सू. 1.1.72

215 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 274

*भाष्यप्रदीपे* च ज्ञापनान्यत् फलं तावत् “दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम् इति यदुक्तं तदुपपन्नं भवति इति”[216] *भाष्ये* उक्तम्। दम्भ्धातोः सन्प्रत्यये ‘दम्भ इच्च’[217] इति सूत्रेण धातोरचः इत्वे दिम्भ् स इति जाते ‘हलन्ताच्च’[218] इति सूत्रेण सनः कित्त्वात् तस्मिन् परे धातूपधाया नकारस्य ‘अनिदिताम्’[219] इति शास्त्रेण लोपे भष्भावादौ धिप्सतीति रूपं सिध्यति। ‘हलन्ताच्च’ इति शास्त्रस्य इक्समीपाद्धलः परः झलादिः सन् कित् स्यादित्यर्थः। दिन्भ् स इत्यवस्थायाम् इक्समीपाद्धलः परः झलादिः सन् कित् स्यादित्यर्थः। दिन्भ् स इत्यवस्थायामिक्समीपो यो हल् नकारः ततः परः सन् न भवति, यतश्च भकारात्परः सन् स च भकारो नेक्समीपः नकारेण व्यवधानादिति कित्त्वाभावे न लोपो दुर्वारः स्यात्। वर्णग्रहणे जातिग्रहणमाश्रीयते इति स्वीकारे तु हल्त्वजात्याश्रया-नेकस्येक्समीपत्वं ततः परत्वं सनः इति तस्य कित्त्वे तस्मिन् परे धातुनकारलोपे च धिप्सतीति सिद्धिः प्रयोजनमित्येवं सर्वं *ज्ञापकसंग्रहे* उक्तमेवंरूपेण- “ ‘निपात एकाजनाङ्’ इदमेवैकग्रहणं ज्ञापयति ‘वर्णग्रहणे जातिग्रहणमिति’। अल्त्वाद्याश्रयानेकग्रहणमिति तदर्थः इति।” [220]

---

216 तत्रैव

217 पा. सू. 7.4.56

218 पा. सू. 1.2.10

219 पा. सू. 6.4.24

220 ज्ञा. स., पृ. 14

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

पुनरपि *ज्ञापकसंग्रहे* उच्यते, 'अपृक्त एकाल्प्रत्ययः'[221] इति पाणिनीयसूत्रे इदमप्येकग्रहणं 'वर्णग्रहणे जातिग्रहणं ज्ञापयति' इति।[222] अपिना 'निपात एकाजनाङ्' इति शास्त्रस्थम् एकग्रहणं समुच्चीयते इति यावत्।

*प्रदीपोद्द्योते* च "जातिग्रहणमित्यस्य तज्जात्याश्रयानेकव्यक्तिग्रहणमिति भावः। अन्यथा जातिग्रहणेऽपि जातेरेकैकव्यक्तिव्यङ्गतयासंगतिरेव। प्रवृत्तिनिमित्ततया जातिग्रहणस्य सर्वत्र सत्त्वेन तस्यावक्तव्यत्वाच्च।"[223] वैद्यनाथस्तु तज्जात्याश्रया-नेकव्यक्तिग्रहणमित्यस्य "तज्जात्याश्रयैकानेकव्यक्तिग्रहणमित्यर्थं मन्यते।"[224] एवञ्चात्र दृष्टान्तवैषम्यमुच्यते- समुदायसंज्ञाद्वारात्र अवयवानामनुग्रहो भवतीति न द्विर्वचनन्यायः। एवमपि वक्तुं नैव शक्यते यत्, यथा स्वाङ्गग्रहणेन स्वाङ्गसमुदायस्य ग्रहणं तद्वत् निपातग्रहणेन निपातसमुदायस्य ग्रहणं भवतु, कुतः इति चेत् एकैकस्मिन् सूत्रचारितार्थ्यात्। अत एव *भाष्ये* तितउ इत्यत्र स्वरूपबोधनाय सन्ध्यकरणम्। तितउशब्दैकदेश अउशब्दानुकरणे उक्तसमुदायानुकरणे वानितिपरे निपतासंज्ञके अउ अकरोत् इत्यादौ प्रगृह्यत्वं स्यादिति तद्वारणाय एकग्रहणम्। दम्भोः सन्ति दम्भ इच्च इति इत्वे सनीवन्तेति इडभावपक्षे इक्समीपो नकारः, न ततो झलादिः सन्परः, यतश्च भात्परः सन् न स इक्समीप इति हलन्ताच्चेति कित्त्वाभावे 'अनिदिताम्' इति नकारलोपः न भवेत् इति चोद्ये जात्याश्रयानेकस्येक्समीपत्वं सनश्च तस्मात्परत्वम्

221 पा. सू. 1.2.41

222 ज्ञा. स., पृ. 34

223 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 274-275

224 तत्रैव

इति कित्वे धिप्सतीति सिद्धिरित्यर्थः। एवमनेन भाष्येण सामीप्यमव्यवहिते एवेति सूचितम्। अन्यथा अनर्थकमेव चोद्यादि सर्वं स्यात्।

एवमुभयोः स्थलयोः विमर्शसाम्यं *ज्ञापकसंग्रहस्य* नागेशभट्टकर्तृत्वं सूचयति।

### 2.4.1.3. ज्ञापिते कथं चारितार्थ्यं, तस्मात् एकदेश्युक्तिरेतद्भाष्यम्।

'ज्ञापिते कथं चारितार्थ्यम्, तस्मात् एकदेश्युक्तिरेतद्भाष्यम्' इति *ज्ञापकसंग्रहे*, 'ज्ञापितेऽपि चारितार्थ्याभावात् कथं ज्ञापकत्वमिति चिन्त्यमेतत्। तस्मादत्र ज्ञापकोप*न्यास*परो ग्रन्थ आचार्यदेशीयस्य' इति *प्रदीपोद्द्योते*।

जनसनखनाम् आकारः अन्तादेशः स्यात् सनि झलादौ क्ङिति इत्यर्थकस्य 'जनसनखनां सन्झलोः'[225] इति शास्त्रस्य विषये *महाभाष्ये* वार्त्तिकमेकं पठितम् अस्ति- "सनोतेरनुनासिकलोपादात्वं विप्रतिषेधेन"[226] (वा. 6543) इति। तदर्थस्तावत्- सन्धातोः उत्तरं क्तप्रत्यये सन्-त इति जाते जनसनादिसूत्रेण आत्वं प्राप्तम्, पुनः 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति'[227] इति शास्त्रेण च अनुनासिकलोपः प्रसक्तः, तत्र 'विप्रतिषेधेन परं कार्यम्'[228] इति सूत्रबलेन परत्वाद् आत्वमेव भवति इति वार्त्तिकार्थः। तेन सात इति रूपं सिध्यति।

---

225 पा. सू. 6.4.42

226 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 304

227 पा. सू. 6.4.37

228 पा. सू. 1.4.2

## *ज्ञापकसंग्रहक*र्तृत्वविचारः

अत्र तावत् संदेहः यत् 'पूर्वत्रासिद्धे नास्ति विप्रतेषेधोऽभावादुत्तरस्य' इति न्यायेन आभीयासिद्धविषयेऽपि अत्र विप्रतिषेधस्य अप्रवृत्तिः इत्यस्मात् कारणाद् विप्रतिषेधः अत्र न युज्यते। उच्यते च विप्रतिषेधः भवति।

'घुमास्थागापाजहातिसां हलि'[229] इत्यस्मिन् योगे हल्ग्रहणं ज्ञापकम्। परन्तु वस्तुतः इदं व्यर्थम् अस्ति, ज्ञापकं नैवास्ति। तथापि अस्य च ज्ञापकस्य वैयर्थ्यमुच्यते- 'घुमास्थागापाजहातिसां हलि' इत्यस्मिन् शास्त्रे यदि हल्ग्रहणं न क्रियते तदा गोदः इत्यादिषु स्थलेषु अपि गोदा-अ इत्यवस्थायामीत्वं स्यात्। यदि च सूत्रे हल्ग्रहणं क्रियते तदा अस्य प्रत्ययस्याजादित्वेन हलादित्वस्य अभावाद् उक्तदोषः नास्तीति वाच्यम्।

अत्र यदि विप्रतिषेधः न स्यात् तदा 'असिद्धवदत्राभात्'[230] इति योगेन द्वयोः सूत्रयोः परस्मिन् असिद्धत्वाद् ईत्वं विहितं चेदपि तस्य च ईत्वस्य असिद्धत्वाद् 'आतो लोप इटि च'[231] इति आकारलोपेन गोदः इति इष्टरूपसिद्धिः स्यात् तेन हल्ग्रहणं निरर्थकं भवेत् तर्हि सूत्रे हल्ग्रहणं किमर्थं कृतमिति चेद् उच्यते 'असिद्धविषयेऽपि विप्रतिषेधसूत्रं प्रवर्तते' इति ज्ञापयति। एवञ्च परत्वाद् ईत्वमेव स्यात्। तस्माद् ईत्ववारणाय हल्ग्रहणं कृतं सूत्रे इत्येवं ज्ञापकत्वप्रकारः एकः।

---

229 पा. सू. 6.4.66

230 पा. सू. 6.4.22

231 पा. सू. 6.4.64

## द्वितीयोऽध्यायः

द्वितीयस्तावत्, सूत्रस्वरूपम् इत्थं तावद् अस्तु, 'आतो लोप इटि च', ततः 'घुमास्थागापाजहातिसां' लोपो भवति अजादौ क्ङिति परे इत्यर्थः स्यात्। ईत्वबाधनाय अयं लोपो विधीयते अजादौ क्ङिति। ततः 'ईत्' घुमास्थादीनामीच्च भवति। ततः 'एर्लिङि'[232], 'वान्यस्य संयोगादेः'[233], 'न ल्यपि'[234] 'मयतेरिदन्यतरस्याम्'[235], 'यति'[236] इत्येवं सूत्रस्वरूपमस्तु। एवं सूत्रन्यासे स्थिते हलादौ क्ङिति घुमास्थादीनामीत्वम् अजादौ क्ङिति तु लोप इति व्यवस्थायाः सिद्धत्वात् हल्ग्रहणं व्यर्थं स्यात्। अर्थाद् एवं लघीयसा न्यासेन सिद्धे सति यद् हल्ग्रहणं करोति तज्ज्ञापयति आचार्यः यत् गरीयांसं यत्नम् आरभते तद् व्यर्थं सद् 'इह विप्रतिषेधः भवति' इति ज्ञापयति। तेन परत्वाद् गोद इत्यत्र आलोपं बाधित्वा ईत्वे प्राप्ते तन्निवारणाय हल्ग्रहणं सार्थकम्। फलञ्च अनुनासिकलोपात् परत्वात् सात इत्यादावात्वसिद्धिः इति।

वस्तुतस्तु हल्ग्रहणं न क्रियते चेदपि पूर्वोक्तयोगन्यासपद्धत्या गोद इत्यादौ ईत्वबाधनार्थं यः योगविभागो विहितः तेन लोपः कृतः। तेन इष्टसिद्धिः स्यात्। तेन हल्ग्रहणस्य स्वांशे चारितार्थ्यं तु न स्याद् इति इदं भाष्यम् एकदेश्युक्तिः न तु सिद्धान्त्युक्तिः।

---

232 पा. सू. 6.4.67
233 पा. सू. 6.4.68
234 पा. सू. 6.4.69
235 पा. सू. 6.4.70
236 पा. सू. 6.4.71

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

*प्रदीपोद्द्योते* च आचार्यः पाणिनिः अपवादं लोपम् उक्तवान्, ततः तस्य लोपस्य ईत्वम् अविशेषेण उत्सर्गं विदध्यात् इति तात्पर्यम्। पुनः अजादौ हलादौ च सामान्येन विहितस्य ईत्वस्य अजादौ किति ङिति च अपवादः लोपः इति हल्ग्रहणं विनापि सिध्यति इति हल्ग्रहणं तज्ज्ञापकम् एव इति हल्ग्रहणस्य ज्ञापकत्वम् उक्तम् इत्येवं मतमुपस्थाप्य सर्वशास्त्रनिष्णातः आचार्यः नागेशः ब्रूते यत् "परे तु ज्ञापितेऽपि पूर्वोक्तन्यासेनैव सिद्धे हल्ग्रहणस्य चारितार्थ्याभावात् कथं ज्ञापकत्वमिति चिन्त्यमेतत्। तस्मादत्र ज्ञापकोपन्यासपरो ग्रन्थ आचार्यदेशीयस्य।"[237] "सनोतेरनुनासिकलोपादात्वं विप्रतिषेधेन" (वा. 6543) इति वार्त्तिकस्य यः आशयः अर्थात् अत्र विप्रतिषेधः भवति इति सिद्धान्तिकथनम् अस्ति। तदेव उक्तं नागेशमहाभागेन-" 'भवतीह विप्रतिषेधः' इत्येव सिद्धान्त्युक्तिः, द्वयोरसिद्धत्वेऽपि तुल्यबलत्वाहानिरित्याशयेन"[238] इति। अनुनासिकलोपः आत्वविधानम् इत्युभौ असिद्धौ भवतः अपि उभयोः तुल्यबलत्वहानिस्तु नास्ति इति भाष्याशयेन नागेशः कथयति अत्र विप्रतिषेधः एव भवति। तथा च स कथयति यत् "उभयोः परस्परमसिद्धत्वारोपमात्रं, नैतावता सर्वथा शास्त्रयोरभावः। विप्रतिषेधसूत्रे च यथोद्देशपक्ष एव, कार्यकालपक्षेऽपि तदुपस्थितिसामर्थ्यादसिद्धत्वबोधो वेति तत्त्वमित्याह" इति।[239]

---

237 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 307

238 तत्रैव

239 तत्रैव

एवम् उभयस्थले अपि ग्रन्थकर्तुः आशयस्य परिशीलनेन यद् विषयविमर्शसाम्यं तद् *ज्ञापकसंग्रहस्य* नागेशभट्टकर्तृत्वं बोधयति।

### 2.4.1.4. तेन भाषायामपि बेभिदीति चेच्छिदीतीत्येतत् सिद्धं भवतीति भाष्योक्त्या अन्ययङ्लुगन्तानां *भाष्ये* असाधुतैव लभ्यते।

'तेन भाषायामपि बेभिदीति चेच्छिदीतीत्येतत् सिद्धं भवतीति भाष्योक्त्या अन्ययङ्लुगन्तानां *भाष्ये* असाधुतैव लभ्यते' इति *ज्ञापकसंग्रहे*, 'एवं चैतत्प्रयोगद्वयातिरिक्तयङ्लुगन्तं भाषायामसाध्वेव' इति *प्रदीपोद्द्योते*।

*महाभाष्ये* लोके बेभिदीति चेच्छिदीति द्वयोरेव यङ्लुगन्तयोः उदाहरणेन अन्ये धातवः यङ्लुगन्ताः लोके असाधवः इति भाष्याशयप्रकटनकाले *ज्ञापकसंग्रह*कारः यत् कथयति तदेव *उद्द्योत*कारो ब्रूते इति तयोः कर्ता एक एव नागेशभट्टः इति समर्थयितुं शक्यते। तथाहि ज्ञापकंसग्रहे तावत्- 'बहुलं छन्दसि'[240], 'यङोऽचि च'[241], 'जुहोत्यादिभ्यः श्लुः'[242] इत्येवं सूत्रक्रमः अस्ति। इह 'यङोऽचि च' इत्यस्मिन् शास्त्रे 'बहुलं छन्दसि' इत्यतः छन्दसि इति पदस्य यदि अनुवृत्तिः स्यात् तदा तु यङ्लुक् छन्दोमात्रविषयो भवति तेन लोके तु यङ्लुगन्तप्रयोगः असाधुः स्यात्। तदा उच्यते अत्र दोषो न भविष्यति। कुत इति चेत्, अस्ति अत्र ज्ञापकं,

240 पा. सू. 2.4.73

241 पा. सू. 2.4.74

242 पा. सू. 2.5.75

'हुश्नुवोः सार्वधातुके'[243] इति सूत्रस्थं हुश्नुग्रहणम् इति। तस्य च सूत्रस्य अयम् अर्थः यत्, अनेकाच्-अङ्गस्य 'हु' तथा 'श्नु' एतयोः असंयोगपूर्वस्य उवर्णस्य अजादौ सार्वधातुके प्रत्यये परे यणादेशः भवति इति। जुह्वति, शृण्वति इत्यादीनि तदुदाहरणानि।

अत्रोच्यते हुश्नुग्रहणं किमर्थम्।[244] तथा च यदि सूत्रे हुश्नुग्रहणं न क्रियते, तथापि हुश्नुवोः इति लभ्यते एव। सार्वधातुकप्रत्यये परतः अनेकाजुवर्णान्तं चाङ्गं हुश्नुभ्याम् अन्यत् तु नास्ति। एवञ्च हुश्नुवोः इति व्यर्थम्। यदि च उच्यते 'युवं योयुवतीनां वृषभम्', 'भवतु रोरुवतीनाम्' इत्यादौ वेदे योयु इत्यादिकं यङ्लुगन्तम् अनेकाजसंयोगपूर्वम् उवर्णान्तम् अस्ति। तन्निवृत्त्यर्थं हुश्नुग्रहणं कृतम् इति चेन्न, कुतः इति चेत्, 'छन्दस्युभयथा'[245] इति शास्त्रेणैव शतृप्रत्ययस्यार्धधातुकत्वस्य आश्रयणेन सार्वधातुकत्वस्य अभावात् तत्र प्रकृतसूत्रप्रवृत्तिरेव न स्यात्। अन्येऽपि हि धातुप्रत्ययाश्छन्दस्युभयथा दृश्यन्त इति। तेन हुश्नुग्रहणं व्यर्थं स्यात्। एवञ्च हुश्नुग्रहणं व्यर्थं सद् ज्ञापयति यद् भाषायाम् अपि यङ्लुगन्तं साधु इति। भाषाशब्दार्थः लोकः इति। एवञ्च लोके योयुवति, रोरुवति इत्यादिप्रयोगेषु यङ्लुगन्तेषु 'छन्दस्युभयथा' इति सूत्रस्य अप्रवृत्तिः न भवेत्, तेन सार्वधातुकशतृप्रत्यये परतः यणादेशं वारयितुं हुश्नुग्रहणं विहितम् इति स्वांशे

243 पा. सू. 6.4.87

244 हुश्नुवोः इति किम्? योयुवति। रोरुवति। इदम् एव हुश्नुग्रहणं ज्ञापकं भाषायामपि यङ्लुगस्तीति। (का. वृ., प. भा.)

245 पा. सू. 3.4.117

चारितार्थ्यम्। किमस्ति अस्य फलमिति चेत् लोके बेभिदीति चेच्छिदीति इत्यादियङ्लुगन्तप्रयोगाः साधवः सन्ति। इमम् एव आशयं प्रकटयितुं *ज्ञापकसंग्रह*कारो ब्रूते- "हुश्नुग्रहणं भाषायामपि यङ्लुको ज्ञापकम्। तेन भाषायामपि बेभिदीति चेच्छिदीतीत्येतत् सिद्धं भवतीति भाष्योक्त्या अन्ययङ्लुगन्तानां *भाष्ये* असाधुतैव लभ्यते"[246] इति।

अयमेव आशयः प्रकटितः *प्रदीपोद्द्योते*। तद्यथा- किमर्थं हुश्नुवोः ग्रहणम्। तत्र बहुविधानि उत्तराणि एकदेश्युक्तित्वेन स्वीकृतानि। अन्ते च "यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति, तदर्थमिदम्। युवं योयुवतीनां वृषभम्', भवतु रोरुवतीनाम्।"[247] इति सिद्धान्त्युक्तिः इति भाष्यकारेण उक्तम्। तच्च *उद्द्योत*कारः स्वीकरोति। तदुनासेरण हुश्नुवोरिति ग्रहणम् असिद्धत्वस्य अनित्यत्वस्य ज्ञापनार्थम्, श्नसोः इति तपरत्ववदिति तदाशयः। यथा 'श्नसोरल्लोपः' इति सूत्रे भाष्ये तत्रत्यतपरकरणस्य प्रत्याख्याने सत्यपि 'अत एक'[248] इति सूत्रे श्नसोरत्त्वे तकारेण ज्ञाप्यते तु एत्वानुशासनम् इतिवद् इति *उद्द्योत*-कारस्याशयः।[249] अन्यत्सर्वम् एकदेश्युक्तिरिति ज्ञेयम्। तस्मादेव प्रकृतसूत्र-व्याख्यानस्य अन्ते 'इत्येतत्सिद्धं भवति'[250] इत्युक्तिः पतञ्जलेः। अन्यथा ज्ञापितं

---

246 ज्ञा. स., पृ. 95

247 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 334

248 पा. सू. 6.4.120

249 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 333-334

250 तत्रैव

चेदपि हुश्नुवोः इत्यस्य चारितार्थ्याय उवर्णान्तेभ्यः अपि अस्य लोके आवश्यकतया 'इत्यादि सिद्धं भवति' इति कथयेत्। एवञ्च एतत्प्रयोगद्वयातिरिक्तयङ्लुगन्तं लोके साधु नास्त्येव। एतदेव मनसि निधाय भाष्यकारः 'क्ङिति च' इति शास्त्रे रोरवीति इत्यस्य छान्दसत्वम् उक्तं स्यात्। पुनः *उद्द्योत*कारः कथयति यत्- "किञ्च किमेतस्य ज्ञापने प्रयोजनम् इति प्रश्नस्य लोके उवर्णान्तयङ्लुगन्तप्रयोगादर्शनमेव बीजम्। तत्र तत्प्रयोगादर्शनेनास्योत्तरस्यैक-देश्युक्तित्वमावश्यकम्। 'यङोऽचि च'[251] इति सूत्रे चलभ्यवाक्यभेदलभ्य-स्यानैमित्तिकयङ्लुको बहुलग्रहणानुवृत्त्या यथाप्रयोगं लोकेऽपि लाभेन ज्ञापकानुपयोगाच्चेति बोध्यम्" इति।[252]

एवञ्च अत्र स्थले *ज्ञापकसंग्रह*स्य आशयः *प्रदीपोद्द्योता*शयेन तुल्यः भाति इति सिद्धान्तसाम्याद् *ज्ञापकसंग्रह*कर्ता नागेशभट्टः इति प्रतिभाति।

### 2.4.1.5. इत उत्तरं स्थानिवत्त्वाभावज्ञापकमग्लोपिग्रहणमिति भाष्यं त्वेकदेश्युक्तिः।

'इत उत्तरं स्थानिवत्त्वाभावज्ञापकमग्लोपिग्रहणमिति भाष्यं त्वेकदेश्युक्तिः' इति *ज्ञापकसंग्रहे*, 'इत उत्तरं स्थानिवत्त्वाभावज्ञापनपरं पूर्वभाष्यं त्वेकदेश्युक्तिः' इति *प्रदीपोद्द्योते*।

---

251 पा. सू. 2.4.74

252 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 333-334

'नाग्लोपिशास्वृदिताम्'[253] इति शास्त्रस्य णिचि अग्लोपिनः शस्तेर्ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ परत इत्यर्थः। तथा च *काशिका*याम्- "अग्लोपिनामङ्गानां शासेः ऋदितां च णौ चङि उपधाया ह्रस्वो न भवतीति।"[254]

अग्लोपिन उदाहरणानि तावत्- मालामाख्यद् अममालत्, मातरमाख्यद् अममातरत्, राजानमतिक्रान्तवान् अत्यरराजत् इति। तत्र मालामाख्यद् इत्यर्थे मालाशब्दात् 'तत्करोति तदाचष्टे' इति णिच्प्रत्यये लुङ्लकारे अडागमे चङि च अ माला इ अत् इति जाते 'णाविष्ठवत्' इति टिसंज्ञकस्य आकारस्य लोपे माशब्दस्य द्वित्वादिकार्ये च अ ममाल् इ अत् इत्यवस्थायामुपधाह्रस्वो निषिध्यते अङ्गस्य आकाररूपाग्लोपवत्त्वात्। अत्रोच्यते यदि 'अचः परस्मिन् पूर्वविधौ'[255] इति सूत्रेण टिलोपस्य स्थानिवद्भावेन मकारोत्तरस्य आकारस्य उपधात्वं न स्यात्। ततः 'णौ चङ्युपधायाः ह्रस्वः'[256] इति सूत्रेण ह्रस्वस्य प्राप्तिरेव नास्ति। तेन नाग्लोपीति निषेधः व्यर्थः खलु।

एतस्य उत्तरं ददाति *ज्ञापकसंग्रह*कारः यत् "अग्लोपे स्थानिवद्भावेनैव सिद्धे अग्लोपिग्रहणम् अग्वतां लोपोऽप्यग्लोपिशब्देन गृह्यते इत्येवमर्थम्"[257] इति। अर्थात् अग्वान् यः समुदायः तस्य लोपः अपि अग्लोपग्रहणेन गृह्यते इति एतदर्थम्

---

253 पा. सू. 7.4.2

254 का. वृ., ष. भा., पृ. 132-133

255 पा. सू. 1.1.57

256 पा. सू. 7.4.1

257 ज्ञा. स., पृ. 108

अग्लोपिग्रहणम्। तथा च राजानम् अतिक्रान्तवान् इत्यर्थे 'अत्यरराजत्' इत्यत्र णिच्प्रत्यये लुङ्लकारे चङि च 'अन्' इति टिसंज्ञकस्य लोपे विधीयमाने अरराज् अत् इत्यत्र उपधायाः ह्रस्वनिषेधः सिध्यति। प्रकृते अन् इति समुदायः तु अक् नास्ति। तस्मात् अन् इत्यस्य लोपः यथाश्रुते अग्लोपशब्देन न स्वीक्रियते। किन्तु यदि अग्वतः लोपः अपि अग्लोपशब्देन गृह्यते इत्युक्ते तु अन् इति समुदायस्याकाररूपाग्वत्त्वात् तल्लोपयुक्तम् अङ्गम् अग्लोपि भवतीति 'नाग्लोपि' इति उपधायाः ह्रस्वनिषेधः सिद्धः। एवञ्च अममालत् इत्यादौ स्थानिवद्भावेन सिद्धेऽपि 'अत्यरराजत्' इत्यत्र अज्झल्समुदायादेशस्य लोपस्य अजादेशत्वाभावात् नास्ति प्रवृत्तिः स्थानिवत्त्वस्य, तस्माद् उपधाह्रस्वनिषेधलाभार्थमग्लोपिग्रहणं विहितम्। तच्च अग्वतां लोपः अपि अग्लोपग्रहणेन गृह्यते इति स्वीकृते एव सार्थकमिति आशयः। "एवं तर्हि सिद्धे सति यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः इत उत्तरं स्थानिवद्भावो न भवतीति"[258] एवं नाग्लोपीति प्रतिषेधस्य अर्थान्तरज्ञापकत्वं प्रोक्तम्। किन्तु तस्य एकदेश्युक्तित्वमिति *महाभाष्यप्रदीप*व्याख्यानेन स्पष्टं भवतीति *ज्ञापकसंग्रह*कारस्य आशयः।

*महाभाष्यप्रदीपे* वस्तुतः स्थानिवत्त्वाभावपरभाष्यं तु एकदेशिभाष्यम्। कथमिति चेत् 'इत उत्तरं स्थानिवद्भावो न भवति' इति यदुक्तं, तस्य किं प्रयोजनमिति चेत् पूर्वत्रासिद्धे न स्थानिवदित्युक्तन्न वक्तव्यं भवति। यदि च एतद्

258 म. भा., ष. ख., सम्पा. दधिरामशर्मा, पृ. 237-239

ज्ञाप्यते तदा आदीधयतेः- आदीधकः इति, आवेवयतेः आवेवकः इति 'यीवर्णयोर्दीधीवेव्योरिति लोपः न प्राप्नोति'।[259] यत्प्रलुनीहि अत्र इति 'तिङि चोदात्तवति' इत्येषः स्वरो न प्राप्नोति। दीधीधातोः णिचि दीधीवेवीटामिति गुणवृद्धिप्रतिषेधः। ततः ण्वुलि लोपे विहिते तस्य स्थानिवद्भावाद् यीवर्णयोरिति लोपः न प्राप्नोति। यद्यपि अन्तरङ्गत्वात् लोपः सिध्यति तथापि वर्णग्रहणस्यानन्यार्थस्य प्रयोजनाख्यानाय आक्षेपः विहितः। प्रथमस्थले तु यीवर्णयोरित्यत्र वर्णग्रहणसामर्थ्याद्भविष्यति। संदर्भे अस्मिन् कैयटो ब्रूते- "तत्तु केचिज्ज्ञापकं वर्णयन्ति- उत्तरत्र स्थानिवत्त्वाभावस्य अग्लोपिग्रहणं तु सति प्रयोजने न ज्ञापकमस्यार्थस्य इति।"[260] यीवर्णयोरित्यत्र परसमाहारद्वन्द्वगर्भेतरेतरयोगसमासः। यकारे इकारे च वर्णे परतः इति तदर्थः। तत्र सन्निहितत्वाद् वर्णशब्देनेवर्ण एव। एतत्सामर्थ्यात् च लुप्तेऽपि तस्मिन् भूतपूर्वगत्या लोपः। तदेव उच्यते कैयटे- "वर्णग्रहणाद् भूतपूर्वगतिः आश्रीयते"[261] इति। तस्मादेव अचः परस्मिन् इत्यत्र आदीध्ये इति भाष्यप्रयोगः सङ्गच्छते। वस्तुतः अन्तरङ्गत्वेन णिलोपात्पूर्वं यीवर्णयोरिति लोपे न इदम् अस्य फलं, तत्कथयति कैयटः- "अन्तरङ्गत्वाल्लोपे सिद्धे वर्णग्रहणम् अकर्तुं शक्यम्।"[262] अत्र *उद्द्योत*कारः कथयति यत् "इत उत्तरं स्थानिवत्त्वाभावज्ञापनपरं पूर्वभाष्यं तु एकदेश्युक्तिरित्युक्तमेव कैयटेन ध्वनितञ्च।

259 तत्रैव
260 तत्रैव
261 तत्रैव
262 तत्रैव

एतेन वर्णग्रहणसामर्थ्याच्छ्रूयमाणेवर्ण एव लोपः। तेन 'आदीध्यक' इत्येवेति हरदत्तोक्तमपास्तं, भाष्यविरोधात्। तस्मात्सिद्धान्ते न्यायप्राप्तार्थानुवादकमेव वर्णग्रहणमिति तत्त्वम्" इति।[263]

एवञ्च *प्रदीपोद्द्योतज्ञापकसंग्रह*योः अध्ययनेन इदम् आयाति यत् 'अचः परस्मिन् पूर्वविधौ' इति शास्त्रे हलचोरादेशो न स्थानिवत् इति भाष्ये निर्णीतः अस्ति, तेनैव गतार्थत्वाद् 'इत उत्तरं स्थानिवत्त्वाभावज्ञापकमग्लोपिग्रहणम् इति भाष्यं त्वेकदेश्युक्तिः' इत्याशयस्य *ज्ञापकसंग्रहे उद्द्योते* च लभ्यत्वात् उभयोः कर्ता एक एव नागेशभट्टः इति गम्यते।

## 2.4.1.6. अदन्तपिच्छादितुन्दाद्यन्यतरपाठेनैव सिद्धे भेदेन पाठो ज्ञापयति लजन्यतरस्यामिति समुच्च इति।

" 'सिध्मादिभ्यश्च'। अदन्तपिच्छादितुन्दाद्यन्यतरपाठेनैव सिद्धे भेदेन पाठो ज्ञापयति 'लजन्यतरस्यामिति समुच्चये' इति। 'केशाद्वोऽन्यतरस्याम्'। इत्यन्यतरस्यांग्रहणस्य पुनःकरणाच्चेदं समुच्चयार्थम्" इति *ज्ञापकसंग्रहे*, "समुच्चयार्थः न विकल्पार्थः इत्यर्थः" इति *प्रदीपोद्द्योते*।

सिध्मादिगणपठितेभ्यः प्रथमान्तसमर्थसुबन्तेभ्यः मत्वर्थे विकल्पेन लच् अपि भवति। पक्षे मतुप्-प्रत्ययः तु विधीयते एव इत्येव इति सिध्मादिसूत्रार्थः।

263 तत्रैव

अत्रोच्यते सिध्मादिसूत्रे 'प्राणिस्थादातो लजन्यतरस्याम्'[264] इति शास्त्राद् 'अन्यतरस्याम्' इत्यनुवर्तते। तथा च सिध्मादिभ्यः मत्वर्थे अन्यतरस्यां लच् भवतीति सूत्रार्थः प्राप्यते। तथा सति सिध्मादिगणे यानि अकारान्तानि तेभ्यः विकल्पेन लच् विहितः भवति। तथा विहिते लचः अभावपक्षे 'अत इनिठनौ'[265] इति योगेन इनिठनौ अपि प्राप्नुतः। किन्तु तन्नेष्यते, इष्यते तु मतुप्प्रत्ययः एव। तत्साधयितुं *ज्ञापकसंग्रह*कारो ब्रूते- "अदन्तपिच्छादितुन्दाद्यन्यतरपाठेनैव सिद्धे भेदेन पाठो ज्ञापयति 'लजन्यतरस्यामिति समुच्च' "[266] इति। अर्थात् निपातानाम् अनेकार्थत्वात् अन्यतरस्यामिति शब्दः अत्र सूत्रे अनुवृत्तः समुच्चयार्थकः न तु विकल्पार्थकः। तस्माद् अन्यतरस्यांग्रहणेन मतुप्प्रत्ययः अनायासेन समुच्चीयते। ततः सिध्मादिभ्यः लच् मतुप् च भवतः इति सूत्रार्थः फलति। तेन इनिठनौ तु न प्रसक्तौ।

अत्र तावत् प्रश्नः समुदेति यद्, अन्यतरस्यामिति शब्दः समुच्चयार्थः इत्यत्र किं ज्ञापकम् इति चेत् पिच्छादीनां तुन्दादीनां च पृथक् सूत्रे ग्रहणमिति गृह्यताम्। तेन 'तुन्दादिभ्य इलच्च'[267] इत्येकं सूत्रम्। तत्र इलच् इनिठनौ मतुप् चेति चत्वारः प्रत्ययाः इष्यन्ते। अत्रोच्यते यत्, यदि अन्यतरस्यांग्रहणस्य अनुवृत्त्या तत्प्रत्ययचतुष्टयं सिध्मादिभ्यः अपि स्यात् तर्हि अस्यैव अन्यतरस्यांशब्दस्य

264 पा. सू. 5.2.96

265 पा. सू. 5.2.115

266 ज्ञा. स., पृ. 78

267 पा. सू. 5.2.117

## ज्ञापकसंग्रहकर्तृत्वविचारः

'लोमादिपामादिपिच्छादिभ्यः शनेलचः'[268] इति सूत्रे अपि अनुवृत्त्या पिच्छादिभ्यः अपि तत्प्रत्ययचतुष्टं स्यात्। एवं सति तुन्दादिषु एव पिच्छादयः पठितव्याः। तेन पाठेन तुन्दादिभ्यः 'लोमादिपामादि' इति प्रत्ययचतुष्टस्य सिद्धिः स्यात्, तेन 'तुन्दादिभ्य इलच्च' इति पृथक् सूत्रमनावश्यकम्।

अथवा पिच्छादिष्वेव तुन्दादयः पठनीयाः। अर्थात् तुन्दादिगणे पिच्छादीनां पाठादेव पिच्छादिभ्यः 'तुन्दादिभ्य इलच्च' इति शास्त्रेण तत्प्रत्ययचतुष्टयस्य सिद्धिः स्यात्। तेन 'लोमादिपामादि' इति सूत्रे पिच्छादिग्रहणं निरर्थकं स्यात्। एवञ्च पिच्छादितुन्दाद्योः पृथक्पाठस्य पृथग्योगकरणस्य च युक्तिरेव नास्ति। अतः 'सिध्मादिभ्यश्च'[269] इति शास्त्रे अन्यतरस्यांशब्दः 'समुच्चयार्थः न विकल्पार्थः' इति ज्ञापयति। तेन अन्यतरस्यांग्रहणेन मतुप्प्रत्ययः समुच्चीयते, न यथाप्राप्तम् अभ्यनुज्ञायते। तस्मात् सिध्मादिपिच्छादिभ्यः इनिठनौ न भवतः। अर्थात् प्रकृतस्य मतुप्प्रत्ययस्य समुच्चयेन लच्-मतुप् इत्यनयोः प्रत्यययोः सिद्धौ अपि तत्प्रत्ययचतुष्टयं तुन्दादिभ्यः न स्यात्। अतः पिच्छादिभ्यः पृथक् 'तुन्दादिभ्य इलच्च' इति लक्षणं कृतम्। तस्य च शास्त्रस्य इनिठन्भ्यां परं प्रवृत्तेः चकारबलेन मतुप् इनिठनौ चेति प्रत्ययाः समुच्चीयन्ते इत्येवं चतुर्णां प्रत्ययानां सिद्धिः भवति। सिध्मादिपिच्छादिसूत्रयोस्तु इनिठनोः पूर्वं पाठेन समुच्चयार्थकेन अन्यतरस्यांग्रहणेन पूर्वप्रकृतः मतुप्प्रत्ययः एव समुच्चीयते इति तेभ्यः द्वौ प्रत्ययौ भवतः इति सिध्यति।

---

268 पा. सू. 5.2.100

269 पा. सू. 5.2.97

यदि च 'अन्यतरस्याम्' इत्यस्य विकल्पार्थकत्वं तदा अभावपक्षे पूर्वेण परेण वा विहिताः सर्वेऽपि प्रत्ययाः यथाप्राप्तं स्युः। तथा च समुच्चयसमर्थकवार्त्तिकं "पिच्छादिभ्यस्तुन्दादीनां नानायोगकरणं ज्ञापकसमावेशस्य"[270] (वा. 5765) इति।

*महाभाष्ये* ज्ञापकान्तरमुच्यते- 'केशाद्वोऽन्यतरस्याम्'[271] इत्यस्मिन् शास्त्रे अन्यतरस्यांशब्दस्योपादानं नावश्यकम्। 'प्राणिस्थादातो लजन्यतरस्याम्' इत्यस्माद् अन्यतस्यांपदानुवत्त्या एव कार्यसिद्धिः भविष्यति। अतः प्रकृतसूत्रे अन्यतरस्यांपदं व्यर्थं 'सिध्मादिभ्यश्च' इति सूत्रे अनुवृत्तम् अन्यतरस्यांपदं समुच्चयार्थकम् इति ज्ञापयति। एवञ्च 'केशाद्व' इत्यस्मिन् सूत्रे यदि अन्यतरस्याम् इति पदस्य तथानुवृत्तिः स्यात् तदा समुच्चयार्थः एव लभ्येत। विकल्पार्थः तु इष्यते तस्मात् केशाद्वोऽन्यतरस्याम्' इत्यस्मिन् शास्त्रे पृथग् अन्यतरस्यांग्रहणं विहितम्। अतः पक्षे इनिठनौ अपि प्राप्येते। तस्मादेव केशवः केशिकः केशवान् केशी इति रूपचतुष्टयं सिध्यति। तदेव कैयटः वदति- "केशाद्वः इत्येव वक्तव्यम्। तत्र प्रकृतान्यतरस्यांग्रहणानुवृत्त्या ठन्-इनि-मतुपो भविष्यन्तीति किमन्यतरस्यांग्रहणेन ठन्-इनिप्राप्त्यर्थेन। तत्पुनः क्रियमाणम्- पूर्वस्यान्यतरस्यांग्रहणस्य मतुप्सम्च्चयार्थत्वं ज्ञापयतीत्यर्थः"[272] इति।

---

270 म. भा., ष. ख., सम्पा. भार्गवशास्त्री, पृ. 351

271 पा. सू. 5.2.109

272 म. भा., ष. ख., सम्पा. भार्गवशास्त्री, पृ. 351

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

केचन तु तज्ज्ञापकाभावमिच्छन्ति। तेषां नये- 'केशाद्वोऽन्यतरस्याम्' इत्यस्मिन् शास्त्रे अन्यतरस्यांग्रहणं 'द्युद्रुभ्यां मः'[273] इति पूर्वसूत्रस्य अनित्यत्वज्ञापनार्थम् अस्ति। अन्यथा तत्रापि अन्यतरस्यामिति पदस्य अनुवृत्तिः क्रियते चेत् तस्यापि अनित्यत्वापत्तिः। तस्माद् 'द्युद्रुभ्यां मः' इति सूत्रे अन्यतरस्याम् इत्यस्य निवृत्तिं ज्ञापयति। एतदेव *ज्ञापकसंग्रह*कारः कथयति- "द्युद्रुभ्यां नित्यार्थमेके एतदन्यतरस्यां ग्रहणमिच्छन्ति विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति"[274]

एवञ्च *प्रदीपोद्द्योतज्ञापकसंग्रह*योः अध्ययनेन इदम् आयाति यत् 'सिध्मादिभ्यश्च' इति सूत्रे अनुवृत्तम् अन्यतरस्यांपदं समुच्चयार्थकम् इति। तस्माद् उभयोः कर्ता एक एव नागेशः इति अनुमातुं शक्यते।

वस्तुतस्तु 'द्युद्रुभ्यां मो नित्यम्' इति नित्यपदं संयुज्य नित्यत्वं साधयितुं शक्यम्, तदर्थम् उत्तरसूत्रे अन्यतरस्यांपदोपादानम् इत्येतत् न युज्यते इत्यन्यतरस्यांग्रहणं ज्ञापकम् एव। एतदेव *प्रदीपोद्द्योते* लिख्यते नागेशेन यत् "वस्तुतस्तु 'द्युद्रुभ्यां मो नित्यम्' इत्येव सिद्धे 'अन्यतरस्यां'ग्रहणं ज्ञापकमेव। इदमेव भाष्ये- 'एके' इत्यत्रारुजिबीजमिति।"[275]

एवञ्च एतैः उदाहरणैः स्पष्टं ज्ञायते यत् *प्रदीपोद्द्योत*सिद्धान्तः अपि *ज्ञापकसंग्रहे* दृश्यते। तर्हि यद्यपि ग्रन्थभेदेन आनुपूर्वीभेदः अस्ति तथापि

---

273 पा. सू. 5.2.108

274 ज्ञा. स., पृ. 78

275 म. भा., ष. ख., सम्पा. भार्गवशास्त्री, पृ. 351

सिद्धान्तभेदस्तु नास्ति एव। अतः य एव *उद्द्योत*कर्ता नागेशः स एव *ज्ञापकसंग्रहस्य* कर्ता इत्यस्मिन् विषये असंदेहः भवेत्।

एवम्प्रकारेण *प्रदीपोद्द्योतज्ञापकसंग्रह*योः उपरि उक्तानां केषाञ्चिद् विषयाणाम् परिशीलनेन *ज्ञापकसंग्रहस्य* नागेशकर्तृत्वम् उपपन्नं भवति।

*परिभाषेन्दुशेखरस्य* कर्ता नागेशभट्टः इति सर्वविदितम्। पुनरत्र *ज्ञापकसंग्रहस्य परिभाषेन्दुशेखरस्य* च केषाञ्चिद् स्थलानाम् अध्ययनेन *ज्ञापकसंग्रहस्य* नागेशकर्तृत्वं प्रतिष्ठापयितुं यथामति यत्नः करिष्यते। तदधः प्रस्तूयते-

## 2.4.2. *ज्ञापकसंग्रहपरिभाषेन्दुशेखराध्ययनम्*

| *ज्ञापकसंग्रहः* | पाणिनीयसूत्रम् | *परिभाषेन्दुशेखरः* |
|---|---|---|
| अतिङिति प्रतिषेधो ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपा। तेन गतिकारकोपपदानामिति सिद्धम्। | उपपदमतिङ् | उपपदम् इति सूत्रेऽतिङ्ग्रहणेन 'कुगति' इत्यत्र तदपकर्षणेनातिङन्तश्च समास इत्यर्थात्तयोः सूत्रयोः 'सुप्सुपा' इत्यस्य निवृत्त्यैकदेशानुमत्या कारकांशे च सिद्धेयम्। |
| ल्यब्ग्रहणं ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधत इति। | अदो जग्धिर्ल्यप्तिकिति | 'अदो जग्धिः' इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धिः' इत्यत्र भाष्ये स्पष्टम्। |
| ददातिदधात्योर्विभाषा इति ज्ञापकात् | ददातिदधात्योर्विभाषा | 'ददातिदधात्योर्विभाषा' इति |

| | | |
|---|---|---|
| नानुबन्धकृतमसारूप्यम्। | | ण-बाधकशस्य विकल्पविधायकमस्यां ज्ञापकम्। तेन गोद इत्यादौ नाणिति वासरूपसूत्रे भाष्ये स्पष्टम्। |
| हशश्वतोर्लङ् च इति ज्ञापकात् लादेशेषु वासरूपविधिर्नास्ति इति। | हशश्वतोर्लङ् च | अत्र च 'हशश्वतोर्लङ् च' इति लङ्विधानं ज्ञापकम्। |
| अत्र सानुबन्धकस्यात्वभूतस्य ग्रहणं ज्ञापयति नानुबन्धकृतमनेजन्तत्वमिति। | उदीचां माङो व्यतिहारे | 'उदीचां माङः' इति निर्देशोऽस्या ज्ञापकः। |

## 2.4.2.1. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः।

"अतिङिति प्रतिषेधः ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपा (सू. 2-1-4) इति। तेन गतिकारकोपपदानामिति सिद्धम् इति *ज्ञापकसंग्रहे*" [276] कथितम्।

तस्य चायम् आशयः यद्, उपपदस्य तिङन्तेन सह समासः यथा न स्यात् तदर्थं सूत्रे अतिङ् इति ग्रहणं कृतम्। किन्तु तदर्थं सूत्रे अतिङ्ग्रहणस्य आवश्यकता एव नास्ति। कारणं हि अस्मिन् सूत्रे 'सुबामन्त्रिते पराङ्गवत् स्वरे'[277]

---

276 ज्ञा. स., पृ. 49

277 पा. सू. 2.1.2

इति सूत्रात् 'सुप्' इत्यस्य तथा 'सह सुपा'[278] इत्यतः 'सुपा' इत्यस्य च अनुवृत्तिः भवति। तेन उपपदस्य सुबन्तेन सह समासः सिध्यति एव। तेन अतिङ्ग्रहणं व्यर्थं भवति, व्यर्थं भूय च 'सुपा' इति पदस्य अनुवृत्तिः न भवति इति ज्ञापयति। तेन उपपदसुबन्तस्य असुबन्तेन सह समासः भवति। अर्थात् उपपदसमासः समोसोत्पत्तेः पूर्वमेव भवति।

गतिसमासः अपि असुबन्तेन सह भवति। कथमिति चेत् 'कुगतिप्रादयः'[279] इति सूत्रे 'उपपदमतिङ्'[280] इति शास्त्राद् 'अतिङ्' इत्यस्य अपकर्षः भवति। तेन गतिसंज्ञकस्य अतिङन्तेन सह समासः भवति इत्यर्थः लभ्यते। किन्तु अत्रापि पूर्ववत् सुप्सुपा इति अनुवृत्त्या एव सिध्यति। तेन अतिङ् इति अपकर्षणं व्यर्थ सद् ज्ञापकं भवति अत्रापि 'सुपा' इत्यस्य अनवृत्तिः न भवति। अर्थाद् गतिसंज्ञकसमासः अपि सुबुत्पत्तेः पूर्वं भवति। एवं स्थालीपुलकन्यायेन कारकांशे अपि ज्ञेयम्। तथा चोक्तं नागेशेन- " 'उपपदम्' इति सूत्रेऽतिङ्ग्रहणेन 'कुगति' इत्यत्र तपदकर्षणेनातिङन्तश्च समास इत्यर्थात्तयोः सूत्रयोः सुप्सुपा इत्यस्य निवृत्त्यैकदेशानुमत्या कारकांशे च सिद्धेयम्" इति।[281]

**अत्रावधेयम्**– *ज्ञापकसंग्रहे* केवलं कथम् इदं ज्ञाप्यं ज्ञापितं तद्विषये अर्थात् केवलं ज्ञाप्यसिद्धिविषये आलोचना विहिता। नागेशस्य *परिभाषेन्दुशेखरे* अपि

278 पा. सू. 2.1.4

279 पा. सू. 2.2.18

280 पा. सू. 2.2.19

281 प. भा. शे., पृ. 326

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

आदौ परिभाषासिद्धिः कथं भवतीति उक्तम्। अर्थात् अस्य ज्ञाप्यस्य परिभाषारूपत्वम् अस्ति। अर्थाद् तद् एकस्मिन् ग्रन्थे ज्ञाप्यरूपम्, अपरस्मिन् च परिभाषारूपम् अस्ति। पुनश्च एतदपि स्मर्तव्यं यत् पाणिनीयव्याकरणसम्प्रदाये ज्ञापकसिद्धपरिभाषात्वेन "कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्" इतीयं परिभाषा स्वीक्रियते।

किन्तु *परिभाषेन्दुशेखरे* इतः अपि आलोचना विहिता अस्ति। गतेः, उपपदस्य, कारकस्य चेति सर्वेषाम् उदाहरणसंयोगेन आलोचना कृता।

पुनश्च इयम् परिभाषा अनित्या। तथा चोक्तं नागेशमहाभागेन- "अस्या अनित्यत्वात् क्वचित् सुबुत्पत्त्यनन्तरमपि समासो, यथा 'सा हि तस्य धनक्रीते'ति।"[282] पुनः नागेशः अन्येषां वैयाकरणानां मतमुपस्थाप्य तत् खण्डितवान्। तेन उक्तं- "अन्ये तु, अनित्यत्वे न मानम्, तत्र अजादित्वाट्टाबित्याहुः। अत एव कुम्भकार इत्यादौ षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव। षष्ठीसमासाभावे चोपपदसमासकृत एकार्थीभाव इति, न तत्र वाक्यमिति *भाष्ये* स्पष्टम्। तत्र हि 'षष्ठीसमासादुपपदसमासो विप्रतिषेधेन'ति वार्त्तिकम्। अथवा 'विभाषा षष्ठीसमासो, यदा न षष्ठीसमासस्तदोपपदसमास' इति तत् प्रत्याख्यातञ्च।"[283] तदेतत् सर्वं तु *ज्ञापकसंग्रहे* नैव उक्तम्।

---

282 तत्रैव

283 तदेव, पृ. 327

उभयग्रन्थानुशीलनेन ज्ञायते यद् अस्याः परिभाषायाः अनित्यत्वम् उक्तं *परिभाषेन्दुशेखरे* तेन क्वचित् सुबुत्पत्त्यनन्तरमपि समासः भवति, तस्मादेव 'सा हि तस्य धनक्रीतेति' सिध्यति। पुनः *परिभाषेन्दुशेखरे* परमतखण्डनमपि विहितम्। तदेतद् *ज्ञापकसंग्रहे* नैव प्रोक्तम्। एवम् आपातदृष्ट्या किञ्चिद् वैषम्यं प्रतीयते चेदपि ज्ञाप्यज्ञापकविषयविमर्शसाम्यात् तत्तात्पर्यसाम्याद् उभयोः ग्रन्थयोः कर्ता एक एव नागेशः इति वक्तुं शक्यते। इदमवश्यं ज्ञेयं यत् पाणिनीयसम्प्रदाये "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इत्यस्याः ज्ञापकसिद्ध-परिभाषात्वव्यवहारः भवति।

### 2.4.2.2. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते।

अन्तरङ्गपरिभाषायां स्वीकृतायां प्र धा क्त्वा इत्यवस्थायां क्त्वा इत्यस्य स्थाने ल्यप्प्रत्ययः भवति। तत्र पदद्वयम् अपेक्षमाणः समासः निमित्तं भवति। किन्तु 'दधातेर्हिः'[284] 'द्यतिस्यतिमास्थामित्तिकिति'[285] इति सूत्राभ्यां विधीयमानौ हि-इकारादेशौ धातु-प्रत्ययनिमित्तकारणात् समासात् पूर्वमेव प्राप्नुतः, तस्मात् ल्यबपेक्षया अन्तरङ्गकारणाद् अन्तरङ्गपरिभाषया प्रथममेव एतत्कार्यद्वयं स्यात्, ततः परं ल्यप्प्रत्यये विहिते सति प्रधाय, प्रस्थाय च इति न सिध्येताम्। अत एव नागेशः

284 पा. सू. 7.4.42

285 पा. सू. 7.4.40

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

*परिभाषेन्दुशेखरे* "अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते"[286] इति परिभाषां स्वीकृतवान्।

वस्तुतः *ज्ञापकसंग्रहे* "अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते" इति यद् ज्ञापितं, तस्य ज्ञापितस्य परिभाषारूपत्वम् अस्ति। उभयत्रापि 'अदो जग्धिर्ल्यप्तिकिति'[287] इति सूत्रस्थं ल्यब्ग्रहणं ज्ञापकम्। तथा च *ज्ञापकसंग्रहे* प्रोक्तम्- " 'अदो जग्धि'। ल्यब्ग्रहणं ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते"[288] इति। अर्थाद् अदो जग्धिस्तिकिति इति सूत्रे क्रियमाणे अपि कार्यं सिध्यति, क्वाप्रत्ययस्य तकारादिकित्त्वात्। तस्माद् 'प्रजग्ध्य' इत्यत्र ल्यप्प्रत्ययात् पूर्वमेव अन्तरङ्गत्वाद् जग्ध्यादेशः स्यात्। तर्हि ल्यब्ग्रहणस्य का आवश्यकता। तस्माद् ल्यब्ग्रहणं व्यर्थं सद् इमां परिभाषां ज्ञापयति। तस्यां ज्ञापितायां तु अन्तरङ्गं जग्ध्यादेशं प्रबाध्य आदौ ल्यप्प्रत्ययः भवति। ल्यपि विहिते तु तादिकित्त्वं न प्राप्यते, तेन जग्ध्यादेशः न स्यात्। अतः ल्यब्ग्रहणं कृतम्।

*परिभाषेन्दुशेखरे* अपि नागेशः वदति- " 'अदो जग्धिः' इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धिः' इत्यत्र *भाष्ये* स्पष्टम्।[289]"

---

286 प. भा. शे., पृ. 241

287 पा. सू. 2.4.36

288 ज्ञा. स., पृ. 50

289 प. भा. शे., पृ. 241

**अत्रावधेयम्-** उभयोः ग्रन्थयोः अनुशीलनेन इदम् आयाति यत् ज्ञाप्यस्वरूपम् ज्ञापकं चेति उभयत्र समानमेव। पार्थक्यमेतद् यद् *ज्ञापकसंग्रहे* प्रोक्तस्य ज्ञाप्यस्य परिभाषारूपत्वम् अस्ति। *परिभाषेन्दुशेखरे* सर्वत्र परिभाषायाः प्रस्तुत्यर्थम् अवतरणिका उल्लिखिता। तादृशी शैली तु *ज्ञापकसंग्रहे* नास्ति। प्रकृतज्ञाप्यविषये उभयग्रन्थानुशीलनेन तथा किमपि पार्थक्यं न परिलक्षितमिति उभयोः नागेशकर्तृत्वं विभाव्यते।

## 2.4.2.3. नानुबन्धकृतमनेजन्तत्वम्।

अनुबन्धाः एकान्ताः अनेकान्ताः चेति पक्षद्वयम् अस्ति। तत्र एकान्ताः अनुबन्धाः इति स्वीकृते सति 'अवदातं मुखम्' इति प्रयोगे 'दाधाघ्वदाप्'[290] इति सूत्रघटकस्य अदाप् इति निषेधस्य कारणेन घुसंज्ञा न भवति। तस्माद् 'अच उपसर्गात्तः'[291] इति सूत्रेण नकारादेशः न भवति। तेन दानम् इति न भवति।

अत्र शङ्का जायते- दै-शब्दे आत्वे विहिते परं दाशब्दे सत्यपि पकारस्तु न प्राप्यते, तेन दाप् इति रूपं तु न प्राप्यते। तर्हि अदाप् इति निषेधस्य प्राप्तिरेव नास्ति। तदा परिभाषाम् इमां कथयति नागेशः- "नानुबन्धकृतमनेजन्तत्वम्"[292] इति।

290 पा.सू. 1.1.20

291 पा. सू. 7.4.47

292 प. भा. शे., पृ. 29

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

*ज्ञापकसंग्रहे* अपि प्रोक्तम्- " 'उदीचां माङो'। अत्र सानुबन्धकस्यात्वभूतस्य ग्रहणं ज्ञापयति नानुबन्धकृतमनेजन्तत्वमिति।"[293] अस्य च ज्ञाप्यस्य परिभाषारूपत्वम् अस्ति।

तत्र 'उदीचां माङः'[294] इति निर्देशः अस्याः परिभाषायाः ज्ञापकः। 'आदेच उपदेशेऽशिति'[295] इति सूत्रेण आत्वे सति माङः इति निर्देशः भवति। किन्तु मेङ्धातोः ङकारसत्त्वे एजन्तत्वं तु न सम्भवति। तर्हि आत्वस्य प्राप्तिरेव नास्ति। तर्हि माङः इति निर्देशः अनुपपन्नः भवेत्। अतः इयं परिभाषा स्वीकृता नागेशेन। तेन ङकारसत्त्वे मेङ्धातोः एजन्तत्वं तु लभ्यते एव।

तत्र *परिभाषेन्दुशेखरे* उच्यते- 'आदेच उपदेशेऽशिति' इति सूत्रेण विधीयमानम् आत्वं धातोः भवति। धातुसंज्ञा तु उपदेशावस्थायामेव अनुबन्धलोपात् परम् अनुबन्धविनिर्मुक्तस्यैव भवति। एवं सति प्रकृतस्थले मेङः धातुसंज्ञा न स्याद् ङकारसत्त्वे। तस्य समाधानं वदता नागेशेन उच्यते- धातोः इत्यस्य अनुवृत्तिरेव न भवति 'आदेच उपदेशेऽशिति' इति सूत्रे। तथा च *परिभाषेन्दुशेखरे* उच्यते- "न चास्यामवस्थायां तस्य धातुत्वाभावात्कथमात्वम् इति वाच्यम्, तत्र 'धातोः'[296] इत्यस्य निवृत्तेरित्यन्यत्र विस्तरः"[297] इति।

---

293 ज्ञा. स., पृ. 63
294 पा. सू. 3.4.19
295 पा. सू. 6.1.45
296 पा. सू. 6.1.8
297 प. भा. शे., पृ. 29

**अत्रावधेयम्-** ज्ञापनप्रकारः तु उभयत्र समानः एव। ज्ञाप्यस्वरूपमपि समानम्। *ज्ञापकसंग्रहे* उक्तस्य तस्यैव ज्ञाप्यस्य *परिभाषेन्दुशेखर*दृष्ट्या परिभाषारूपत्वम् अस्ति। इयं परिभाषा, ज्ञाप्यं वा *महाभाष्य*कारसम्मतमेव अस्ति। तच्च नागेशः *परिभाषेन्दुशेखरे* स्पष्टीकृतवान्। किन्तु *महाभाष्य*कारसम्मतिविषये *ज्ञापकसंग्रहे* किमपि उक्तं नास्ति। परन्तु *परिभाषेन्दुशेखरा*दिग्रन्थाध्ययनेन अस्य ज्ञाप्यस्य *भाष्य*सम्मतिरस्ति इति ज्ञायते। एवञ्चात्र ज्ञाप्यज्ञापकस्वरूपज्ञाप्यसिद्धि-प्रकारदृष्ट्या *परिभाषेन्दुशेखर*कारः नागेशः *ज्ञापकसंग्रह*स्यापि कर्ता इति वक्तुं शक्यते।

## 2.4.2.4. लादेशेषु वासरूपविधिर्नास्ति।

वासरूपविधिसंदर्भे शङ्का उदेति यत्- श्वः पक्ता इत्यत्र अनद्यतने ल्युटः विषयः अस्ति। अत्र वासरूपविधिना 'लृट् शेषे च'[298] इति सूत्रेण भविष्यत्सामान्यार्थे विहितः लृट्लकारः अपि भविष्यति। न च "नानुबन्धकृतमसारूप्यम्"[299] इति परिभाषया लुट-लृटोः वैरूप्यं नास्ति, तर्हि वासरूपविधेः कथं वा प्रवृत्तिः इति वाच्यम्। तस्य समाधानाय उच्यते, यद्यपि लुट्-लृटोः स्वतः वैरूप्यं नास्ति तथापि तयोः स्थाने विधीयमानडादेशानां तु वैरूप्यम् अस्ति। आदेशगतवैरूप्यम् स्थानिनि

298 पा. सू. 3.3.13

299 प. भा. शे., पृ. 31

लकारे आरोप्य लुट्लकारविषये लृट्लकारः स्यात्। एनां शङ्कां दूरीकरणाय नागेशः परिभाषां वदति- “लादेशेषु वासरूपविधिर्नास्ति।”[300]

‘हशश्वतोर्लङ् च’[301] इति सूत्रेण लङ्लकारविधानम् अस्याः परिभाषायाः ज्ञापकम्। तद्यथा ‘अनद्यतने लङ्’[302] इति शास्त्रेण अनद्यतने भूते अर्थे लङ्लकारविधानं भवति। अस्य च लङ्लकारस्य बाधकः भवति ‘परोक्षे लिट्’[303] इति भूते अनद्यतने परोक्षे अर्थे विधीयमानः लिट्। किन्तु वासरूपविधिना लिटा सह लङः अपि प्राप्तिः स्यात्। लिड्विषये लङ्लकारः अपि पक्षे स्यात्। अस्यां दशायां लङ्विधानं व्यर्थं स्यात्। एवञ्च व्यर्थं सद् अस्याः परिभाषायाः ज्ञापकं भवति। स्वीकृतायां परिभाषायां तु आदेशकृतवैरूप्यवत्सु लकारेषु वासरूपविधिर्न भवति, तेन लिटा सह लङः नित्यं बाधः स्यात्। तस्मात् लङ्विधानं सार्थकम्। एतत् सर्वं नागेशः *परिभाषेन्दुशेखरे* वदति- “अत्र च ‘हशश्वतोर्लङ् च’ इति लङ्विधानं ज्ञापकम्। अन्यथा ‘परोक्षे लिट्’ इति लिटा लङः समावेशोऽसारूप्यात्सिद्ध इति किं लङ्-विधानेन। शत्रादिभिस्तिङां समावेशार्थं शतृविधायके विभाषाग्रहणानुवृत्तिः ‘लिटः कानज्वा’[304] इति वाग्रहणं च कृतम्। तज्ज्ञापयति वासरूपसूत्रेऽपवाद

300 तदेव, पृ. 312

301 पा. सू. 3.2.116

302 पा. सू. 3.2.111

303 पा. सू. 3.2.115

304 पा. सू. 3.3.106

आदेशत्वानाक्रान्तः प्रत्यय एव गृह्यत इति कैयटादौ ध्वनितम्। तत्फलं तु सदादिभ्यो भूतसामान्ये लिटा क्वसुरेव, न तु पक्षे तिङ् इति बोध्यम्"।[305]

*ज्ञापकसंग्रहे* तु विस्तरशः आलोचना नैव विहिता। तत्र केवलम् " 'हशश्वतोर्लङ् च' इति ज्ञापकात् लादेशेषु वासरूपविधिर्नास्ति"[306] इत्येव प्रोक्तम्। अर्थात् ज्ञापकमात्रं प्रोक्तम्। कथं तावद् ज्ञाप्यसिद्धिः इति तु उपरि आलोचितम्।

**अत्रावधेयम्-** उभयोः ग्रन्थयोः अनुशीलनेन इदम् आयाति यद् वस्तुतः वासरूपविधेः अनित्यत्वाद् एतत् सिध्यति। उभयत्र ज्ञाप्यस्वरूपम् अभिन्नम्। तच्च ज्ञाप्यं *ज्ञापकसंग्रहे* ज्ञाप्यत्वेन प्रोक्तं *परिभाषेन्दुशेखरे* च परिभाषात्वेन। उभयत्र ज्ञापकमपि अभिन्नम्। *परिभाषेन्दुशेखरे* अधिकं किमुक्तमिति चेत्, तत्र कैयटादिषु किं ध्वनितम्, तस्यापि आलोचनं विहितं नागेशेन। प्रकृतविषयविमर्शेन उभयोः ग्रन्थयोः कर्ता एक एव नागेशः इत्येवं *ज्ञापकसंग्रहस्य* नागेशकर्तृत्वं कल्पयितुं शक्यम्।

## 2.4.2.5. नानुबन्धकृतमसारूप्यम्।

अनुबन्धाः एकान्ताः इति पक्षे काचित् शङ्का जायते। तथा हि 'कर्मण्यण्'[307] इति सूत्रविहितः अण्प्रत्ययः, पुनः 'आतोऽनुपसर्गे कः'[308] इति सूत्रविहितः कप्रत्ययः इत्यनयोः असारूप्याद् बाध्यबाधकभावः वैकल्पिकः स्यात्,

305 तदेव, पृ. 312
306 ज्ञा. स., पृ. 56
307 पा. सू. 3.2.1
308 पा. सू. 3.2.3

'वासरूपोऽस्त्रियाम्'[309] इति शास्त्रबलात्। अतः नागेशः परिभाषां कथयति- "नानुबन्धकृतमसारूप्यम्"[310] इति। अर्थाद् अनुबन्धकारणेन असारूप्यं न भवति, सारूप्यमेव अस्ति इति मन्तव्यम्। अत एव उदाहरणस्थले नित्यमेव बाध्यबाधकभावः भवति। तस्माद् अपवादभूतकप्रत्ययेन औत्सर्गिकस्य अण्प्रत्ययस्य नित्यं बाधः भवति। तेन कप्रत्ययविषये अण्प्रत्ययः न भवति।

अस्याः परिभाषायाः ज्ञापकं तावद् 'ददातिदधात्योर्विभाषा'[311] इति ण-बाधकशस्य विकल्पविधायकं शास्त्रम्। अर्थाद् 'ददातिदधात्योर्विभाषा' इति शास्त्रेण दाञ्धातोः धाञ्धातोः च शप्रत्ययः विधीयते, तेन ददः दधः इत्यादयः प्रयोगाः सिध्यन्ति। तत्र श्यादव्यधादिसूत्रेण नित्यः णप्रत्ययः अपि प्राप्तः। एनं णप्रत्ययं 'ददातिदधात्योर्विभाषा' इति सूत्रं विकल्पेन बाधते। तेन पक्षे णप्रत्यये, ततः युकि दायः, धायः इत्यादयः सिध्यन्ति। अत्र शणौ तु विरूपौ प्रत्ययौ, शप्रत्ययः णप्रत्ययस्य अपवादभूतः। तर्हि 'वासरूपोऽस्त्रियाम्' इति सूत्रेण शप्रत्ययेन णप्रत्ययस्य विकल्पेन बाधः सिद्धः। तेन तु उभौ प्रत्ययौ सिध्यतः एव। तर्हि पुनः शप्रत्ययस्य विकल्पेन विधानं कुतः इति प्रश्नः उदेति। अतः विकल्पेन शप्रत्ययविधानं व्यर्थं सद् इमां परिभाषां ज्ञापयति। अत एव सारूप्याद् अत्र नित्यं बाध्यबाधकभावः स्यात्। अतः णप्रत्ययसिद्ध्यर्थं विकल्पेन शप्रत्ययविधानं क्रियते।

309 पा. सू. 3.1.94

310 प. भा. शे., पृ. 31

311 पा. सू. 3.1.139

"तेन गोद इत्यादौ नाणिति वासरूपसूत्रे *भाष्ये* स्पष्टम्"[312] इति नागेशः *परिभाषेन्दुशेखरे*।

*ज्ञापकसंग्रहे* तु केवलं ज्ञापकमात्रं प्रोक्तम्। तथा चोक्तम्- " 'ददातिदधात्योर्विभाषा' इति ज्ञापकात् नानुबन्धकृतमसारूप्यम्" इति।[313] तस्य आशयः पुनः नागेशोक्तायाः परिभाषायाः भावः वा समानः एव। तत् सर्वम् उपरि आलोचितम् अस्ति।

**अत्रावधेयम्-** उभयत्रापि ज्ञाप्यज्ञापकशरीरं समानम् एव। *ज्ञापकसंग्रहे* तु ज्ञाप्यज्ञापकमेव उक्तम् अस्ति, नान्यत्। किन्तु *परिभाषेन्दुशेखरे* नागेशः अवतरणिकां विलिख्य किम् अस्याः ज्ञापकं तद् विवृणोति। पुनः तेन भाष्यम् अपि आश्रित्य फलं प्रदर्शितम्। अत्र उभयसंदर्भानुशीलनेन *परिभाषेन्दुशेखरस्य* कर्ता नागेशः एव *ज्ञापकसंग्रहस्य* कर्ता इति अनुमीयते।

पुनः एतदपि शङ्कयितुं शक्यते यत्- सर्वशास्त्रनिष्णातः परमकारुणिकः नागेशभट्टः बृहन्मञ्जूषां संक्षिप्तवान्। तस्याः एव संक्षिप्तः अंशः *लघुमञ्जूषा*। तस्या अपि संक्षिप्ततरः अंशः *परमलघुमञ्जूषा*। एवमपि परिभाषेन्दुशेखरस्य संक्षिप्ततरः अंशः *ज्ञापकसंग्रहः*। इत्येवंप्रकारेण अनयोः *ज्ञापकसंग्रहपरिभाषेन्दुशेखर*योः कर्ता समानः एव नागेशः स्यात्।

---

312 प. भा. शे., पृ. 31

313 ज्ञा. स., पृ. 56

### *ज्ञापकसंग्रह*कर्तृत्वविचारः

*परिभाषेन्दुशेखर*स्य प्रारम्भे 'भाष्यवार्त्तिकयोरुपनिबद्धानि' इत्यनेन ज्ञायते यत् भाष्यवार्त्तिकयोः अनुक्तानि केनापि स्वबुद्ध्या ज्ञापकसिद्धत्वेन कल्पितानि वचांसि नोपादेयानि इति नागेशसिद्धान्तः।[314] यतो हि भाष्ये अनुक्तस्य वचसः अप्रामाण्यम्, अतः *ज्ञापकसंग्रह*स्य सर्वाणि अपि वचांसि भाष्यकारसम्मतानि। एवञ्च यतो हि अत्र भाष्यानुक्तस्य संग्रहो नास्ति, तदा तु ग्रन्थस्यास्य नागेशकर्तृत्व वक्तुं शक्यते।

कुत्रापि *ज्ञापकसंग्रह*स्य कर्ता *परिभाषेन्दुशेखरा*दिकर्ता नागेशः इत्युल्लेखो नास्ति। तथापि एतावता *प्रदीपोद्द्योतज्ञापकसंग्रह*योः अध्ययनेन पुनश्च *ज्ञापकसंग्रहपरिभाषेन्दुशेखर*योः अध्ययनेन ये तावद् विषयविमर्शाः उपरि प्रस्तुताः सन्ति, तैः *ज्ञापकसंग्रह*स्य नागेशकर्तृत्वम् अनुमातुं शक्यते, परन्तु दृढप्रमाणाभावात्तु निश्चयेन कथञ्चिदपि वक्तुं न शक्यते यत् *परिभाषेन्दुशेखरा*दिकर्ता नागेशः एव *ज्ञापकसंग्रह*कर्ता इति।

पुनश्च समानकर्तृकत्वासमर्थकत्वपक्षः अपि आलोच्यते। तथा हि-

## 2.5. समानकर्तृकत्वासमर्थकत्वम्

यद्यपि *ज्ञापकसंग्रह*स्य कर्ता नागेशभट्टः इति रामानुजताताचार्यादि-विदुषाम् अभिप्रायः इति उपरि आलोचितं, तथापि नागेशस्य रचनाशैली, कथनभङ्गिः, पुनरुक्तिः, व्याख्यानस्वरूपम्, तथा च ज्ञाप्यस्वरूपम् इत्यादिविषयान् दृष्ट्वा

314 नञ्घटितमनित्यम्। तन्न, भाष्येऽदर्शनात्। भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात्। प. भा. शे., पृ. 385

मन्दबुद्ध्या मया विभाव्यते यद्, असौ नागेशः कश्चिद् अपरः स्यात्। तच्च अधुना सविस्तरम् आलोच्यते-

### 2.5.1. भिन्नभाषाशैली

महामहोपाध्यायः नागेशभट्टः *परिभाषेन्दुशेखरः*, *लघुशब्देन्दुशेखरः*, *प्रदीपोद्द्योतः* इत्यादिप्रसिद्धव्याकरणरचनासु प्रौढशैलीम् आश्रयति। अपि च तस्य व्याख्यानं पाण्डित्यपूर्णम्। सा शैली तु *ज्ञापकसंग्रहे* नैव दृश्यते। 'न वाच्यम्' इति प्रयोगः, पुनश्च 'परे तु', 'प्राञ्चः', 'यत्तु'[315] इति प्रयोगः *ज्ञापकसंग्रहे* न दृश्यते। *परिभाषेन्दुशेखरे प्रदीपोद्द्योते* च सः प्रयोगः दरीदृश्यते। *परमलघुमञ्जूषा*दिषु अपि यत्त्वादिप्रयोगः दृश्यते।[316] नागेशस्य मुख्यवैशिष्ट्यम् अस्ति यथासम्भवं परमतखण्डनपूर्वकं स्वमतोपस्थापनम्। तच्च वस्तुतः नागेशस्य भूषणमेव न तु दूषणम्। नागेशः यथामति सयुक्ति नैयायिकमतानि मीमांसकमतानि च खण्डितवान्। अल्पशब्दैः महदर्थं प्रकाशयितुम् इच्छति, तदर्थं व्याख्यासु समासशैलीम् आश्रयति, येन ग्रन्थकाठिन्यम् अनुभूयते। अत एव डॉ. सीतारामः शास्त्री कथयति- "प्रौढशैलीकारणादेव नागेशग्रन्थानां बह्वीनां टीकानाम् अस्तित्वे अपि तद्ग्रन्थानां

---

315 यत्तु समाननिमित्तकत्वरूपसमानाश्रयत्व एवैषेति.......तदवस्थत्वाच्च। प. भा. शे., पृ. 248

316 यत्तु प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरिति, तन्न।.....व्यभिचारात्। प. ल. म., सम्पा. आचार्यः लोकमणिदाहालः, पृ. 315

दुर्गमत्वम् अनुभूयते।"[317] किन्तु *बृहच्छब्देन्दुशेखरे* व्यासशैली आश्रिता, तद्ग्रन्थस्य विशालत्वे अपि निरर्थकता पुनरुक्तिदोषः वा नास्ति।

*वैयाकरणसिद्धान्तमञ्जूषा, वैयाकरणसिद्धान्तलघुमञ्जूषा, वैयाकरण-सिद्धान्तपरमलघुमञ्जूषा* इत्यादिषु ग्रन्थेषु नागेशः क्वचित् क्वचित् नव्यन्यायशैल्या व्याकरणदर्शनसिद्धान्तान् प्रस्तुतवान्। वस्तुतः तस्मिन् काले नव्यन्यायस्य अवच्छेदावच्छिन्नवचनप्रवाहः प्रचलन् आसीत्। अतः आत्मानं तार्किकं मन्यमानः नागेशः शास्त्रार्थादिकारणात् तथा प्रयोगं कुरुते स्म। वस्तुतः न्यायशैल्या एव नैयायिकानां मतानि स खण्डितवान् इति नागेशग्रन्थानाम् अध्ययनेन स्पष्टं प्रतीयते।

व्याकरणदर्शनस्यापि विषयः तेन सरलरीत्या उपस्थापनार्थं प्रयासः विहितः। उदाहरणार्थं हि- "युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र मध्यमा नादोऽर्थवाचकस्फोटात्मकशब्दव्यञ्जकः"[318]। "ध्वनिस्तु द्विविधः- प्राकृतो वैकृतश्च। प्रकृत्या अर्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्रथमः प्राकृतः। तस्मात् प्राकृताज्जातो विकृतिविशिष्टश्चिरस्थायी निर्वतको वैकृतिकः।"[319]

किन्तु *परमलघुमञ्जूषा*दिग्रन्थेषु दार्शनिकग्रन्थेषु तादृशसारल्ये अपि शब्दप्रक्रियोपोयोगिनः नागेशस्य ये ग्रन्था: सन्ति तेषु तथा सरलीकरणं नास्ति व्याकरणविषयस्यैव स्वाभाविककाठिन्यात्। किन्तु *ज्ञापकसंग्रहः* अधीयते चेद्

317 बृ. श. शे., भू., पृ. 38-49

318 प. ल. म., सम्पा. आचार्यः लोकमणिः दाहालः, पृ. 94 -95

319 तदेव, 101

अवगम्यते तत्र तादृशकाठिन्यस्पर्शः नास्ति, अपि च अत्यन्तसरलभाषयैव ज्ञापितवचनानि विद्यन्ते, तेन च तस्य नागेशकर्तृत्वं सन्दिग्धं प्रतिभाति। अस्मिन् प्रसङ्गे “वार्णादङ्गं बलीयो भवति” इत्यत्रत्यः “गतिकारकोपपदानां....सुबुत्पत्तेः” इत्यत्रत्यः वा *परिभाषेन्दुशेखर*ग्रन्थः[320] *ज्ञापकसंग्रह*ग्रन्थः[321] च द्रष्टव्यः।

## 2.5.2. परमतोपस्थापनतत्खण्डनादिविरहः

नागेशः यथाशक्ति सरलसरसव्याकरणशैलीप्रयोगाय प्रयत्नं कृतवान्। परन्तु व्याकरशास्त्रस्य स्वाभाविककाठिन्यादेव तस्य शैली अधिकं कठिनमिति प्रतीयते। वस्तुतः नागेशस्य शैली तर्कयुक्ता प्रमाणयुक्ता परिष्कृता च वर्तते। क्वचित् समस्तप्रयोगः क्वचिच्च व्यस्तप्रयोगः आश्रितः। कुत्रचित् नव्यन्यायपद्धत्या नैयायिकमीमासंकानां तथा पूर्ववर्तिनाम् आचार्याणां भट्टोजिदीक्षितकौण्डभट्टादीनां मतानि खण्डयन् *महाभाष्यवाक्यपदीय*तत्त्वपुष्टस्वमतानि उपस्थापयित्वा च वैयाकरणशास्त्रसम्मतदार्शनिकसिद्धान्तान् यथामति यथाशक्ति विवृतवान्।

*ज्ञापकसंग्रहे* तावत् परमतोपस्थापनं तत्खण्डनं च नैव लभ्यते। किन्तु *परिभाषेन्दुशेखरे प्रदीपोद्द्योते* च तादृशोपस्थितिः दरीदृश्यते। उदाहरणार्थं “वार्णादङ्गं बलीयो भवति”[322] इति *परिभाषेन्दुशेखर*ग्रन्थः द्रष्टुं शक्यः।

---

320 प. भा. शे., पृ. 242, 326

321 ज्ञा. स., पृ. 49

322 प. भा. शे., पृ. 242

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

'अभ्यासस्यासवर्णे'[323] इतीयङ्विधायकसूत्रस्थमसवर्णग्रहणं तस्या ज्ञापकम्। पुनः अग्रे अस्याः परिभाषायाः अभावे ईषतुरित्यादावन्तरेण सवर्णदीर्घेण बाधात्ततद्व्यर्थम्। इयङुवङौ ह्यभ्याससम्बन्धनिमित्तकत्वाद् बहिरङ्गौ इत्येवं प्रतिपादयिता नागेशः प्राचीनामतमपि प्रस्तुतवान्।[324]

ततः नव्यवैयाकरणानां मतानि प्रस्तुतवान्। समागतदोषान् च परिहृतवान्। नव्यानां नये तु सम्पूर्णसूत्रस्यैव ज्ञापकता प्रोक्ता। तच्च नागेशसम्मतमपि अस्ति। "परे तु एतत्परिभाषाभावे 'अभ्यासस्य' इति सूत्रमेव व्यर्थम्।.......अभ्यासस्यार्ताविति अभ्यासस्यार्तेरिति वा गुरत्वान्न युक्तम्।"[325] "न च 'ए ऐ ओ औ' शब्देभ्य आचारक्विबन्तेभ्यो लिटीयङाद्यर्थं तत्सूत्रमावश्यकं तथा........तेषामनभिधानात्"।[326] "यद्यपि *भाष्ये* 'यदयमभ्यासस्यासवर्ण इत्यसवर्णग्रहणं करोति' इति ग्रन्थेनासवर्णग्रहणस्यैव ज्ञापकता लभ्यते.......सम्पूर्णसूत्रस्यैव ज्ञापकता लभ्यते" इत्येवंरूपेण नव्यवैयाकरणनये भाष्यसम्मतिप्रदर्शनम्। विस्तरप्रतिपत्तये अत्रत्यः[327] *परिभाषेन्दुशेखर*ग्रन्थः द्रष्टव्यः।

---

323 पा. सू. 6.4.78

324 न चेयङित्यादिरपवादो येन नाप्राप्तिन्यायेन इयर्तीत्यादिसकललक्ष्यप्राप्तयणपवादत्वस्यैव निर्णीदिति प्राञ्चः। प. भा. शे., पृ. 242

325 प. भा. शे., पृ. 244

326 तदेव, पृ. 245

327 तदेव, पृ. 244 -247

*ज्ञापकसंग्रहे* तु असवर्णग्रहणं ज्ञापकं प्रोक्तम्।[328] एवञ्चात्र *ज्ञापकसंग्रहे* प्राचीनमतस्य आदरः दृश्यते।

तद्विहायापि *प्रदीपोद्द्योते* 'केचिद्...आहुः' इत्येनन अपरेषां मतानि अपि प्रस्तुतवान्। तथा हि सर्वो द्वन्द्वो विभाषयैकवद्भवति इति ज्ञाप्यालोचनवेलायाम् *उद्द्योत*कारः तस्मादेव मृदङ्गशङ्खतूणवा इत्यादीनां संगतिः प्रदर्शिता परमतकथनेन- "केचित्त्विष्टानुरोधनेन द्वन्द्वश्चेत्यादिषु समाहारः एवेति नियमः। एवं चात्रापि पक्षे जातिरप्राणिनामिति नित्यैकवद्भावे बहुवचनाभावात्सूत्रमनर्थकं सदुक्तार्थज्ञापकम्। ज्ञाप्यकोटौ सर्वशब्देनैकवद्भावविषयो जातिद्वन्द्व एव गृह्यते। द्वन्द्वश्चेत्यादीनामन्येषां तु नित्यमेव।.......अत्रैवार्थे इदं ज्ञापकमित्याहुः।"[329]

तत्र *प्रदीपोद्द्योतपरिभाषेन्दुशेखर*योः कर्ता नागेशः एव यदि *ज्ञापकसंग्रहस्य* कर्ता स्यात् तदा अवश्यं परमताद्युपस्थापनतत्खण्डनादीनां च उल्लेखः स्यात्। परन्तु तादृशोपस्थितिः *ज्ञापकसंग्रहे* कुत्रापि नैव प्राप्यते। तत्र *ज्ञापकसंग्रहे* केवलं ज्ञाप्यज्ञापकमात्रोल्लेखः प्राप्यते। यथा "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इत्यत्र *परिभाषेन्दुशेखरे* परमतोपस्थापन-तत्खण्डनादिकं[330] लभ्यते, *ज्ञापकसंग्रहे* तु ज्ञाप्यज्ञापकोल्लेखमात्रम्।[331]

---

328 अभ्याससस्यासवर्णे इत्यसर्वणग्रहणं ज्ञापयति वार्णादङ्गं बलीय इति। न ह्यन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवति। ज्ञा. स., पृ. 82

329 म. भा., द्वि. भा., सम्पा. शिवदत्तशर्मा, पृ. 70

330 अन्ये तु, अनित्यत्वे न मानम्, तत्र अजादित्त्वाट्टाबित्याहुः.....इति तत्प्रत्याख्यानञ्च। प. भा. शे., पृ. 327

## 2.5.3. पुनरुक्तिदोषः

*ज्ञापकसंग्रहपरिभाषेन्दुशेखर*योः युगपदध्ययनेन इदम् अवश्यं ज्ञायते यत् बहूनि ज्ञाप्यानि तादृशानि सन्ति येषां परिभाषारूपत्वम् अस्ति। तथापि *ज्ञापकसंग्रहे* तासां परिभाषाणां ज्ञाप्यरूपेण पुनरुल्लेखः कुतः इत्यपि चिन्यविषयः। बृहच्छब्देन्दुशेखरस्य विशालत्वे अपि निरर्थकता पुनरुक्तिदोषः वा नास्ति। किन्तु *परिभाषेन्दुशेखरे* उल्लिखिताः नैकाः परिभाषाः नागेशः कुतः *ज्ञापकसंग्रहे* पुनः उल्लिखितवान् इति चिन्त्यम्। तथा च येषां तावद् ज्ञाप्यानां परिभाषारूपत्वम् अस्ति अर्थात् पुनरुक्तिस्थलानि कानिचित् तावदधः तालिकया प्रस्तूयन्ते-

| *ज्ञापकसंग्रहः* | | *परिभाषेन्दुशेखरः* |
|---|---|---|
| युवा खलति (पा. सू. 2.1.67)। इदं ज्ञापयति प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति।[332] | | प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्। अस्याश्च ज्ञापकं समानाधिकरणाधिकारस्थे कुमारः श्रमणादिभिः (पा. सू. 2.1.70) इति सूत्रे स्त्रीलिङ्गश्रमणादिशब्दपाठः।[333] |
| अतिङिति प्रतिषेधो ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपा (पा. सू. 2.1.4) इति। तेन गतिकारकोपपदानामिति सिद्धम्।[334] | | उपपदम् (पा. सू. 2.2.19) इति सूत्रेऽतिङ्ग्रहणेन 'कुगति' (पा. सू. 2.2.18) इत्यत्र तदपकर्षणेनातिङन्तश्च समास इत्यर्थात्तयोः सूत्रयोः 'सुप्सुपा' |

331 अतिङिति प्रतिषेधो ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपा (सू. 2-1-4) इति, तेन गतिकारकोपदानामिति। ज्ञा. स., पृ. 49

332 ज्ञा. स., पृ. 49

333 प. भा. शे., पृ. 316

334 ज्ञा. स., पृ. 49

| | | |
|---|---|---|
| | | इत्यस्य निवृत्त्यैकदेशानुमत्या कारकांशे च सिद्धेयम्।[335] |
| ल्यब्ग्रहणं ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधत इति।[336] | | 'अदो जग्धिः' (पा. सू. 2.4.36) इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्या (अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधत) ज्ञापकमिति 'अदो जग्धिः' इत्यत्र भाष्ये स्पष्टम्।[337] |
| ददातिदधात्योर्विभाषा (पा. सू. 3.1.139) इति ज्ञापकात् नानुबन्धकृतमसारूप्यम्।[338] | | 'ददातिदधात्योर्विभाषा' (पा. सू. 3.1.139) इति ण-बाधकशस्य विकल्पविधायकमस्यां (नानुबन्धकृतमसारूप्यम्) ज्ञापकम्। तेन गोद इत्यादौ नाणिति वासरूपसूत्रे भाष्ये स्पष्टम्।[339] |
| हशश्वतोर्लङ् च (पा. सू. 3.2.116) इति ज्ञापकात् लादेशेषु वासरूपविधिर्नास्ति इति।[340] | | अत्र (लादेशेषु वासरूपविधिर्नास्ति) च 'हशश्वतोर्लङ् च' (पा. सू. 3.2.116) इति लङ्विधानं ज्ञापकम्।[341] |
| अत्र सानुबन्धकस्यात्वभूतस्य ग्रहणं ज्ञापयति नानुबन्धकृतमनेजन्तत्वमिति।[342] | | 'उदीचां माङः' (पा. सू. 3.4.19) इति निर्देशोऽस्या (नानुबन्धकृतमनेजन्तत्वम्) ज्ञापकः।[343] |
| प्राग्दीव्यतोऽण् (पा. सू. 4.1.83)। | | छिन्नपुच्छे शुनि श्वत्वव्यवहारवन्मान्ते |

---

335 प. भा. शे., पृ. 326

336 ज्ञा. स., पृ. 50

337 प. भा. शे., पृ. 241

338 ज्ञा. स., पृ. 56

339 प. भा. शे., पृ. 31

340 ज्ञा. स., पृ. 56

341 प. भा. शे., पृ. 312

342 ज्ञा. स., पृ. 62

343 प. भा. शे., पृ. 9

| | | |
|---|---|---|
| अयमेव विकृतनिर्देशो ज्ञापयति- 'एकदेशविकृतमनन्यव'दिति।[344] | | तत्त्वं लोकन्यायसिद्धम्। अत एव 'प्राग्दीव्यतः' (पा. सू. 4.1.83) इति सूत्रे भाष्ये......परिभाषैकदेशविकृतमनन्यवदित्युक्तम्।[345] |
| 'अभ्यासस्यासवर्णे' (पा. सू. 6.4.78) इत्यसवर्णग्रहणं ज्ञापयति वार्णादाङ्गं बलीय इति। न ह्यन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवति।[346] | | 'अभ्यासस्यासवर्णे' (पा. सू. 6.4.78) इतीयङ्विधायकसूत्रस्थमसवर्णग्रहणमस्या (वार्णादाङ्गं बलीयो भवति) ज्ञापकम्।[347] |
| 'नोत्तरपदेऽनुदात्तादावपृथिवी' (पा. सू. 6.2.142) इत्यादावपृथिवीत्यादिपर्युदासो ज्ञापकः 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति।[348] | | 'नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु' (पा. सू. 6.2.142) इति सूत्रे पृथिव्यादिपर्युदासोऽस्या (स्वरविधौ व्यञ्जनमविद्यमानवत्) ज्ञापकः।[349] |
| 'यतोऽनावः' (पा. सू. 5.1.213) इत्यत्रानाव इति प्रतिषेधो ज्ञापकः हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति।[350] | | अस्याश्च (हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्) 'यतोऽनावः' (पा. सू. 5.1.213) इति सूत्रेऽनौप्रतिषेधो ज्ञापकः।[351] |

344 ज्ञा. स., पृ. 65
345 प. भा. शे., पृ. 148
346 ज्ञा. स., पृ. 82
347 प. भा. शे., पृ. 242
348 ज्ञा. स., पृ. 90
349 प. भा. शे., पृ. 338
350 ज्ञा. स., पृ. 90
351 प. भा. शे., पृ. 342

| | | |
|---|---|---|
| ‘गतिरनन्तरः’ (पा. सू. 6.2.59) अनन्तरग्रहणं ज्ञापयति कृद्ग्रहणे गतिकारकपूर्वस्यापीति।[352] | | अस्याश्च (कृद्ग्रहणे गतिकारकपूर्वस्यापि) कर्मणि क्तान्त उत्तरपदेऽनन्तरो गतिः प्रकृतिस्वर इत्यर्थके ‘गतिरनन्तरः’ (पा. सू. 6.2.59) इति सूत्रेऽनन्तरग्रहणं ज्ञापकम्।[353] |
| ‘ज्यादादीयसः’ (पा. सू. 6.4.160)। अकारविधानेन सिद्धे आकारविधानं भाव्यमानेन सवर्णानां ग्रहणं नेत्यस्य ज्ञापकम्।[354] | | ‘ज्याद ईयस’ इत्येवान्तर्यतो दीर्घे सिद्धे ‘ज्यादादीयसः’ (पा. सू. 6.4.160) इति दीर्घोच्चारणमस्या (भाव्यमानेन सवर्णानां ग्रहणं न) ज्ञापकम्।[355] |
| ‘कार्मस्ताच्छील्ये’ (पा. सू. 6.4.172) ‘नस्तद्धिते’ (पा. सू. 6.4.144) इत्येव सिद्धे इदं निपातनं ज्ञापयति ताच्छीलिकेष्वण्कृतानि भवन्तीति।[356] | | ‘अन्’ (पा. सू. 6.4.167) इत्यणि विहितप्रकृतिभावबाधनार्थं ‘कार्मस्ताच्छील्ये’ (पा. सू. 6.4.172) इति निपातनमस्या (ताच्छीलिके णेऽण्कृतानि भवन्ति) ज्ञापकम्।[357] |
| प्रत्ययोत्तर (पा. सू. 7.2.97)। इदमेव ज्ञापयति अत्र मपर्यन्तानुवृत्तिर्वा ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इति।[358] | | अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इत्यत्र ‘प्रत्ययोत्तरपदयोश्च’ (पा. सू. 7.2.97) इति सूत्रं ज्ञापकम्। त्वत्कृतमित्यादौ लुगपेक्षयान्तरङ्गत्वाद्विभक्तिनिमित्तकेन |

352 ज्ञा. स., पृ. 91
353 प. भा. शे., पृ. 117
354 ज्ञा. स., पृ. 98
355 प. भा. शे., पृ. 88
356 ज्ञा. स., पृ. 98
357 प. भा. शे., पृ. 370
358 ज्ञा. स., पृ. 102

| | | |
|---|---|---|
| | | ‘त्वमावेकवचने’ (पा. सू. 7.2.97) इत्यनेन सिद्धे इदं व्यर्थं सत्तज्ज्ञापकम्।[359] |
| भ्रौणहत्ये तत्त्वनिपातनं धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीत्यस्यार्थस्य ज्ञापकम्।[360] | | ‘भ्रौणहत्ये’ तत्त्वनिपातनमस्या (धातोः कार्यमुच्यमानं तत्प्रत्यये भवति) ज्ञापकम्।[361] |
| ‘दीर्घोऽकितः’ (पा. सू. 7.4.83) इत्यकिद्ग्रहणं ज्ञापयति अभ्यासविकारेषु बाधका न बाधन्त इति।[362] | | ‘दीर्घोऽकितः’ (पा. सू. 7.4.83) इत्यकिद्ग्रहणमस्या (अभ्यासविकारेषु बाध्यबाधकभावो नास्ति) ज्ञापकम्।[363] |

उपर्युक्तक्षेत्रविशेषोल्लेखैः अवगम्यते यद् बहुत्र *परिभाषेन्दुशेखर*कारः नागेशः तत्रैव उल्लिखिताः परिभाषाः पुनः *ज्ञापकसंग्रहे* निबध्नाति इत्येवं पुनरुल्लेखः कुतः इति प्रश्नः। सामान्यतया परिभाषा वा भवतु ज्ञाप्यं वा भवतु तत्स्वरूपे तु भेदः तथा न दृश्यते। किन्तु भेदे सति तयोः समानकर्तृत्वे सन्देहः भवत्येव। तथा क्वचिच्च परिभाषास्वरूपं ज्ञाप्यस्वरूपाद् भिद्यते। यथा- “ताच्छीलिकेष्वण्कृतानि भवन्तीति”[364] *ज्ञापकसंग्रहे*, “ताच्छीलिके णेऽण्कृतानि भवन्तीति”[365] *परिभाषेन्दुशेखरे*। पुनश्च

359 प. भा. शे., पृ. 226
360 ज्ञा. स., पृ. 102
361 प. भा. शे., पृ. 371
362 ज्ञा. स., पृ. 109
363 प. भा. शे., पृ. 305
364 ज्ञा. स., पृ. 98
365 प. भा. शे., पृ. 369

"अभ्यासविकारेषु बाधका न बाधन्ते"[366] इति *ज्ञापकसंग्रहे*, "अभ्यासविकारेषु बाध्यबाधकभावो नास्ति"[367] इति *परिभाषेन्दुशेखरे*। "अननुबन्धकग्रहणे न सानुबन्धकग्रहणम्"[368] इति *ज्ञापकसंग्रहे*, "निरनुबन्धकग्रहणे न सानुबन्धकस्य"[369] इति *परिभाषेन्दुशेखरे*। "तदनुबन्धकग्रहणे अतदनुबन्धकग्रहणं न"[370] इति *ज्ञापकसंग्रहे*, "तदनुबन्धकग्रहणे नातदनुबन्धकस्य"[371] इति *परिभाषेन्दुशेखरे*। "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते।"[372] इति *ज्ञापकसंग्रहे*, "क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते"[373] इति *परिभाषेन्दुशेखरे* एवमन्यत्रापि बोद्धव्यम्।

इत्येवं तयोः ग्रन्थयोः समाननागेशकर्तृत्वे कुतो वा ज्ञाप्यस्वरूपभेदः कुतो वा बहूनां ज्ञाप्यानां पुनःकथनम् इति प्रश्नः उदेति। तेन *ज्ञापकसंग्रह*कारः कश्चिद् अपरः नागेशः स्यादिति विभावयितुं शक्यते।

---

366 ज्ञा. स., पृ. 109
367 प. भा. शे., पृ. 304
368 ज्ञा. स., पृ. 65
369 प. भा. शे., पृ. 344
370 ज्ञा. स., पृ. 65
371 प. भा. शे., पृ. 344
372 ज्ञा. स., पृ. 81
373 प. भा. शे., पृ. 347

### 2.5.4. अनुक्तासंग्रहाक्षेपः

*वैयाकरणसिद्धान्तकौमुदी*, *बालमनोरमा*टीका, *तत्त्वबोधिनी*टीका, *काशिका*वृत्तिः, *पदमञ्जरी*टीका, *न्यास*टीका, *भाष्यप्रदीपः*, *प्रदोपोद्द्योतः*, *प्रोढमनोरमा*, *परिभाषेन्दुशेखरः* इत्येते ग्रन्थाः टीकाः वा अधीयन्ते चेद् इदं प्रतीयते यत् तत्र तत्र *सिद्धान्तकौमुद्या*दिग्रन्थेषु बहूनि ज्ञाप्यानि सन्ति येषाम् उल्लेखः न *परिभाषेन्दुशेखरे* न वा *ज्ञापकसंग्रहे* अस्ति। अत्र प्रश्नः भवति, यत्र *परिभाषेन्दुशेखरे* उल्लिखिताः परिभाषाः *ज्ञापकसंग्रहे* पुनरुल्लिखिताः, तत्र *परिभाषेन्दुशेखरा*दिषु अनुल्लिखितानि ज्ञाप्यानि कुतः न *ज्ञापकसंग्रहे* संगृहीतानि। अत्रावधेयं यत् रामानुजताताचार्यः *ज्ञापकसंग्रह*स्य व्याख्यानवेलायां नैकानि ज्ञाप्यानि सङ्गृहीतानि सन्ति येषु कानिचित् भाष्यारूढानि नागेशेन असङ्गृहीतानि, कानिचिच्च भाष्यानारूढानि नागेशेन असङ्गृहीतानि। उभयविधासंगृहीतज्ञाप्यानि रामानुजताताचार्यसङ्कलितानि सन्ति नैकानि। नागेशेन असङ्गृहीतानि भाष्यारूढानि वचनानि-

1. ‘अमि पूर्वः’[374] इति पूर्वग्रहणं ज्ञापकं यथाजातीयकः पूर्वस्तथाजीतयक उभयोर्भवतीति।
2. नानेन सम्प्रसारणस्य दीर्घो भवतीत्यत्र ‘हलः’[375] इति सूत्रं ज्ञापकम्।
3. रूपग्रहणं ज्ञापकं यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोरिति।
4. दीर्घाच्छे तुग्विधानात् ज्ञापकात् न दीर्घे ह्रस्वाश्रयो विधिर्भवतीति।

---

374 पा. सू. 6.1.107

375 पा. सू. 6.4.3

5. 'गापोष्टक्'[376] इति ककारानुबन्धो ज्ञापयति नाकारस्थस्य अकारस्य लोपो भवतीति।

6. गोनौग्रहणात् ज्ञापकात् दीर्घे द्व्यज्लक्षणो विधिर्न भवति।

7. 'गापोष्टक्' इत्यनन्यार्थककारानुबन्धकरणात् ज्ञापकात् न आकारस्य गुणो भवतीति।

8. न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीत्यत्रार्थग्रहणं ज्ञापकम्।

9. 'वतोरिड्वा'[377] इत्यादिज्ञापकात् बहुगणादीनां संख्याकार्यं भवति।

10. 'नाव्ययीभावात्'[378] इति प्रतिषेधात् ज्ञापकात् भवतीत्यव्ययीभावाल्लुक्।

11. सात्प्रतिषेधो ज्ञापकः स्वादिषु पदत्वेन येषां पदसंज्ञा न तेभ्यः प्रतिषेध इति।

12. 'युष्मदस्मादोरनादेशे'[379] इत्यादेशे प्रतिषेधात् ज्ञापकात् स्थानिवदादेशो भवतीति।

13. 'अदो जग्धिर्ल्यप्तिकिति'[380] इति ल्यप्ग्रहणात् ज्ञापकाद् अल्विधौ स्थानिवद्भावो न भवति।

14. ओह्रस्वादिति वक्तव्ये एङ्ह्रस्वादिति प्रत्याहारग्रहणं ज्ञापयति न संबुद्धिलोपे स्थानिवद्भो भवतीति।

15. 'न लुमताङ्गस्य'[381] इति प्रतिषेधात् ज्ञापकात् भवति लुकि प्रत्ययलक्षणम्।

---

376 पा. सू 3.2.8

377 पा. सू. 5.1.23

378 पा. सू. 2.4.83

379 पा. सू. 7.2.86

380 पा. सू. 2.4.36

16. 'न ङिसंबुद्ध्योः'[382] इति प्रतिषेधात् ज्ञापकात् न प्रत्ययलक्षणेन भसंज्ञा भवति।

17. यदयं 'नाम्रेडितस्यान्त्यस्य तु वा'[383] इत्याह तज्ज्ञापयति नान्त्यस्य पररूपं भवतीति।

18. रूपग्रहणं ज्ञापयति अस्त्यन्यद्रूपात्स्वं शब्दस्येति।

19. 'ष्णान्ता षट्'[384] इति षकारान्तायाः संख्यायाः षट्संज्ञाज्ञापकात् शब्दसंज्ञायां न स्वरूपविधिर्भवतीति।

20. 'इको झल्'[385] इति झल्ग्रहणं ज्ञापयति औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति।

21. 'विभाषा पृष्टप्रतिवचने हेः'[386] इति मात्रिकस्य प्लुतवचनं ज्ञापकं न मात्रिकोऽन्ते भवतीति।

22. 'अतो दीर्घो यञि, सुपि च'[387] इति दीर्घविधानं ज्ञापकं न मात्रिको मध्ये भवतीति।

23. 'ओमभ्यादाने'[388] इति द्विमात्रस्य प्लुतविधानं ज्ञापकं न द्विमात्रोऽन्ते भवतीति।

---

381 पा. सू. 1.1.63
382 पा. सू. 8.2.8
383 पा. सू. 6.1.19
384 पा. सू. 1.1.24
385 पा. सू. 1.2.9
386 पा. सू. 8.2.93
387 पा. सू. 7.3.101-102
388 पा. सू. 8.2.87

24. 'अचि श्नु'[389] इत्यत्र श्नुग्रहणं ज्ञापकं न प्रत्ययस्योवङादेशो भवतीति।

25. दिवः सावौत्वविधानं ज्ञापयति उत्पद्यन्ते दिव्शब्दात्स्वादय इति।

26. 'उन्दिर् निशामने' 'स्कन्दिर् गतिशोषणयोः' इत्यादीनां केषाञ्चिद् इरितां नुमनुषक्तानां पाठो ज्ञापयति नैवंजातीयकानामिदिद्भिर्भवतीति।

27. अनाध्यान इति प्रतिषेधो ज्ञापयति भवत्येवंजातीयकानाम् आत्मनेपदमिति।

28. द्युतादिभ्यो वावचनात् ज्ञापकात् न परस्मैपदविषये आत्मनेपदं भवतीति।

29. 'हृक्रोरन्यतरस्याम्' इत्यन्यतरस्यांग्रहणं ज्ञापकं न कर्मसंज्ञायां कर्तृसंज्ञा भवतीति।

30. गौरादिषु श्वन्शब्दपाठो ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति।

31. 'साधकतमं करणम्'[390] तमग्रहणं ज्ञापयति कारकसंज्ञायां तरतमयोगो न भवतीति।

32. 'युवा खलति'[391] इति समानाधिकरणेनेति वर्तमाने व्यधिकरणनिर्देशात् ज्ञापकात् यथाजातीयकमुत्तरपदं तथाजातीयकेन पूर्वपदेन समासो भवतीति।

33. 'उपपदमतिङ्'[392] इति अतिङिति प्रतिषेधो ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति।

34. उत्तरपदे द्विगुविधानं ज्ञापयति बहूनामपि समासो भवतीति।

---

389 पा. सू 6.4.77

390 पा. सू. 1.4.42

391 पा. सू. 2.1.66

392 पा. सू. 2.2.19

35. 'चार्थे द्वन्द्वः'[393] इत्यर्थग्रहणात् चेन कृतोऽर्थश्चार्थ इति विज्ञायते।

36. जातिकालसुखादिभ्यः परस्याः निष्ठाया अन्तोदात्तत्वविधानात् ज्ञापकात् परात्र निष्ठा भवतीति।

37. 'चतुर्थी तदर्थार्थ-'[394] इति चतुर्थ्यन्तस्य अर्थशब्देन समासविधानं ज्ञापयति भवत्यर्थशब्दयोगो चतुर्थीति। तत्रैव चतुर्थ्यन्तस्य तदर्थेन समासविधानात् ज्ञापकात् भवति तादर्थ्ये चतुर्थीति।

38. 'संबोधने आमन्त्रितम्' इत्येकयोगमकृत्वा 'सम्बोधने च' 'सामन्त्रितम्'[395] इति योगविभागकरणं ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति।

39. 'बह्वचः इञः प्राच्यभरतेषु'[396] इयत्र भरतग्रहणं ज्ञापयति अन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति।

40. 'एतिस्तुशास्वृदृचुषः क्यप्' इति परिगणनं ज्ञापयति न धातुमात्रात् क्यबिति।

41. काद्यनुबन्धासञ्जनं ज्ञापयति अत्यन्तापरदृष्टाः परभूता लुप्यन्त इति।

42. 'ऋच्छत्यृताम्'[397] इति ऋच्छेर्लिटि गुणवचनं ज्ञापकं नच्छेर्लिटयाम् भवतीति।

43. 'न दुहस्नुनमां यक्चिणौ'[398] इति प्रतिषेधात् ज्ञापकात् भवति कर्मकर्तरि यक्।

---

393 पा. सू. 2.2.19

394 पा. सू. 2.1.36

395 पा. सू. 2.3.47-48

396 पा. सू. 2.4.66

397 पा. सू. 7.4.11

398 पा. सू. 3.1.89

44. क्वचित्तद्धितविधौ 'तिङश्च'[399] इति तिङ्ग्रहणं ज्ञापकं न तिङन्तादणादयो भवन्तीति।

45. अर्हे कृत्यतृज्ग्रहणं ज्ञापकं प्राङ्ण्वुलः कृत्यसंज्ञा भवतीति।

46. लुशा सिद्धे आलुज्विधानं ज्ञापकम् अन्येभ्योऽप्ययं भवतीति।

47. अनद्यतने लृटः सत्संज्ञावचनं ज्ञापयति भवत्यनद्यतने लृडिति।

48. 'संभावनेऽलमिति चेत्'[400] इति ज्ञापकात् संभावनेऽपि नालमर्थः गम्यते।

49. तुमर्थग्रहणं ज्ञापयति अस्त्यन्यः कर्तुस्तुमुनोऽर्थ इति।

50. 'तयोरेव'[401] इत्येवकारो ज्ञापयति इत उत्तरं समावेशो भवतीति।

51. 'आदिकर्मणि क्तः कर्तरि च'[402] इति चकारो ज्ञापयति प्रागमुतः समावेशो भवतीति।

52. 'पुयोंगात् आख्यायाम्'[403] इति ङीष्विधानात् ज्ञापकात् नातः (प्रष्ठशब्दात्) तद्धितोत्पत्तिरिति।

53. 'सहनञ्विद्यमानपूर्वाच्च'[404] इति प्रतिषेधात् ज्ञापकात् अनन्तोदात्तादपि भवतीति।

54. 'ढकि लोपः'[405] इत्येतदेव ज्ञापयति भवति पितृष्वसुर्ढक् इति।

---

399 पा. सू. 5.3.56
400 पा. सू. 3.3.154
401 पा. सू. 3.4.70
402 पा. सू. 3.4.71
403 पा. सू. 4.1.48
404 पा. सू. 4.1.57

55. यञि प्रकृते यन्विधानं ज्ञापयति अन्येभ्योऽप्ययमिति।

56. खण्डिकादिषु क्षुद्रकमालवशब्दपाठो ज्ञापयति भवतीह तदन्तविधिरिति पूर्वश्च वुञ् परमञं बाधत इति च। अन्यथानुपपत्त्या एकस्येवोभयस्यापि ज्ञापनं न विरुध्यते।

57. 'फेशछ च'[406] इति फिञन्तात् छविधानं ज्ञापकं नाण्विषये घादयो भवन्तीति।

58. कलापिखाण्डायनग्रहणात् ज्ञापकात् नान्तेवास्यन्तेवासिभ्यो भवति।

59. 'त्रियाः पुंवत्'[407] इति निर्देशो ज्ञापयति न वत्यर्थे नञ्स्नञौ भवत इति।

60. 'नञो गुणप्रतिषेधे संपाद्यार्हहितालमर्थास्तद्धिताः'[408] इति ज्ञापकात् सर्व एते तद्धिताः सापेक्षाद्भवन्ति।

61. यलोपवचनं ज्ञापयति नात्र लुग्भवतीति।

62. परिमाणग्रहणं ज्ञापयति अन्यत् प्रमाणम् अन्यत्परिमाणमिति।

63. थकारादावादेशविधानात् ज्ञापकात् भवत्यत्र थमुः।

64. 'न न्द्राः संयोगादयः'[409] इति प्रतिषेधो ज्ञापयति पूर्वनिवृत्तौ व्यञ्जनस्या-निवृत्तिरिति।

---

405 पा. सू. 4.1.133
406 पा. सू. 4.1.149
407 पा. सू. 6.3.34
408 पा. सू. 6.2.155
409 पा. सू. 6.1.3

65. 'लिटि वयो यः'[410] इति वयेर्यकारस्य संप्रसारणप्रतिषेधात् ज्ञापकात् न व्येञ्ग्रहणाद्वयेः संप्रसारणप्रतिषेधो भवतीति।

66. 'मीनातिमिनोति'[411] इत्यत्र एज्ग्रहणानुवर्तनं ज्ञापयति न परनिमित्तकस्यात्वं भवतीति। अशितीति प्रतिषेधो ज्ञापकः नायादय आत्वं बाधन्त इति।

67. 'न ङिसंबुद्ध्योः'[412] इति संबुद्धौ प्रतिषेधो ज्ञापयति सिद्धः संयोगान्तलोपो नलोप इति।

68. 'नादिचि'[413] इति इज्ग्रहणं ज्ञापयति न जश्शसोः पररूपं भवतीति।

69. प्लुतः प्रकृत्या इति प्रकृतिभावविधानात् ज्ञापकात् एकादेशात् प्लुतो भवति विप्रतिषेधेनेति।

70. यदयं 'तवैचान्तश्च युगपत्'[414] इति सिद्धे यौगपद्ये शास्ति तज्ज्ञापयति न युगपत्स्वरो भवतीति।

71. 'रिक्ते विभाषा'[415] इति सिद्धे पर्याये पर्यायविधानं ज्ञापकम् अन्यत्र न पर्यायो भवतीति।

---

410 पा. सू. 6.1.38
411 पा. सू. 6.1.50
412 पा. सू. 8.2.8
413 पा. सू. 6.1.104
414 पा. सू. 6.2.51
415 पा. सू. 6.1.108

72. तासेः परस्य लसार्वधातुकस्यानुदात्तविधानात् ज्ञापकात् सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधते इति।

73. 'षट्त्रिचतुर्भ्यो हलादिः'[416] इति हलादिग्रहणं ज्ञापयति न निपातनस्वरो विभक्तिस्वरं बाधते इति।

74. अनुदात्तङिद्ग्रहणं ज्ञापकं न लुग्विकरणेभ्योऽनुदात्तत्वं भवतीति।

75. 'नोत्तरपदेऽनुदात्तादौ'[417] इत्युक्त्वा 'अपृथिवीरुद्रपूषमन्थिषु' इति प्रतिषेधात् ज्ञापकात् तत्र सिद्धं तद्भवति व्यञ्जनादेर्व्यञ्जनान्ताच्चेति।

76. 'अहरणे'[418] इति प्रतिषेधात् ज्ञापकात् न कृत्स्वरो हारिस्वरं बाधत इति।

77. कपि पूर्ववचनं ज्ञापकम् उत्तरपदस्यान्तोदात्तत्वं न भवतीति।

78. एतदेवालुग्वचनं ज्ञापयति भवत्यत्र समास इति।

79. 'चौ'[419] इत्येतदेव ज्ञापयति न चौ प्रत्यङ्गं भवतीति।

80. नानेन शपोऽकारस्य लोपो भवतीत्यत्र अदिप्रभृतिभ्यः शपो लुग्विधानं ज्ञापकम्। आकारान्तेभ्यो लुग्विधानं वा ज्ञापकम्।

81. 'ऋतेरीयङ्'[420] इति धातोरीयङ्विधानं ज्ञापकं न धातुप्रत्ययानामायन्नादयो भवन्तीति।

---

416 पा. सू. 6.1.179
417 पा. सू. 6.2.142
418 पा. सू. 6.1.65
419 पा. सू. 6.3.138
420 पा. सू. 3.1.29

82. अज्ग्रहणं ज्ञापयति भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नामेति।

83. 'न तिसृचतसृ'[421] इति प्रतिषेधो ज्ञापयति न रादेशो नुटं बाधत इति।

84. 'विभाषा भावादि'[422] योगविभागः ज्ञापकः यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति।

85. 'सनीवन्तर्ध'[423] इत्यत्र स्वसृग्रहणात् ज्ञापकात् नेयं विभाषा उग्लक्षणस्य प्रतिषेधस्य विषये भवतीति।

86. अनुशतिकादिषु पुष्करसच्छब्दपाठो ज्ञापयति अचामादिवृद्धौ अन्त्योपधालक्षणा वृद्धिर्न भवतीति।

87. चिण्णलोः प्रतिषेधो ज्ञापयति न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीति।

88. क्नुसनोः कित्करणं ज्ञापकं भवत्येवंजातीयकानां गुण इति।

89. 'ङेराम्नद्याम्नीभ्यः'[424] इति पृथगाब्ग्रणात् नापो नदीसंज्ञा भवतीति।

90. अङ्गविशेषणमेतदित्यत्र तपरकरणं ज्ञापकम्।

91. 'अत्स्मृदृत्वर'[425] इति इत्वबाधनार्थत्वविधानं ज्ञापयति भवति संयोगव्यवहितानामित्वमिति।

92. 'नलोपः प्रातिपदिकान्तस्य'[426] इति अन्तग्रहणं ज्ञापयति विशेषणषष्ठ्येषा न स्थानषष्ठीति।

---

421 पा. सू. 6.4.4

422 पा. सू. 7.2.17

423 पा. सू. 7.2.49

424 पा. सू. 7.3.116

425 पा. सू. 7.4.95

93. 'न लुट्'[427] इति प्रतिषेधात् ज्ञापकाद् अनादेरप्यनुदात्तत्वं भवति।

94. 'गत्यर्थलोटा'[428] इति लृटि प्रतिषेधात् ज्ञापकाद् अनन्त्यस्याप्यनुदात्तत्वं भवति।

95. अहन्ग्रहणं रूपरात्रिरथन्तरेषूपसंख्यानं वा ज्ञापकं नानन्त्यस्य रुर्भवतीति।

96. 'ईवत्याः'[429] इति ज्ञापयति भवत्यहीवत्यादौ वत्वमिति।

97. ह्रीग्रहणं ज्ञापयति भवत्येतस्माद्विधिरिति।

98. अनुत्तरपदस्थस्येति प्रतिषेधो ज्ञापकः भवति वाक्ये विभाषेति।

99. 'सात्पदाद्योः'[430] इति सात्प्रतिषेधो ज्ञापयति भवति प्रत्ययावयवस्यापि षत्वमिति।

100. 'शासिवसिघसीनां च'[431] इति घसिग्रहणं ज्ञापकं नानाविभक्त्योरेष समास इति।

101. सवनादिषु अश्वसनिपाठो ज्ञापयति अनिणन्तादपि षत्वं भवतीति।

102. 'तोः षि'[432] इति प्रतिषेधो ज्ञापयति नेह संख्यातानुदेशो भवतीति।

सन्ति नागेशेन असङ्गृहीतानि भाष्यानारूढान्यपि *वैयाकरणसिद्धान्त-कौमुदी*ग्रन्थादिषु पठितानि नैकानि ज्ञापितवचनानि। येषु नैकानि व्याख्यातानि सन्ति रामानुजताताचार्येण *ज्ञापकसंग्रह*व्याख्याकारेण। अध्यायभारभिया अस्मिन्नध्याये तानि अत्र न लिख्यन्ते।

---

426 पा. सू. 8.2.7
427 पा. सू. 8.1.29
428 पा. सू. 8.1.51
429 पा. सू. 6.1.221
430 पा. सू. 8.3.111
431 पा. सू. 8.3.60
432 पा. सू. 8.4.43

तेषु चितानां केषाञ्चिद् चर्चाः शोधप्रबन्धस्य चतुर्थाध्याये यथामति विधास्यन्ते।

## 2.5.5. सविशदविवरणाभावः

"प्रकृतिवदनुकरणं भवति" इति ज्ञापितवचनं ज्ञाप्यरूपेण *ज्ञापकसंग्रहे*[433] तथा परिभाषारूपेण *परिभाषेन्दुशेखरे*[434] उल्लिखितम्। किन्तु *ज्ञापकसंग्रहे* ज्ञाप्यमात्रम् अर्थात् "प्रकृतिवदनुकरणं भवति, 'क्षियः' इत्यादावियङ्निर्देशाद्"[435] इत्येतावन्मात्रं प्रोक्तम्। किन्तु *परिभाषेन्दुशेखरे* अस्याः परिभाषायाः अनित्यत्वं ज्ञापितं नागेशेन 'क्षियो दीर्घात्'[436] इत्यत्रं भाष्यमादाय। तथा च नागेशेन प्रोक्तम्- "तत्रैव प्रातिपदिकत्वनिबन्धविभक्तिकरणादनित्या चेयमिति 'क्षियो दीर्घात्' इति सूत्रे भाष्ये स्पष्टम्" इति। अत्र तावद् द्रष्टव्यम् अस्ति यत्, *परिभाषेन्दुशेखरे* न केवलं ज्ञाप्यमात्रम् अपि तु तस्याः परिभाषायाः अवतरणिका, नित्यत्वानित्यत्वप्रतिपादनम्, भाष्यसम्मतिः अस्ति न वा इत्यादयः विषयाः आलोचिताः। यदि ज्ञापकं समानं, ज्ञाप्यस्वरूपं च समानं, कुतस्तर्हि *ज्ञापकसंग्रहे* पुनरुल्लेखः इति चिन्त्यविषयः। कदाचिच्च ज्ञाप्यस्वरूपसाम्यं नागेशस्य अन्यत्र ग्रन्थेषु दृश्यते परन्तु भिन्नज्ञापकत्वं प्रोक्तम्। यथा "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति ज्ञाप्यविषये

---

433 ज्ञा. स., पृ. 2

434 प. भा. शे., पृ. 145

435 ज्ञा. स., पृ. 2

436 पा. सू. 8.2.46

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

*ज्ञापकसंग्रहे परिभाषेन्दुशेखरे* च भिन्नज्ञापकं लभ्यते। तत्र 'युवा खलतिपलितवलिनजरतीभिः' इति सूत्रस्थं 'युवा' इति पदं ज्ञापकं उक्तपरिभाषायाः इति *ज्ञापकसंग्रह*कारमतानुसारेण।[437]

तदेव ज्ञापकं श्रीमद्भट्टोजिदीक्षितः अपि स्वीकरोति। अत एव लिखति वृत्तौ- "लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते। युवा खलतिर्युवखलतिः। युवतिः खलती युवखलती इति।"[438]

*बालमनोरमा*कारः एतदेव स्पष्टीकरोति। स वदति- "ननु युवेति पुंलिङ्गनिर्देशात् कथं युवति शब्दस्य समासः इत्यत आह- लिङ्गविशिष्टेति।"[439]

अत्रैव *परिभाषेन्दुशेखरः* अवलोक्यते चेद् एतज्ज्ञायते यत् 'कुमारः श्रमणादिभिः'[440] इति सूत्रे स्त्रीलिङ्गश्रमणादिशब्दपाठः अस्याः परिभाषाः ज्ञापकम्। तथा च तत्रैव नागेशः कथयति यद् "अस्याश्च ज्ञापकं समानाधिकरणाधिकारस्थे 'कुमारः श्रमणादिभिः' इति सूत्रे स्त्रीलिङ्गश्रमणादिशब्दपाठः। स्त्रीप्रत्ययविशिष्ट-श्रमणादिभिश्च कुमारीशब्दस्यैव सामानाधिकरण्यं न तु कुमारशब्दस्येति तदेतज्ज्ञापकम्।"[441] स्त्रीप्रत्ययविशिष्टश्रमणादिशब्दानां सामानाधिकरण्यं स्त्री-प्रत्ययान्तकुमारीशब्देन सह सम्भवति न तु कुमारशब्देन सह। तर्हि

437 ज्ञा. स., पृ. 49
438 वै. सि. कौ., द्वि. भा., पृ. 82
439 तत्रैव
440 पा. सू. 2.1.70
441 प. भा. शे., पृ. 316

कुमारशब्दग्रहणं व्यर्थम्। व्यर्थं सद् इमां परिभाषां ज्ञापयति, तस्मात् कुमारशब्देन कुमारीशब्दस्यापि ग्रहणं भवति तेन न दोषापत्तिः इति *परिभाषेन्दुशेखरे*।

*ज्ञापकसंग्रहपरिभाषेन्दुशेखरौ* ग्रन्थौ सम्यग् अवलोक्येते चेद् वयं पश्यामः, *ज्ञापकसंग्रहे* यद् ज्ञापकम् उक्तं, प्रायः सर्वत्र तदेव ज्ञापकं प्रोक्तं *परिभाषेन्दुशेखरे*। पुनः *ज्ञापकसंग्रहे* ज्ञाप्यांशं विना नान्यांशस्य आलोचना विहिता। किन्तु *परिभाषेन्दुशेखरे* अस्याः परिभाषायाः स्वीकारे के दोषाः सम्भवन्ति, कुत्र अस्याः परिभाषायाः अप्रवृत्तिः अस्ति इति सर्वं सविस्तरम् आलोचितम् अस्ति। तत्समर्थनाय *महाभाष्य*मपि आश्रितम् अस्ति। अन्ते च तत्रैव *परिभाषेन्दुशेखरे* अस्याः परिभाषायाः अनित्यत्वं स्वीक्रियते। किन्तु इमे विषयाः *ज्ञापकसंग्रहे* नालोचिताः। एवञ्च उभयोः ग्रन्थयोः ज्ञापकानां कदाचित् भिन्नत्वाद् ज्ञापितविषयस्य च आलोचनायां वैषम्याद् *ज्ञापकसंग्रह*कारः *परिभाषेन्दुशेखरकार*नागेशाद् अन्यः कश्चिद् अपरः नागेशः स्यात्।

**अत्रावधेयम्-** नागेशस्य *परिभाषेन्दुशेखर*स्य तथा *ज्ञापकसंग्रह*स्य अध्ययनं क्रियते चेद् एतत् स्पष्टं भवति यत् बहवः ज्ञाप्यविषयाः ये तावत् *ज्ञापकसंग्रहे* प्रोक्ताः ते एव पुनः *परिभाषेन्दुशेखरे* प्रोक्ताः इति बहुत्र विषयाणां चर्वितचर्वणं प्रतिभाति। उदाहरणं हि *ज्ञापकसंग्रहे* प्रोक्तम् अस्ति यत् " 'दीर्घोऽकितः' इत्यकिद्ग्रहणं ज्ञापयति अभ्यासविकारेषु बाधका न भवन्ति"।[442] पुनश्च

442 तदेव, पृ. 109

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

*परिभाषेन्दुशेखरे* "अभ्यासविकारेषु बाध्यबाधकभावो नास्ति इत्यस्यां परिभाषायां कथयति 'दीर्घोऽकितः' इत्यकिद्ग्रहणमस्या ज्ञापकम्"।[443] एवम् 'अदो जग्धिर्ल्यप्तिकिति' इत्यस्मिन् शास्त्रे "ल्यब्ग्रहणं ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते"।[444] पुनश्च *परिभाषेन्दुशेखरे* प्रोक्तम्- " 'अदो जग्धिर्ल्यप्तिकिति' इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धि' इत्यत्र भाष्ये स्पष्टम्।"[445] *परिभाषेन्दुशेखरे* नागेशः बहुत्र "....ग्रहणमस्या ज्ञापकम्"[446] इत्येवं प्रयुङ्क्ते। *ज्ञापकसंग्रहे* तु प्रायः "....ग्रहणं ज्ञापयति"[447] इत्येवम् उक्त्वा ज्ञाप्यं प्रस्तुतवान्। कुतो वा प्रयोजनं *परिभाषेन्दुशेखरे* प्रस्तुतस्य विषयस्य पुनः *ज्ञापकसंग्रहे* कथनस्य इति चिन्तनीयमेतत्। *परिभाषेन्दुशेखरे* अवतरणिकाप्रयोगः लभ्यते, *ज्ञापकसंग्रहे* तु न तथा। पुनश्च *परिभाषेन्दुशेखरप्रदीपोद्द्योतपरमलघुमञ्जूषा*दिषु 'प्राञ्चः' इत्यनेन प्राचीनवैयाकरणानां मतानि प्रोक्तानि, 'परे तु' इत्यनेन नव्यवैयाकरणानां मतानि प्रोक्तानि। तादृशी शैली तु *ज्ञापकसंग्रहे* न परिलक्ष्यते। नागेशः यथा *शब्देन्दुशेखरलघुमञ्जूषापरिभाषेन्दुशेखरा*दिषु पितृमातृपरिचयः, गुरुभक्तिः, स्वनामकथनम्, शिवनमस्कारः, तत्तद्ग्रन्थनाम इत्यादिपरिचयं कारितवान् तथा किमपि *ज्ञापकसंग्रहे* उल्लिखितं नास्ति। सर्वोपरि *ज्ञापकसंग्रहे* मङ्गलाचरण-

---

443 प. भा. शे., पृ. 304
444 ज्ञा. स., पृ. 50
445 प. भा. शे., पृ. 240
446 तदेव, पृ. 240, 142, 349. 304
447 ज्ञा. स., पृ. 50, 51, 69, 68

श्लोकाभावः आश्चर्यं जनयति, यतो हि नागेशस्य प्रायः सर्वेषु व्याकरणग्रन्थेषु मङ्गलाचरणश्लोकः अस्त्येव। एवञ्च उपर्युक्तविषयविमर्शैः ज्ञायते यद् *ज्ञापकसंग्रहे* प्रोक्ता एतादृशी शैली नागेशस्य नास्ति, अतः *ज्ञापकसंग्रहस्य* कर्ता भिन्नः कोऽपि नागेशः स्यादित्यहं मन्ये।

## 2.6. उपसंहृतिः

त्रिमुनि व्याकरणमिति तु प्रसिद्धमेव। तत्रापि सन्ति बहवः क्रमाः व्याकरणस्य। तत्र महावैयाकरणः सर्वशास्त्रविद् नागेशः तु यथैव प्रक्रियाक्रमे आदरणीयः तथैव दार्शनिकक्रमे अपि। नागेशः न केवलं वैयाकरणः अपि तु दार्शनिकः अपि आसीत्, तत्तु तद्ग्रन्थाध्ययनेन स्पष्टं प्रतीयते। यद्यपि नागेशः व्याकरणदर्शनस्य सिद्धान्तानां प्रतिपादनकाले *वाक्यपदीय*कारिकाः उद्धृतवान्। परन्तु केषुचित् स्थलेषु भिन्नमार्गः तेन प्रदर्शितः। संदर्भे अस्मिन् वक्तुं शक्यते यद् भर्तृहरिः वैखरी, मध्यमा, पश्यन्ती इति वाणीभेदान् स्वीकृतवान्। तथा च प्रोक्तम्-

वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतद्द्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्।।448

परन्तु नागेशः परापश्यन्तीमध्यमावैखरीभागान् गृहीतवान्। तथा चोक्तम्-

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

448 प. ल. म., सम्पा. आचार्यः लोकमणिदाहालः, पृ. 94

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।[449]

किन्तु महान् अयं दुःखविषयः अस्ति यत्- परमप्रामाणिकस्य सर्वशास्त्रनिष्णातस्य नागेशस्य जीवनवृत्तान्तविषये मनस्सन्तोषमूलकप्रमाणं नास्ति। अत्र नागेशस्य देशकालकृतिविषयकम् आलोचनम् आदौ विहितम् अस्ति। नागेशः स्वयं ग्रन्थेषु पितृमातृपरिचयं कारितवान्। अस्य च नागेशस्य नामान्तराणि अपि लभ्यन्ते- नागोजीभट्टः,[450] नागेशभट्टः, काले, उपाध्यायः इति। किन्तु देशकालपरिचयस्तु तेन नोल्लिखितः कुत्रापि स्पष्टतया। अतः उपलभ्यमानप्रमाणसहयोगेन अत्र तत्परिचयकरणे यत्नः विहितः। तस्य च जन्मवंशपरम्परा, विद्यावंशपरम्परा च अस्मिन्नध्याये प्रदर्शितः। सः नागेशः महाराष्ट्रीयः इति विदुषां मतिः। क्रिस्तीयसप्तदशशतकमध्यकालः तस्य जीवनारम्भकालः इति उपलभ्यमानप्रमाणैः अवगम्यते। विस्तरस्तु उपरि आलोचितः अस्त्येव। नागेशस्य रचनाः काः तद्विषये अपि यथाप्रमाणं यथालब्धं विवरणं कृतम्। अखिलशास्त्रपारङ्गतस्य नागेशस्य गुरुशिष्यपरम्परा आलोचिता। ततः *ज्ञापकसंग्रह*कर्ता कः इति विषये विमर्शः विहितः।

आत्मनाम गुरोर्नाम नामातिकृपणस्य च।

449 वा. प., ब्र., कारि. पृ. 150

450 इति श्रीमन्महामहोपाध्यायशिवभट्टसुतसतीगर्भजनागोजीभट्टकृत*परिभाषेन्दुशेखरः* समाप्तः। प. भा. शे., पृ. 480

## द्वितीयोऽध्यायः

श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः।।[451]

इत्येवं भारतीयशास्त्रेषु संस्कृतसाहित्येऽपि वा मनुसंदर्शिता इयं धारणा पर्याप्ततः प्रचलिता। इदमेव कारणं यत् प्राचीनाः संस्कृतशास्त्रकर्तारः स्वविषये सवकीयं परिचयं नैव ददुः। इयमेव स्थितिः *ज्ञापकसंग्रह*कारस्य विषये अपि, तन्न कथनीयम्। अर्थात् स्मृतिवचनेन श्रेयोनाशकत्वरूपप्रत्यवायप्रदर्शनपूर्वकं निषिद्धत्वात् स्वकीयनामनिर्देशः न युक्तः तथापि "नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः"[452] इत्येवं *परिभाषेन्दुशेखरा*दिग्रन्थेषु तस्यापि नामोल्लेखः प्राप्यते। तथापि *ज्ञापकसंग्रहे* तस्य कुत्रापि नामोल्लेखः नैव प्राप्यते। यदि च ग्रन्थः अयं तस्य कृतिः अभविष्यत् तदा अवश्यमेव सः स्वस्य नाम अलेखिष्यत्।

अस्य च ग्रन्थस्य कर्ता कः इत्यस्मिन् विषये निश्चयः कोऽपि नास्ति। तथापि अस्मिन्नध्याये ग्रन्थकर्तृत्वविषयचर्चा काचिद् विहिता। अत्र द्विविधम् अध्ययनं प्रदर्शितम्। एकं तावद् *प्रदीपोद्द्योतज्ञापकसंग्रह*योः अध्ययनम्, अपरं तावत् *ज्ञापकसंग्रहपरिभाषेन्दुशेखर*योः अध्ययनम्। प्रथमाध्ययने *उद्द्योत*कर्ता नागेशः एव *ज्ञापकसंग्रह*कर्ता नागेशः न वेति विषये आलोचना विहिता। कुत्रापि न वा नागेशेन नापि वा भिन्नेन केनचित् प्रमाणीकृतः यत् *उद्द्योत*कर्ता नागेशः एव *ज्ञापकसंग्रह*स्य कर्ता। लिखितप्रमाणं तु किमपि न लभ्यते। तथापि *प्रदीपोद्द्योत*स्य कानिचित् स्थलानि, *ज्ञापकसंग्रहस्य* कानिचिच्च स्थलानि आदाय अनुशीलनम् एकं विहितम्।

---

451 म. सु. स., तृ. भा., पृ. 1114

452 प. भा. शे., पृ. 1

## *ज्ञापकसंग्रह*कर्तृत्वविचारः

अस्मिन् विषये एन. एस. रामानुजताताचार्यः मार्गं प्रदर्शितवान् *ज्ञापकसंग्रह*व्याख्यया। तयोः उभयोः ग्रन्थयोः परिशीलनेन *ज्ञापकसंग्रह*कर्ता नागेशः एव *प्रदीपोद्द्योत*कर्ता नागेशः इति विषयविमर्शः प्रस्तुतः।

द्वितीयाध्ययने वस्तुतः *परिभाषेन्दुशेखरस्य* कर्ता यः नागेशः स एव *ज्ञापकसंग्रहस्य* कर्ता अस्ति न वेति विषये दृढतया प्रमाणम् उपस्थापयितुं न शक्यते। अस्मिन् ग्रन्थे आदौ मध्ये अन्ते वा कुत्रापि नागेशस्य नाम न प्राप्यते। स्वनिर्मिते *शेखरा*दिग्रन्थेषु अपि *ज्ञापकसंग्रहाख्यं* ग्रन्थं न निरदिशत्। तथापि *परिभाषेन्दुशेखरे*ण सार्धम् अस्य *ज्ञापकसंग्रहस्य* अध्ययनं क्रियते चेद् अवश्यं प्रतीयते यद् उभयोः रचनाशैली समाना। पुनः ज्ञापितवचनशरीरमपि प्रायः सर्वत्र समानम्। ज्ञापकमपि उभयत्र प्रायः समानम्। अन्ते एन. एस. रामानुजतातार्यमहोदयानां नये *परिभाषेन्दुशेखरस्य* कर्ता नागेशः एव *ज्ञापकसंग्रहस्य* कर्ता इति उक्तम्। तथा च तेन प्रोक्तम्- "वस्तुतस्त्वेतद्ग्रन्थस्य परिशीलने कृते अस्य नागेशकृतत्वे न कापि विप्रतिपत्तिर्भविष्यतीति मन्ये।"[453]

किन्तु अस्मिन् शोधप्रबन्धे मया *ज्ञापकसंग्रहस्य* कर्ता भिन्नः कश्चिद् नागेशः स्यात् इति प्रमाणीकरणाय यत्नः विहितः। *परिभाषेन्दुशेखर-लघुशब्देन्दुशेखर-प्रदीपोद्द्योता*दिप्रसिद्धव्याकरणरचनासु पितृमातृगुरुपरिचयपूर्वकं भक्तिप्रदर्शनम्, आत्मनामकथनं, प्रौढशैल्याः आश्रयणं, 'परे तु', 'प्राञ्चः' 'यत्तु'

---

453 ज्ञा. स., पृ. 1

इत्येतेषां प्रयोगः, परमतादिखण्डनपूर्वकं स्वमतोपस्थापनम्, विशदेन विषयस्य स्पष्टीकरणाय यत्नः, नैयायिकमतखण्डनाय नव्यन्यायशैल्याश्रयणम्, व्याकरण-शास्त्रस्य स्वाभाविककाठिन्ये सत्त्वे अपि सरलभाषाप्रयोगाय यत्नः इत्यादीनि नागेशस्य यानि मुख्यवैशिष्ट्यानि सन्ति, तेषां नितरामभावः *ज्ञापकसंग्रहे* दृश्यते। पुनश्च बहूनि ज्ञाप्यानि सन्ति येषां ज्ञाप्यानां संग्रहः करणीयः आसीत् *ज्ञापकसंग्रहे*, किन्तु संग्रहः अकृतः। कानिचित् ज्ञाप्यानि सन्ति परिभाषारूपाणि। तेषां ज्ञाप्यानां *परिभाषेन्दुशेखरे* परिभाषात्वेन पाठे सत्यपि पुनरत्र *ज्ञापकसंग्रहे* कथनम् असंगतं प्रतिभाति। पुनरत्र *ज्ञापकसंग्रहे* केवलं ज्ञाप्यज्ञापमात्रोल्लेख एवास्ति। तत्सर्वम् अस्मिन्नध्याये सविस्तरम् आलोचितम्।

तदेतत्समुपलभ्यप्रमाणैः इदं विभावयितुं शक्यं यत्- *परिभाषेन्दुशेखर-लघुमञ्जूषा-लघुशब्देन्दुशेखर-प्रदीपोद्द्योत-परमलघुमञ्जूषा*दीनां ग्रन्थानां कर्ता यः नागेशः सः *ज्ञापकसंग्रह*स्य कर्ता नास्ति, अपि तु सः कश्चिद् अपरः नागेशः भवितुम् अहर्ति। एवं शोधप्रबन्धस्य द्वितीयाध्यायः समाप्तः इति शिवम्।

# तृतीयोऽध्यायः

## *महाभाष्य*सम्मतज्ञापकविमर्शः

### 3.1. उपोद्घातः

अखिलशास्त्रोपकारकं व्याकरणम्। तस्य च व्याकरणस्य सन्ति सूत्रक्रमदर्शनक्रमप्रक्रियाक्रमादयः। सर्वत्रैव सूत्रार्थज्ञानस्य यथार्थज्ञानम् आवश्यकम्। तच्च सूत्रस्य सामान्याध्ययनेन न सम्भवति। अपि तु तदर्थं विशेषाध्ययनम् आवश्यकं सूत्रस्य। वयं जानीमः संज्ञापरिभाषाधिकारप्रभृतिसूत्राणि विधिसूत्रार्थज्ञानाय उपकारकाणि भवन्ति।

तत्र संज्ञापरिभाषाविधिनियमातिदेशाधिकारात्मकपाणिनीयषड्विधसूत्रेषु परिभाषाणामस्ति माहात्म्यम्। पाणिन्युच्चरितसूत्रात्मकपरिभाषा इत्येकम् यथा 'मिदचोऽन्त्यात्परः'[454] इत्यादि, अपरं तावत् पाणिनीयसूत्रैः ज्ञापिता (बोधिता) वा वाचनिकी वा लोकन्यायसिद्धा वा। प्रसिद्धेषु *परिभाषेन्दुशेखरपरिभाषावृत्त्या*दिग्रन्थेषु सूत्रात्मकपरिभाषाणां व्याख्यानं न लभ्यते। तर्हि तत्रत्यपरिभाषाणां स्वरूपं किमिति चेत् भूतिटीकाकारो ब्रवीति "संकेतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारक-शास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधकसहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम्।" [455]

---

454 पा. सू. 1.1.47

455 प. भा. शे., पृ. 2

## *महाभाष्य*सम्मतज्ञापकविमर्शः

*महाभाष्ये* तत्र तत्र "आचार्यप्रवृत्तिर्ज्ञापयति"[456] इत्येवंरूपाणि बहूनि वचनानि सन्ति। सूत्रस्थेन लिङ्गेन ज्ञापितानि वचनानि तत्र समुपलभ्यन्ते। तानि च वचनानि द्विविधानि परिभाषारूपाणि तद्व्यतिरिक्तानि चेति। परिभाषारूपाणि वचनानि पाणिनीयव्याकरणात् प्राचीनेष्वपि व्याकरणेषु वचनरूपेण पठितानि पाणिनिना स्वकीयाष्टाध्याय्यां तत्तल्लिङ्गेन स्वानुमततया सूचितानि सन्ति। तदुक्तं "प्राचीनव्याकरणतन्त्रे वाचनिकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते।"[457] परिभाषात्मकवचनसंकलनं सीरदेवस्य *परिभाषावृत्तौ*, नागेशस्य *परिभाषेन्दुशेखरे*, व्याडेः *परिभाषापाठे* च लभ्यते। परिभाषाव्यतिरिक्तानां महाभाष्योपनिबद्धानां ज्ञापकसिद्धवचनानां सङ्कलनं नागेशभट्टकृत*ज्ञापकसंग्रहाख्ये* ग्रन्थे दृश्यते।

'*महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा' इति शीर्षकस्य मम प्रस्तुतशोधप्रबन्धस्य '*महाभाष्य*सम्मतज्ञापकविमर्शः' इत्याख्ये अस्मिन् तृतीयाध्याये चितानां केषाञ्चिद् *ज्ञापकसंग्रहस्थ*ज्ञापितवचनानाम् अनुशीलनं करिष्यते पतञ्जलि*महाभाष्य*दृष्ट्या। इदमवधेयं यद् अस्मिन्नध्याये ये योगाः आलोयिष्यन्ते ते सर्वे अपि *महाभाष्ये* चर्चितानि सन्ति। पुनः तानि ज्ञापितवचनानि *महाभाष्य*सम्मतानि सन्ति न वेति आलोचना विधास्यते। तानि ज्ञाप्यानि नित्यानि आहोस्विद् अनित्यानि इत्यपि वक्ष्यते। कस्यचित् ज्ञापकसूत्रस्य चत्वारः पादाः भवन्ति- आदौ वैयर्थ्यं,

---

456 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 269, 592, 605, 615, 645.....

457 प. भा. शे., पृ. 2

व्यर्थं सद् ज्ञापनं, स्वांशे चारितार्थ्यं, फलमन्यत्र इति एते अस्मिन्नध्याये प्रतियोगम् आलोचयिष्यन्ते। तज्ज्ञाप्यालोचनायां *वैयाकरणसिद्धान्तकौमुदी*कारभट्टोजिदीक्षितमतं, *पदमञ्जरी*कारहरदत्तमतं, *न्यास*कारजिनेन्द्रबुद्धिमतं, *काशिका*कारवामनजयादित्यमतं, *महाभाष्य*कारपतञ्जलिमतं, *ज्ञापकसंग्रह*कारनागेशमतम् च इत्यादीनि प्रस्तूयन्ते। क्वचित् एस. सि. वसुमहोदयमतं, *बालमनोरमा*टीकाकारवासुदेवदीक्षितमतं, *तत्त्वबोधिनी*-टीकाकारज्ञानेन्द्रसरस्वतीमतं, *भाष्यप्रदीप*कारकैयटमतं, *प्रदीपोद्द्योत*मतं च उल्लिख्यन्ते। तेषां ज्ञाप्यानाम् एकैकशः आलोचना आरभ्यते-

## 3.2. लुगादयः सर्वादिशाः भवन्ति।

लुक्, श्लुः, लुप् इति एतैः विशिष्टशब्दैः यदि प्रत्ययादर्शनं क्रियते तर्हि तस्य कृतस्य प्रत्ययादर्शनस्य क्रमशः लुक्संज्ञा, श्लुसंज्ञा, लुप्संज्ञा च भवति इति 'प्रत्ययस्य लुक्श्लुलुपः'[458] इति शास्त्रस्य अर्थः।

भिन्नं संज्ञाकरणं कुत इति चेत्, अस्ति प्रत्येकं संज्ञाकरणस्य पृथक् प्रयोजनम्। अस्ति तत्र तत्र विशिष्टं कार्यम्। तद्यथा- यत्र श्लुसंज्ञया प्रत्ययस्य लोपः विधीयते तत्र 'श्लौ'[459] इत्यनेन प्रकृतेः द्वित्वं भवति। तस्माद् दाधातोः लटि प्रथमपुरुषैकवचने ददाति इति द्विदकारात्मकं रूपं दृश्यते।

---

458 पा. सू. 1.1.61

459 पा. सू. 6.1.10

यत्र च लुप्संज्ञया प्रत्ययस्य लोपः विधीयते तत्र 'लुपि युक्तवद्व्यक्तिवचने'[460] इति शास्त्रेण लुप्तप्रत्ययान्तशब्दस्य वचनं (लिङ्गं च) प्रकृतिम् अनुसरति, न तु विशेष्यम्। यथा पञ्चालाः जनपदः इति लोके प्रयोगः भवति। अत्र जनपदशब्दस्य एकवचनत्वे अपि तत्र पञ्चालशब्दस्य बहुवचनप्रयोगः भवति। पञ्चालानां निवासः इत्यर्थे 'तस्य निवासः'[461] इति सूत्रेण अण्प्रत्ययः भवति, तस्य च 'जनपदे लुप्'[462] इति शास्त्रेण लुप् भवति तेन पञ्चाल इति भवति। अत्र पञ्चालशब्दः विशेषणं भवति जनपदशब्दस्य। किन्तु तथापि वंशवाचिनं पञ्चालशब्दम् अर्थात् मूलप्रकृतिम् अनुसरति। लोके तु पञ्चालशब्दः नित्यबहुवचनान्तः अस्ति अतः बहुवचनप्रयोगः तस्य।

यत्र च तद्धितप्रत्ययस्य लुक्भवति तत्र 'लुक्तद्धितलुकि'[463] इति शास्त्रेण उपसर्जनस्य स्त्रीप्रत्ययस्यापि लुक् भवति। यथा आमलक्याः फलम् इत्यर्थे अणि, तस्य च अणः 'फले लुक्'[464] इति योगेन लुक् भवति। अत्र 'लुक्तद्धितलुकि'[465] इति योगेन उपसर्जनस्य स्त्रीप्रत्ययस्य लुक् भवति।

---

460 पा. सू. 1.2.51
461 पा. सू. 4.2.69
462 पा. सू. 4.2.81
463 पा. सू. 1.2.49
464 पा. सू. 4.3.63
465 पा. सू. 1.2.49

एते लुगादयः आदेशाः सर्वादेशाः उत अन्त्यादेशः इति शङ्का जायते। लोपः इति संज्ञया प्रत्ययलोपे विहिते 'अलोऽन्त्यस्य'[466] इति शास्त्रेण अन्तिमवर्णस्य लोपः, पुनश्च 'आदेः परस्य'[467] इत्यनेन आदिवर्णस्य एव लोपः भवति। किन्तु यत्र लुक्, श्लुः, लुप् इति एताः संज्ञाः सन्ति तत्र तु उक्ते परिभाषे न प्रवर्तेते। तत्र सम्पूर्णस्यैव प्रत्ययस्य अदर्शनं भवति। यथा 'षड्भ्यो लुक्'[468] इति शास्त्रेण विधीयमानस्य जस्प्रत्ययस्य लुक् सम्पूर्णस्यैव भवति, न तु केवलम् अन्ते विद्यमानस्य सकारस्य अथवा आदौ वर्तमानस्य अकारस्य। किन्तु तत् कथं ज्ञायते इत्यस्मिन् विषये अस्ति ज्ञापकं तद् अत्र प्रस्तूयते-

***ज्ञापकसंग्रह*कारमतम्-** प्रत्ययस्य लुक्श्लुलुपः इत्यस्मिन् सूत्रे प्रत्ययग्रहणं कुतः इत्यस्मिन् विषये वार्त्तिककारः प्रयोजनं ब्रूते- "सर्वादेशार्थं वा वचनप्रामाण्यात्"[469] अर्थात् लुक्श्लुलुपः सर्वादेशाः यथा भवेयुः तदर्थम् अर्थात् सर्वादेशार्थं तत्र प्रत्ययग्रहणं कार्यम्। किन्तु एतन्नाङ्गीकरोति *महाभाष्य*कारः, तथा चोच्यते तेन- "एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति- लुक्श्लुलुपः सर्वादेशाः भवन्तीति। यदयं 'लुग्वा दुहदिहलिहगुहात्मनेपदे दन्त्ये' इति लोपे प्रकृते लुकं शास्ति"[470] इति।

---

466 पा. सू. 1.1.52

467 पा. सू. 1.1.54

468 पा. सू. 7.1.22

469 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 1420

470 तदेव, पृ. 1422

### *महाभाष्य*सम्मतज्ञापकविमर्शः

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि इत्यर्थकेन 'लुग्वा दुह'[471] इति सूत्रेण दुहादीनां क्सस्य दन्त्ये तङि परे लुग्वा विधीयते। अदुग्ध, अधुक्षत इत्यादिकमुदाहरणम्। 'घोर्लोपो लेटि वा'[472] इति शास्त्रादेव लोपः इत्यनुवृत्त्या एव सिद्धे सति अस्मिन् शास्त्रे लोपग्रहणं कुतः इति प्रश्नः उदेति। तदा उच्यते अत्र लुग्ग्रहणं लुग्ग्रहणेन क्रियमाणम् अदर्शनं सर्वादेशः इति ज्ञापयति। लोपः तु अन्त्यादेशः अस्ति। यदि च लुकः अपि अन्त्यादेशत्वं स्यात् तदा तु लोपपदस्य अनुवृत्त्यैव इष्टसिद्धिः भवेत्, तदा तु लुग्ग्रहणेन किमपि प्रयोजनं नास्ति। विहितेन लुग्ग्रहणेन तु सर्वादेशत्वं ज्ञाप्यते इति भावः। तदेतत् सर्वं *ज्ञापकसंग्रह*कारेण प्रोक्तम् अस्ति यत्- "प्रत्ययस्येतत्सामर्थ्यात् लोपे प्रकृते 'लुग्वा दुह' इति ज्ञापकाच्च लुगादयः सर्वादेशाः।"[473]

***पदमञ्जरी*कारमतम्-** *पदमञ्जरी*कारः उदाहरणसहयोगेन प्रत्ययग्रहणस्य प्रयोजनं प्रस्तुवन् कथयति- "सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्।"[474] यदि च प्रत्ययग्रहणं न क्रियते तर्हि 'यञिञोश्च'[475], 'सुपो धातुप्रातिपदिकयोः'[476] इत्यादिषु

471 पा. सू. 7.3.73
472 पा. सू. 7.3.70
473 ज्ञा. स., पृ. 29
474 का. वृ., प्र. भा., पृ. 221-222
475 पा. सू. 4.1.101
476 पा. सू. 2.4.71

यत्र अनेकाल् प्रत्ययः अस्ति, तत्र अलोऽन्त्यस्य इति प्रवर्तेत। 'लवणाल्लुक्'[477] इत्यादौ तु आदेः स्यात्, प्रत्ययग्रहणे उपात्ते तु तत्सामर्थ्यात् सर्वादिशः लुगादिर्भवति। किन्तु नैतत् प्रयोजनम्। अस्ति अन्यद् ज्ञापकम्। कथमिति चेत् घोर्लोपो लेटि वा इति सूत्रे लोपः प्रकृतः। तथापि लुग्वा दुहदिह इति लुकं शास्ति। तेन ज्ञाप्यते यद् लुगादयः सर्वादिशाः भवन्ति इति। 'अलोऽन्त्यस्य' हि अदर्शनं प्रकृतेन लोपेन अपि सिध्यति। एवञ्च 'लोपव्यतिरिक्तमदर्शनं सर्वादिशः'[478] इति समर्थ्यते *पदमञ्जरी*कारेण। एवञ्च तन्नये ज्ञापकात् सिद्धे सर्वादिशार्थमपि प्रत्ययग्रहणं न कर्तव्यमिति प्रश्नः।

तथा चोक्तं *पदमञ्जरी*कारेण- " 'अलोऽन्त्यस्य' ह्यदर्शनं प्रकृतेन लोपेनापि सिद्धम्। विपर्ययस्तु न भवति, घोर्लोपः इत्यत्र तावदसंजातविरोधित्वाद् 'अलोऽन्त्यस्य' इति प्रवर्तते, पश्चाल्लुग्ग्रहणं तस्यैव सर्वादिशतां गमयति। सामान्येन च ज्ञापकं समर्थयिष्यते- लोपव्यतिरिक्तमदर्शनं सर्वादिशः" इति।[479] तस्मात् सर्वादिशार्थं प्रत्ययग्रहणं कर्तव्यम् इति नास्ति। तस्य तु ज्ञापकम् अस्ति लुग्वा दुहदिह इति लुगनुशासनम्।

***महाभाष्य*कारमतम्-** 'प्रत्ययस्य लुक्श्लुलुपः' इत्यस्मिन् सूत्रे प्रत्ययस्य इति कुतः उपात्तम् इत्यस्मिन् विषये नैकाः चर्चाः *महाभाष्ये* लभ्यन्ते। तत्र

---

477 पा. सू. 4.4.24

478 का. वृ., प्र. भा., पृ. 222

479 तत्रैव

## *महाभाष्य*सम्मतज्ञापकविमर्शः

“सर्वादेशार्थं वा वचनप्रामाण्याद्” इति[480] वार्त्तिकम् उपस्थाप्यते। अर्थात् सर्वादेशार्थं तत्र प्रत्ययग्रहणं कार्यम्। लुक्श्लुलुपः सर्वादेशाः यथा भवेयुः। किन्तु क्रियमाणे अपि प्रत्ययग्रहणे ‘अलोऽन्त्यस्य’ इति वचनात् प्रत्ययस्य यः अन्त्यः तस्यैव लुक्श्लुलुपः प्राप्नुयुः इति कथं लुक्श्लुलुपः सर्वादेशाः लभ्याः इति प्रश्नः तिष्ठति एव। अतः वार्त्तिककारः कथयति वचनप्रामाण्यात् अर्थात् प्रत्ययग्रहणसामर्थ्यात् ‘अलोऽन्त्यस्य’ इत्यस्य बाधः भविष्यति। किन्तु वार्त्तिककारस्य मतमिदं खण्ड्यते। तद्यथा- भाष्यकारः कथयति “आचार्यप्रवृत्तिर्ज्ञापयति- लुक्श्लुलुपः सर्वादेशाः भवन्तीति। यदयं ‘लुग्वा दुहदिहलिहगुहात्मनेपदे दन्त्ये’ इति लोपे प्रकृते लुकं शास्ति” इति।[481] एतेन भाष्यकारः प्रत्ययग्रहणस्य तत्प्रयोजनं निराकरोति। प्रत्ययग्रहणस्य तु अन्यत् प्रयोजनं स्वीकरोति। तेन सर्वादेशार्थं तस्मिन् सूत्रे प्रत्ययग्रहणं कर्तव्यम् इति तु नास्ति।

**अत्रावधेयम्-** *ज्ञापकसंग्रह*कारः वार्त्तिककारमतेन सह *भाष्य*कारमतमपि प्रस्तुतवान्। अर्थात् *ज्ञापकसंग्रह*कारः उभयमपि मतं स्वीकरोति। तथा चोक्तं तेन “प्रत्ययस्येत्येतत्सामर्थ्यात् लोपे प्रकृते ‘लुग्वा दुह’ इति ज्ञापकाच्च लुगादयः सर्वादेशाः” इति।[482]

480 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 1420

481 तदेव, पृ. 1422

482 ज्ञा. स., पृ. 29

वस्तुतः प्रत्ययग्रहणसामर्थ्याद् लुगादयः सर्वादिशाः इति इदं वार्त्तिककारवर्त्मना प्रोक्तम्। तदेतत् कथयति *ज्ञापकसंग्रह*कारः 'प्रत्ययस्येत्ये-तत्सामर्थ्यादित्यादिना'।

पुनः 'लुग्वा दुह' इति ज्ञापकाद् इति यदुक्तं तत् तु *महाभाष्य*कारमतेन इत्येवमवधेयम्। एवञ्च प्रकृतज्ञाप्यं तर्हि *महाभाष्य*कारसम्मतम् अस्ति इति आयातम्।

भट्टोजिदीक्षितः वा *न्यास*कारः वा *काशिका*कारः वा अस्य च ज्ञापकस्य विषये तथा किमपि नोक्तवान्।

## 3.3. सर्वो द्वन्द्वो विभाषयैकवद् भवति।

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वसमासे बहुवचनस्य स्थाने नित्यं द्विवचनं भवति इत्यर्थकस्य 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्'[483] इति शास्त्रस्य उदाहरणं हि तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू। अस्मिन् च सूत्रे बहुवचनस्येति पदेन सर्वो द्वन्द्वो विभाषयैकवद्भवति इति कथं ज्ञाप्यते तदधुना नैकमतपुरस्सरम् अत्र आलोच्यते।

***ज्ञापकसंग्रह*कारमतम्-** तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वसमासे बहुत्वं द्वित्ववद् भवति इत्यर्थकस्य 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' इति लक्षणस्य उदाहरणं तावत् तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू। अत्र प्रश्नः उदेति

---

483 पा. सू. 1.2.63

बहुवचनपदं कुत उपात्तं सूत्रे। यदि उच्यते एतस्य पदस्य अभावे एकवचनस्यापि द्विवचनं स्यात् तद्वारणाय बहुवचनपदम् उपात्तं, तन्न साधु, यतो हि तिष्यपुनर्वस्वोर्द्वन्द्वे एकवचनं दुर्लभम् अस्ति, तस्य स्थाने तु द्विवचनप्राप्तिरेव नास्ति। अतः बहुवचनपदं किमर्थम् इति प्रश्नः तथैव तिष्ठति। तदा उच्यते- तिष्यश्च पुनर्वसू च एषां समाहारः इति समाहारद्वन्द्वे एकवद्भावात् तु एकवचनं सुलभम् अस्ति। तदपि न साधु, यतो हि प्राण्यङ्गादीनाम् एव समाहारे द्वन्द्वविधानं भवति। यदि चोच्यते 'जातिरप्राणिनाम्'[484] इति सूत्रेण अत्र समाहारद्वन्द्वे एकवद्भावः भवति। तदपि न युक्तं, यतो हि अप्राणिनामिति प्रतिषेधः अस्ति। एवञ्च एकवचनान्तः तिष्यपुनर्वसुशब्दः सुलभः एव नास्ति, तर्हि कथं वा एकवचनस्य द्विवचनप्राप्तिः भवेत्, अतः 'तिष्यपुनर्वस्वोः' इति शास्त्रे बहुवचनस्य इति पदं व्यर्थं भवति। एवञ्च व्यर्थं सत् बहुवचनपदं सर्वो द्वन्द्वो विभाषा एकवदिति ज्ञापयति। तथा चोक्तं *ज्ञापकसंग्रह*कारेण- " 'तिष्यपुनर्वस्वोः' अत्र बहुवचनग्रहणात् ज्ञापकात् सर्वो द्वन्द्वो विभाषयैकवद्भवदिति ज्ञाप्यते। एवं च तिष्यपुनर्वस्विति तद्व्यावर्त्यम्"[485] इति।

एवञ्च तिष्यश्च पुनर्वसू च इति इतरेतरयोगद्वन्द्वसमासे तस्य एकवद्भावपक्षे तिष्यपुनर्वसु इत्यत्र एकवचनस्य द्विवचनं यथा न स्यात् तदर्थं बहुवचनपदम् उपात्तम् इति स्वांशे चारितार्थ्यम्।

---

484 पा. सू. 2.4.6

485 ज्ञा. स., पृ. 35

*ज्ञापकसंग्रह*व्याख्याकारः एन. एस. रामानुजताताचार्यः ब्रूते- “वस्तुतस्तु तिष्यपुनर्वस्वोः लोके प्राणित्वेन व्यवहाराभावात् प्रतिमन्वन्तरं नक्षत्रभेदेन तिष्यपुनर्वस्वाधारा जातिः संभवतीति च हेतोः अप्राणिजातिवाचित्वेन जातिरप्राणि-नामित्यनेन एकवद्भावे सति तस्यैकवचनस्य द्विवचनं मा भूदित्येतदर्थं बहुवचनग्रहणमित्येवोचितमित्याह-अथवेति। प्राणा एवात्र भवन्त इति। तिष्य-पुनर्वस्वधीनस्थितिकत्वात् प्राणिनां तिष्यपुनर्वस्वोः कथंचित्प्राणत्वं वक्तुं शक्यते न तु प्राणित्वमिति भावः। ततश्चाप्राणिनामिति निषेधो न प्रवर्तत इत्याशयः” इति। तथा चोक्तं ज्ञापकसंग्रकारेण- “अथवा जातिरप्राणिनामित्येकवत्त्वम्। नात्रभवन्तः प्राणिनः प्राणा एवात्रभवन्तः”[486] इति।

***काशिका*कारमतम्-** *काशिका*कारौ कथयतः यत् बहुवचनग्रहणेन सर्वो द्वन्द्वो विभाषा एकवद्भवति इति ज्ञाप्यते। तथा च तेन प्रोक्तम्- “बहुवचनस्येति किम्। एकवचनस्य मा भूत्- तिष्यपुनर्वसु इदमिति। ‘सर्वो द्वन्द्वो विभाषा एकवद्भवति’ इत्यस्यैतदेव ज्ञापकम्” इति।[487]

***पदमञ्जरी*कारमतम्-** तिष्यादिसूत्रे बहुवचनग्रहणं सर्वो द्वन्द्वो विभाषैकवद्भवति इति ज्ञापनार्थम् इति तु ज्ञातमेव अस्ति। तत्र कश्चिद् विशिष्टः विषयः *पदमञ्जरी*कारेण प्रस्तुतः। तदत्रोच्यते, एकवद्भावप्रकरणे प्राण्यङ्गादीनां समाहारे एव द्वन्द्वसमासः भवति, दधि-पयआदीनाम् इतरेतरयोग एव इति नियमः तत्र

---

486 तत्रैव

487 का. वृ., प्र. भा., पृ. 372

स्वीकृतः। पुनः तत्र प्रकरणे अनुपात्तानां चार्थे द्वन्द्वः इत्येव समाहारद्वन्द्वेतरेतरयोगद्वन्द्वयोः सिद्धिः भवति। तर्हि ज्ञापकोपस्थापने किं प्रयोजनम् इति प्रश्नः उदेति। तत्र *पदमञ्जरी*कारस्य अभिप्रायविशेषः अस्ति यत् विपरीतः अपि नियमः सूत्रे सम्भाव्यते- "प्राण्यङ्गादीनाम् एव समाहारः इति। तस्माद्बहुवचनग्रहणेन प्राण्यङ्गादीनां नियम्यत्वं ज्ञाप्यते"[488] इति।

***न्यास*कारमतम्-** तिष्यपुनर्वसु इदम् इत्यत्र कथं वा एकवद्भावः इत्यत्र *न्यास*टीकाकारः बहुविधान् विषयान् प्रस्तुतवान्। जातिरप्राणिनाम् इत्यनेन एकवद्भावः इति चेन्न, यतो हि अयं शब्दः देवदत्तादिशब्दवद् संज्ञाशब्दः अस्ति। अयं तु जातिशब्दः नास्ति, अनेकाधारा हि खलु जातिर्भवति। तिष्यादिशब्दस्तु तथा नास्ति। पुनरेतदपि उच्यते यत् "जातिप्रधानपरत्वे च जातिद्रव्याणामयमेकवद्भावः, न नियतद्रव्यविवक्षायाम्"[489] इति, नियतद्रव्यविवक्षा तु अत्र अस्ति। अतः 'जातिरप्राणिनाम्' इत्यनेन एकवद्भावः नोपपद्यते। पुनः अन्यद् एकवद्भावलक्षणम् अपि नास्ति। एवञ्चात्र तिष्यपुनर्वस्वोर्नक्षत्रे द्वन्द्वसमासे सति बहुत्वाद् बहुवचनं स्यादेव। अतः बहुवचनग्रहणं व्यर्थं सत् 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति ज्ञापयति। अतः बहुवचनग्रहणम् एकवचननिवृत्त्यर्थं कृतमित्यभिप्रायः फलितः।

**भाष्यकाराशयः-** 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति ज्ञापयन् *महाभाष्य*कारः पतञ्जलिः अन्यत्फलं प्रोक्तवान्। स उक्तवान्- "किमेतस्य ज्ञापने

---

488 तत्रैव

489 तदेव, पृ. 371-372

प्रयोजनम्। बाभ्रवशालङ्कायनम् बाभ्रवशालङ्कायना इत्येतत्सिद्धं भवति"।[490] एवं बाभ्रवाश्च शालङ्कायनाश्च इति इतरेतरयोगद्वन्द्वसमासे बाभ्रवशालङ्कायनम् इति एकवचनान्तस्य साधुत्वम् इत्युक्तं भाष्ये। तत्र *प्रदीप*टीकायामुच्यते- "अप्राणिजातिद्वन्द्वः नित्यमेकवद्भवति। प्राणिद्वन्द्वस्तु विकल्पेन भवति। न्यायसिद्धश्चार्थो बहुवचनग्रहणेन लिङ्गेन सूच्यते" इति।[491]

भाष्यकारः द्वितीयं समाधानं ददाति- तिष्यपुनर्वस्वोः लोके प्राणित्वेन व्यवहारः नास्ति, प्रतिमन्वन्तरं भिन्नानि नक्षत्राणीति दर्शने भिन्नाधारा जातिः सम्भवति इत्यतः प्रतिमन्वन्तरं नक्षत्रभेदेन तिष्यपुनर्वस्वाधारा जातिः संभवेत् इति कारणात् तस्य अप्राणिजातिवाचित्वात् 'जातिरप्राणिनाम्' इत्यनेन एकवद्भावः स्यात्, अतः तस्य एकवचनस्य द्विवचनं यथा न स्यात् तदर्थं सूत्रे बहुवचनग्रहणमिति मनसि निधाय अन्यत् समाधानम् एकं ददाति *भाष्य*कारः- "अथ वा नात्रभवन्तः प्राणिनः, प्राणा एवात्र भवन्तः" इति।[492] अर्थात् तिष्यपुनर्वस्वधीनस्थितिकत्वात् प्राणिनां तिष्यपुनर्वस्वोः कथंचित्प्राणत्वं वक्तुं शक्यते न तु प्राणत्वम्। तथा च कैयटे उच्यते- "न ह्येतेषु लोके प्राणिव्यवहारः प्रसिद्धः इति भावः इति। तदधीनस्थितित्वात्प्राणिनामेत एव प्राणा उच्यन्ते"।[493]

---

490 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 70

491 तत्रैव

492 तत्रैव

493 तत्रैव

तत्र *उद्द्योत*कारः अपरेषां केषाञ्चित् मतं प्रस्तौति। तद्यथा केचित्- इष्टानुरोधेन द्वन्द्वश्च इत्यादिषु समाहारः एव इति नियमः इति वदन्ति। तथा च अस्मिन्नपि पक्षे जातिरप्राणिनाम् इति नित्यम् एकवद्भावे विहिते सति बहुवचनस्य अभावात् सूत्रम् अनर्थकंभूय उक्तार्थस्य ज्ञापकं भवति। तत्र ज्ञाप्यकोटौ सर्वशब्देन एकवद्भावविषयः जातिद्वन्द्वे एव स्वीक्रियते। द्वन्द्वश्च इत्यादीनाम् अपरेषां तु नित्यमेव भवति। तस्मादेव एकवद्भावप्रकरणं पूर्वत्र नित्यार्थं भवति, उत्तरत्र तु व्यभिचारार्थम् इति विभाषा वृक्षेति सूत्रस्थभाष्येण न विरोधः। तस्मादेव मृदङ्गशङ्खतूणवा इत्यादि संगच्छते।

अथवा जातिप्राधान्ये एकवचनं भवति, व्यक्तिप्राधान्ये च बहुवचनं भवति इति उभयम् अपि अत्र। अत्रैवार्थे इदं ज्ञापकम् इत्याहुः इति *उद्द्योत*ग्रन्थः अनुसन्धेयः।

**अत्रावधेयम्-** *न्यास*कारः वदति यत् यदयमेकवचननिवृत्त्यर्थं बहुवचनग्रहणं करोति, ततः अवसीयते- अस्ति परिभाषा तत्र, सर्वो द्वन्द्वो विभाषैकवद्भवति इति। एतेन इदम् आगतं यत्, सूत्रे बहुचवनग्रहणम् एकवचननिवृत्त्यर्थं कृतम् इति बोद्धव्यम्। *महभाष्य*कारः पुनः समाधानद्वयं प्रस्तुतवान्- सर्वो द्वन्द्वो विभाषैकवद्भवति इत्येकम् अपरं तावत् अथवा नात्रभवन्तः प्राणिनः, प्राणा एवात्रभवन्तः इति। प्रकृतज्ञाप्यं तर्हि *महाभाष्य*कारसम्मतम् अस्ति इत्यत्र नास्ति सन्देहलेशः। श्रीमद्भट्टोजिदीक्षितस्तु तिष्यादिसूत्रे अस्य ज्ञाप्यस्य विषये

तथा किमपि नोक्तवान्। अत्र परिभाषाग्रन्थः नालोचितः, यतो हि *परिभाषेन्दुशेखरे* प्रोक्तानां प्रायः सर्वासामपि परिभाषाणां *महाभाष्य*सम्मतत्वम् अस्ति।[494] विस्तरस्तु तत्रैव द्रष्टव्यः।[495] *बालमनोरमा*कारः *तत्त्वबोधिनी*कारः वा प्रकृतज्ञाप्यविषये कामपि आलोचनां नाकार्षीत्। पाणिनीयवैयाकरणकुले अस्याः परिभाषायाः ज्ञापकसिद्धपरिभाषात्वेन समादरः अस्तीति अवश्यं विज्ञेयम्।

## 3.4. चरेष्टः इति अधिकरणे उपपदे एव न कर्मणि।

अधिकरणे उपपदे चरधातोः टप्रत्ययः विधीयते 'चरेष्टः'[496] इति शास्त्रेण। कुरुचरः इत्युदाहरणम्। इदं शास्त्रम् अधिकरणे उपपदे एव भवति न तु कर्मणि इति कथं ज्ञाप्यते तद्विषये अधुना आलोच्यते।

***ज्ञापकसंग्रह*कारमतम्-** कुरुषु चरः इति कुरुचरः इत्यत्र सुबन्ते उपपदे चरधातोः 'चरेष्टः' इति सूत्रेण टप्रत्ययः भवति। एवमेव 'चरेष्टः' इति सूत्रेण विधीयमानः टप्रत्ययः कुरूंश्चरति इत्यत्रापि स्यात्, तत् कुतः न भवति इति प्रश्नः। यदि च 'चरेष्टः' इत्यत्र 'अधिकरणे शेतेः'[497] इत्यतः अधिकरणे इत्यस्यानुवृत्त्या कर्मण्युपपदे न भवति इत्युच्यते, तन्न वक्तव्यम्। कारणं हि कर्मणि इत्यस्याप्यनुवृत्तेः। अन्यथा उत्तरसूत्रैः विधीयमानानां प्रत्ययानां कर्मणि उपपदे

494 प. भा. शे., पृ. 2
495 तदेव, पृ. 141-144
496 पा. सू. 3.2.16
497 पा. सू. 3.2.15

प्रास्यसंभवाद् इत्याशङ्क्य 'चरेष्टः' इति शास्त्रं परम् अधिकरणे उपपदे एव भवति न तु कर्मणि इति ज्ञापकात् साधयति *ज्ञापकसंग्रह*कारः। तथा चोच्यते तेन- " 'भिक्षासेनादायेषु च' इत्यत्र भिक्षाग्रहणाद् ज्ञापकाद् अधिकरण एव न कर्मणि" [498] इति।

कथं तावद् ज्ञाप्यते इति चेत्- 'चरेष्टः' इति शास्त्रं यदि कर्मणि उपपदेऽपि प्रवर्तेत, तर्हि भिक्षां चरति इत्यत्र एतेनैव टप्रत्ययविधानेन भिक्षाचर इति रूपसिद्धेः 'भिक्षासेनादायेषु च'[499] इति सूत्रे भिक्षाग्रहणं व्यर्थं भवति। तथा च व्यर्थं सद् 'चरेष्टः' इति सूत्रम् अधिकरणे उपपद एव भवति, नान्यस्मिन् उपपदे इति ज्ञापयति। एवञ्च कर्मणि उपपदे टप्रत्ययार्थं भिक्षाग्रहणमिति स्वांशे चारितार्थ्यम्। अस्य च ज्ञापनस्य फलं तावत् कुरूंश्चरति इत्यादौ प्रयोगेषु कर्मणि उपपदे चरधातोः उत्तरं टप्रत्ययस्य विधानं न भवति इति सिध्यति।

**भाष्यकाराशयः-** भाष्यकारः अपि वदति यद् कुरूंश्चरति पञ्चालांश्चरतीति कुतः न भवति चरधातोः टप्रत्ययः। तथा च तस्य समाधानवार्त्तिकं तावत् "चरेर्भिक्षाग्रहणं ज्ञापकं कर्मण्यप्रसङ्गस्य"[500] (वा. 2024)। तदुत्तरं दीयते

498 ज्ञा. स., पृ. 56

499 पा. सू. 3.2.17

500 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 165

तेनैव- "यदयं भिक्षासेनादायेषु च चरेर्भिक्षाग्रहणं करोति तज्ज्ञापयत्याचार्यो न भवति कर्मणीति"[501]।

तत्र*ोद्द्योत*कारः वदति- "एतेन भिक्षया हेतुना चरतीत्यर्थ-कभिक्षाचरप्रयोगसाधकेन तत्सूत्रेण विपरीतं कर्मणीत्यस्य सम्बन्ध एव ज्ञाप्येतेति परास्तम्"[502] इति।

**अत्रावधेयम्-** श्रीमद्भट्टोजिदीक्षितस्य *वैयाकरणसिद्धान्तकौमुदी*वृत्तौ, वासुदेवदीक्षितस्य *बालमनोरमा*टीकायां ज्ञानेन्द्रसरस्वत्याः *तत्त्वबोधिनी*टीकायां वा अस्य ज्ञापनस्य विषये कापि आलोचना न विहिता। यद्यपि *तत्त्वबोधिनी*टीकायामुक्तम् अस्ति यत् "अधिकरणे उपपदे इति शेषः। 'अधिकरणे शेतेः' इत्यतः तदनुवृत्तेरिति भावः।"[503] *न्यास*टीकायाम् अथवा *पदमञ्जरी*टीकायामपि कापि आलोचना न कृता। *काशिका*यामपि किमपि आलोचनं न विहितम्। तेन 'भिक्षासेनादायेषु च' इति सूत्रे उक्तवन्तौ वामनजयादित्यौ यत्- "अनधिकरणार्थम् आरम्भः"।[504] अर्थात् अधिकरणे पूर्वेणैव शास्त्रेण अर्थात् 'चरेष्टः' इति योगेन अधिकरणे टप्रत्ययविधानं सिध्यति अर्थात् 'भिक्षासेनादायेषु च' इति अनेन सूत्रेण अधिकरणभिन्ने उपपदे अर्थात् कर्मण्यादौ उपपदे टप्रत्ययविधानं सिध्यति।

501 तत्रैव

502 तत्रैव

503 वै. सि. कौ., च. भा., पृ. 50

504 का. वृ., प्र. भा., पृ. 554

## 3.5. स्मलक्षणः पुरालक्षणश्चाद्यतने न भवतः।

'लट् स्मे'[505] इति लक्षणस्य स्मशब्दे उपपदे भूतानद्यतनपरोक्षे लट्प्रत्ययः भवति इत्यर्थः। तत्र 'लट् स्मे' इति शास्त्रं परोक्षानद्यतनविषयम् अस्ति न वेति आलोचना करिष्यमाणा अस्ति।

***ज्ञापकसंग्रह*कारमतम्-** 'लट् स्मे' इति शास्त्रस्य अर्थस्तावत्- स्मशब्दे उपपदे भूतानद्यतनपरोक्षे लट्प्रत्ययः भवति इति। असौ लट् लिटः अपवादः भवति। नलेन स्म पुराधीयत इत्यादिकमुदाहरणमस्य। तस्मिन् च सूत्रे वार्त्तिकद्वयं पठितम् अस्ति- 'स्मपुरा भूतमात्रे, न स्म पुराद्यतने'[506] (वा. 3010 -3011) इति। तत्र काचिद् अव्यवस्था उत्पद्यते। तथा च तत्र- प्रथमे वार्त्तिके स्मपुराशब्दाभ्याम् आद्यन्ताभ्यां 'लट् स्मे'[507], 'अपरोक्षे च'[508], 'ननौ पृष्टप्रतिवचने'[509], 'नन्वोर्विभाषा'[510], 'पुरि लुङ् चास्मे'[511] इति पञ्च सूत्राणि लक्ष्यीक्रियन्ते।

तत्र 'लट् स्मे', 'अपरोक्षे च', 'पुरि लुङ् चास्मे' इति त्रिभ्यां शास्त्राभ्याम् अनद्यतने भूतविशेषे प्रत्ययस्य विधानं भवति। पुनश्च 'ननौ

---

505 पा. सू. 3.2.118

506 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 192

507 पा. सू. 3.2.118

508 पा. सू. 3.2.119

509 पा. सू. 3.2.120

510 पा. सू. 3.2.121

511 पा. सू. 3.2.122

पृष्टप्रतिवचने', 'नन्वोर्विभाषा' इत्येताभ्यां शास्त्राभ्यां तु भूतमात्रे प्रत्ययस्य विधानं भवति इति व्यवस्था आश्रयणीया। सेयं व्यवस्था सूत्रान्न लभ्यते।

किन्तु सेयं व्यवस्था सूत्रादेव लभ्यते। तथा च 'अपरोक्षे च' इति उत्तरसूत्रारम्भात् 'लट् स्मे' इति सूत्रे परोक्षग्रहणम् अनुवर्तते इति ज्ञायते। ततश्च परोक्षग्रहणसम्बद्धम् अनद्यतनग्रहणमपि तत्रानुवर्तते। एवं तर्हि लट् स्मे इति शास्त्रं परोक्षानद्यतनविषयमिति आयातम्।

'पुरि लुङ्चास्मे' इत्यत्र तु लुङ्ग्रहणबलेन अनद्यतनविषयकत्वं सिध्यति एव। कथमिति चेत् यदि ह्ययं भूतमात्रे विधिः स्यात् तदा 'नन्वोर्विभाषा' इत्यतः विभाषाग्रहणानुवृत्त्या विकल्पेन लड्विधानं क्रियते। तर्हि एतस्य अभावपक्षे भूतसामान्ये विहितः लुङ्लकारः सिध्यति इति लुङ्ग्रहणम् अनर्थकम् इति आगतम्। एवञ्च लुङ्ग्रहणं व्यर्थं सद् ज्ञापकं भवति, 'पुरि लुङ्चास्मे' इति सूत्रस्य अनद्यतनविषयकत्वस्य। तेन लटः अभावे लुङ् न लभ्येत विभाषापदस्य अनुवृत्तौ अपि। अनद्यतने लुङः विधानं तु न भवति इति पक्षे लुङ्लाभाय लुङ्ग्रहणं क्रियते।

इत्येवं 'लट् स्मे', 'अपरोक्षे च', 'पुरि लुङ्चास्मे' इति त्रिसूत्री अनद्यतनभूतविषयिणी इति सिध्यति।

'ननौ पृष्टप्रतिवचने', 'नन्वोविभाषा' इति अनयोः सूत्रयोस्तु परोक्षग्रहणस्य अपरोक्षग्रहणस्य च निवृत्त्या तत्सहचरितानद्यतनग्रहणस्यापि निवृत्तिः

“एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः”[512] इति परिभाषाबलात्। अतः भूतमात्रविषयकत्वमिति विषयविभागस्य सूत्रेण एव लाभाद् वार्त्तिकस्य नास्ति अवसरः इति भावः। तदेतत् सर्वं *ज्ञापकसंग्रह*कारेण संगृहीतं यत्- “‘लट् स्मे’। इदं ज्ञापयति- स्मलक्षणः पुरालक्षणश्चाद्यतने न भवत इति”।

**दीक्षिताशयः-** उपर्युक्तमतं भट्टोजिदीक्षितेन सम्मतमेव अस्ति। अत एव ‘ननौ पृष्टप्रतिवचने’ इति शास्त्रस्य वृत्तौ स लिखति- “अनद्यतने परोक्षे इति निवृत्तम्। भूते लट् स्यात्। अकार्षीः किम्। किं करोमि भोः।”[513] ‘नन्वोर्विभाषा’ इति सूत्रे च- “नशब्दे नुशब्दे च लङ् वा स्यात्। अकार्षीः किम्। न करोमि। नाकार्षम्। अहं नु करोमि। अहं न्वकार्षम्।”[514] एतस्मिन्नेव सूत्रे *तत्त्वबोधिनी*टीकायामुच्यते- “भूत इत्येव। पक्षे लुङ्।”[515]

एवं *बालमनोरमा*कार-*तत्त्वबोधिनी*टीकाकार-दीक्षितानां नये *ज्ञापक-संग्रह*कारमतं सम्मतमेव इति नास्ति संदेहलेशः। वस्तुतः तेषां पञ्चानां सूत्राणाम् अध्ययनेन इदम् आयाति यत् *वैयाकरणसिद्धान्तकौमुदी*कारः तान् विषयान् प्रोक्तवान् एव अस्ति। अतो न दोषः।

***काशिका*कार-*पदमञ्जरी*कार-*न्यास*कारमतम्-** *काशिका*दीनाम् अध्ययनेन ज्ञायते यत् *पदमञ्जरी*कारः एनं विषयं स्पष्टीकृतवान्। तथा हि ‘पुरि लुङ्चास्मे’ इति

512 प. भा. शे., पृ. 83

513 वै. सि. कौ., तृ. भा., पृ. 629

514 तदेव, पृ. 629-630

515 तदेव, पृ. 630

सूत्रे *काशिका*कारः वदति- “अनद्यतनग्रहणमिह मण्डूकप्लुत्यानुवर्तते। पुराशब्द उपपदे स्मशब्दवर्जिते भूतानद्यतनेऽर्थे विभाषा लुङ्प्रत्ययो भवति लट् च। ताभ्यां मुक्ते पक्षे यथाविषयमन्येऽपि प्रत्यया भवन्ति। वसन्तीह पुरा छात्राः। अवात्सुः पुरा छात्राः। अवसन्निह पुरा छात्राः। ऊषुरिह पुरा छात्राः।”[516] तत्र *पदमञ्जरी*कारः स्पष्टीकुर्वन् कथयति यत् “लुङ्ग्रहणं चात्र लिङ्गम्। यदि हि भूतमात्रे अयं विधिः स्यात् विभाषा लटो विधानात्तेन मुक्ते लुङपि भविष्यति, किं लुङ्ग्रहणेन। अनद्यतनग्रहणानुवृत्तौ तु लटा मुक्ते लङेव स्यादिति कर्त्तव्यं लुङ्ग्रहणम्।”[517]

अतः लुङ्ग्रहणमेव ज्ञापयति पुरि लुङ् चास्मे इति सूत्रस्य अनद्यतनविषयकत्वम्। तेन लटः अभावे लुङ् न लभ्येत विभाषापदस्य अनुवृत्तौ अपि। अनद्यतने लुङः विधानं तु न भवति इति पक्षे लुङ्लाभाय लुङ्ग्रहणं क्रियते इति अस्ति स्वांशे चारितार्थ्यम्। अस्य च लुङ्ग्रहणस्य अन्यत् प्रयोजनं तु अन्वेष्टव्यम्।

**भाष्यकाराशयः-** लट् स्म इत्यादिषु सूत्रेषु परोक्षग्रहणस्य निवृत्तिकारणाद् अपरोक्षे च इत्येतत् सूत्रं न कर्त्तव्यम् इति प्रश्नस्य उत्तरं दीयते भाष्यकारेण-

स्यादेषा तव बुद्धिः स्मलक्षणेऽप्येवमेव सिद्धमिति।

---

516 का. वृ., द्वि. भा., पृ. 634 -635

517 तत्रैव

लट् स्म इति भवेन्नार्थस्तस्मात्कार्यं परार्थं तु।।[518]

एवं तर्हि आचार्यः ज्ञापयति यत्- “स्मलक्षणः पुरालक्षणश्चानद्यतने भवतः”[519] इति।

अर्थात् यदि ‘लट् स्मे’ इत्यत्र परोक्षग्रहणनिवृत्तौ सत्यां परोक्षे चापरोक्षे च लङ् भविष्यतीति नार्थः ‘अपरोक्षे च’ इत्येतत्सूत्रेण इति यदि विभाव्यते, तत् साधु नास्ति। यतो हि अपरोक्षग्रहणम् अनद्यतनानुवृत्तिज्ञापनाय कर्त्तव्यम् अस्ति।

लट् स्म इति शास्त्रं परोक्षानद्यतने वर्तते। “यदि ह्यत्र परोक्षग्रहणं निवर्तेत तदा तत्संबद्धमनद्यतनग्रहणमपि निवर्तेत। तस्मादपरोक्षे चेति सूत्रारम्भात् लट् स्मे इत्ययं योगः परोक्षानद्यतनविषयः, अपरोक्षे चेत्ययमपरोक्षानद्यतनविषयः”[520] इति *प्रदीपे* कैयटः।

“पुरि लुङ् चास्मे इत्ययं तु लुङ्ग्रहणादनद्यतनविषयः। मध्यमौ तु भूतमात्रविषयाविति सूत्रेणैव व्यवस्थायाः सिद्धत्वान्नार्थो वार्त्तिककारेणेत्यर्थः।”[521]

*उद्द्योत*कारनागेशः कथयति- “मध्यमौ त्विति। परोक्षग्रहणस्यापरोक्षग्रहणस्य च निवृत्त्या तत्सहचरितानद्यतनग्रहणस्यापि निवृत्तेरिति भावः।

---

518 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 192

519 तत्रैव

520 तदेव, पृ. 193

521 तदेव, पृ. 194

*भाष्ये* एवं तर्हि ज्ञापयत्याचार्यः स्मलक्षणश्चानद्यतने इति। तत्र स्मग्रहणे इदं ज्ञापकं, पुराग्रहणे तु लुङ् ग्रहणमिति विवेको बोध्यः।"[522]

**अत्रावधेयम्-** स्मपुरा भूतमात्रे न स्म पुराद्यतने इति यत् वार्त्तिकं पठितं तस्य आरम्भः कर्तव्यः न भवति। पतञ्जलिकैयटनागेश*काशिका*कारादीनां नयेनैव त्रिसूत्री अनद्यतनभूतविषयिणीति सिद्धम्। मध्यमौ योगौ तु भूतमात्रविषयौ इति सूत्रेणैव व्यवस्था सम्भवति। अतः नास्ति आवश्यकता तस्य वार्त्तिकस्य इति शिवम्।

## 3.6. लकाराणां लस्य नेत्त्वम्।

'लस्य'[523] इत्येकम् अधिकारसूत्रम्। लकारेण लिडादीनां संग्रहः भवति। तेषां लकाराणां लस्य इत्संज्ञा भवति न वेति प्रश्नस्य समाधानम् अत्र आलोच्यते।

***ज्ञापकसंग्रह*कारमतम्-** भवति, पचति, पठति इत्यादौ लटः स्थाने तिबादेशः विधीयते। 'लशक्वतद्धिते'[524] इति शास्त्रेण च लकारः इत्संज्ञकः अस्ति। ततः परं लटः लित्त्वेन तदादेशस्य तिबादेः अपि स्थानिवद्भावेन लित्त्वात् पचतीत्यादौ

---

522 तत्रैव

523 पा. सू. 3.4.77

524 पा. सू. 1.3.8

लित्स्वरः प्राप्नोति। तत्समाधानाय *ज्ञापकसंग्रह*कारः वदति- "णलो लित्करणात् लकाराणां लस्य नेत्त्वम्"[525] इति।

तदर्थस्तावत्- लिटः स्थाने तिप् भवति, तस्य च स्थाने णल् भवति इति तत्र स्थानिवद्भावेनैव णलः लित्त्वं सिध्यति, तर्हि पुनः णलः लित्करणं व्यर्थं खलु। एवञ्च लित्करणं व्यर्थं सद् लडादिलकाराणां लस्य इत्संज्ञा न भवति इति ज्ञापयति। एवञ्च स्थानिन एव लित्त्वं न सम्भवति, तर्हि आदेशे कथं तस्य लाभः स्याद् अतः णलि लित्करणं सार्थकं भवति। एवं च पचति, भवति इत्यादौ अपि तिबादेर्लित्त्वं न इति न लित्स्वरप्रसङ्गः भवति इति भावः। *भाष्ये* तु 'न लादेशेषु लित्कृतं भवति' इति वचनशरीरं दृश्यते, उभयत्र फलम् एकमेवेत्यवधेयम् ।

**दीक्षिताशयः-** भट्टोजिदीक्षितः तु तथा किमपि नोक्तवान्। परन्तु सूत्रे *तत्त्वबोधिनी*कारः वदति यद् अत्र लस्य इत्संज्ञा नास्ति, फलं नास्ति इति हेतोः। यदि च उच्यते लित्स्वरः फलं तदा उच्यते णलः लित्त्वेन तदभावस्य ज्ञापनात्। पुनः अपि वदति यत् "नाप्यश्रवणमेव फलम्, तदुच्चारण-स्यानर्थक्यापत्तेरादेश-विधिनैवाश्रवणलाभाच्च। लस्य तिबादिस्थानित्वाभ्युपगमे तु लः परस्मैपदम् इत्यादिस्वरसतः संगच्छते इति दिक्।"[526] *बालमनोरमा*कारः प्रसङ्गे अस्मिन् तथा किमपि नावादीत्।

---

525 ज्ञा. स., पृ. 63

526 वै. सि. कौ., तृ. भा., पृ. 9

***पदमञ्जरी*कारमतम्-** तत्र *पदमञ्जरी*कारः लस्य लकारस्य इत्संज्ञाशङ्कां कुर्वन् कथयति "ननु चेत्संज्ञायां लोपः प्राप्नोति। वचनसामर्थ्यात्सत्यामपीत्संज्ञायां लोपो न भविष्यति। एवमपि लित्स्वरः प्राप्नोति। णलो लित्करणं ज्ञापकम्- न लादेशेषु लित्स्वरो भवतीति।"[527] *न्यासे काशिका*वृत्तौ वा तथा किमपि प्रोक्तं नास्ति।

**भाष्यकाराशयः-** लकारस्य इत्संज्ञाप्रयोजनप्रसङ्गे *भाष्य*कारः कथयति- पचति, पठतीति इदमस्तीति इत्कार्यम्। लिति इति प्रत्ययात्पूर्वमुदात्तं भवति इत्येषः स्वरः यथा स्यात्, तदर्थम् लकारस्य इत्संज्ञकत्वं विज्ञेयम्। किन्तु अत्र लित् नास्त्येव, अतः उच्यते *महाभाष्य*कारेण- "अथापि कथंचिद्वचनादनुवर्तनाद्वा इत्संज्ञकानामादेशः स्यात्। एवमपि न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न लादेशेषु लित्कृतं भवतीति। यदयं णलं लितं करोति।"[528]

**अत्रावाधेयम्-** यद्यपि अस्य सूत्रस्य विषये *ज्ञापकसंग्रहे* उक्तं ज्ञाप्यशरीरं *महाभाष्ये* प्रोक्ताज्ज्ञाप्यशरीराद्भिद्यते, तथापि उभयोः ज्ञाप्ययोः तात्पर्यं फलं वा समानेव। नास्ति तथा कश्चिद् विशेषः। *बालमनोरमा*कारेणापि उक्तस्यापि ज्ञाप्यस्य शरीरं किञ्चिद्भिन्नमेव। तथापि समेषाम् एकत्रैव तात्पर्यं पर्यवसितम्।

---

527 का. वृ., तृ. भा., पृ. 213

528 म. भा., तृ. ख., सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च, पृ. 277

## 3.7. टित आत्मनेपदानामिति सूत्रे आनस्य प्रतिषेधो वक्तव्यः। ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्य।

'टित आत्मनेपदानां टेरे'[529] इति सूत्रेण टित्-लकारस्य आदेशस्य टेः एत्वं विधीयते। तच्च एत्वं सेवमान, पचमान, लभमान इत्यादिषु आनस्य टेरपि प्राप्नुयात् शानचः आत्मनेपदत्वात् इत्यस्याः शङ्कायाः समाधानम् अत्र विधीयते।

***ज्ञापकसंग्रह*कारमतम्-** सेवते, पचते इत्यादिषु स्थलेषु टित्-लकारस्य लटः लकारस्य स्थाने यः त इति आदेशः भवति तस्य टेः अकारस्य एकारः भवति 'टित आत्मनेपदानां टेरे' इति शास्त्रेण।

एवञ्च शङ्का उदेति यत् टित आत्मनेपदानां टेरे इति शास्त्रेण यद् एत्वं विधीयते, तत् टितः लकारस्य स्थाने यानि आत्मनेपदानि विधीयन्ते तत्र भवत्येव, पुनः सेवमान, पचमान इत्यादौ आनस्य टेरपि प्राप्नोति।

अस्याः शङ्कायाः समाधानं ददाति वार्त्तिककारः "टित एत्वे आत्मनेपदेष्वानप्रतिषेधः"[530] (वा. 5067), "उक्तं वा"[531] (वा. 5068) (ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्य) इति।

तत्र 'गाङ् लिटि'[532] इति सूत्रे "ज्ञापकं वा सानुबन्धक-स्यादेशवचनमित्कार्याभावस्य"[533] (वा. 1606) इति वार्त्तिकं पठितम् अस्ति। तस्य

---

529 पा. सू. 3.4.79

530 म. भा., तृ. ख., सम्पा. भार्गवशास्त्री, पृ. 278

531 तत्रैव

नैकानि प्रयोजनानि उक्तानि। तेषु लटः शतृशानचौ इत्यपि प्रयोजनतया प्रोक्तम्। "वस्तुतः सूत्रे सहनिर्दिष्टत्वादत्रापि सहोपादानम्। शानजेव त्वात्मनेपदत्वात् प्रयोजनम्"[534]। प्रयोजनं तत् कथमिति चेत्- 'गाङ् लिटि' इति शास्त्रे इङः धातोः स्थाने गाङ् इति आदेशः विधीयते। इङ्धातुः ङिदस्ति इति हेतोः आदेशस्य गा इत्यस्य अपि स्थानिवद्भावेन ङित्त्वं स्यात्, तेन गाङ् इति आदेशे ङकारानुबन्धः निरर्थकः भवेत्। तथा च तद् व्यर्थं सद् यत्र सानुबन्धकस्य आदेशः उच्यते तत्र आदेशे इत्संज्ञाप्रयुक्तानि कार्याणि न प्रवर्तन्ते इति ज्ञापयति। एवञ्च 'लटः शतृशानचौ'[535] इति सानुबन्धकस्य स्थाने शानचः विधानं भवति, तत्र शानच्प्रत्यये टित्त्वप्रयुक्तम् एत्वं न प्रवर्तिष्यते।

सेवते, पचते इत्यादिषु 'लस्य'[536] इति शास्त्रेण अनुबन्धरहितस्य स्थाने विधानात् तादीनाम् एत्वं भविष्यति इत्येतत् सर्वं गाङ् लिटि इति सूत्रे *भाष्य*कारमतसम्मतम् अस्ति।

तदेतत् सर्वं *ज्ञापकसंग्रह*कारः ब्रूते- "टित आत्मनेपदानामिति सूत्रे आनस्य प्रतिषेधो वक्तव्यः उक्तं वा। ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्येति।"[537]

---

532 पा. सू. 2.4.49
533 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 554
534 तत्रैव
535 पा. सू. 3.2.124
536 पा. सू. 3.4.77

***काशिका*कार-*पदमञ्जरी*कार-*न्यास*कारमतम्**- 'गाङ् लिटि' इति शास्त्रे वामनजयादित्यौ तु ब्रुवाते यत् "गाङोऽनुबन्धकरणं विशेषणार्थम्, 'गाङ्कुटादिभ्यः' इत्यत्रास्य ग्रहणं यथा स्यात्। न हि स्थानिवद्भावेन गाङ् इति रूपं लभ्यते।"[538] "ङित्करणम् अनर्थकं, स्थानिवद्भावादेव आत्मनेपदं सिद्धम् अत एव काशिकाकारः वदति गाङोऽनुबन्धकरणं विशेषणार्थम्"[539] इति *पदमञ्जरी*कारः।

एवं तर्हि गाङ्कुटादिसूत्रे गाङ्कुटादिभ्यः इत्युच्यमाने कै गै शब्दे इत्यस्यापि ग्रहणं स्यात्, ततश्चागासीन्नट इत्यत्र घुमादिसूत्रेण इत्वं प्राप्नुयात्। अथ ङकारक्रियमाणेऽपि गाङ्गतौ इत्यस्य ग्रहणं किमर्थं न भवति। तदा उच्यते येन हेतुना न भवति स हेतुः गाङ्कुटादिसूत्रे एव दर्शितः। ननु च इङः ङितः तत्र स्थानिवद्भावेन एव ग्रहणं स्यात्, तत् किं ङकारेण। वस्तुतः तत्र गाङ् इत्येतस्य स्वरूपस्य ग्रहणम्। तत्तु स्थानिवद्भावेन न लभ्यते। यतोहि हि स्थानिवदादेशः इति कार्यातिदेशः अस्ति न तु रूपातिदेशः। एतत् सर्वं मनसि निधाय एव *काशिका*कारौ उक्तवन्तौ यत् न हि स्थानिवद्भावेन गाङ् इति रूपं लभ्यते।

तत्र *पदमञ्जरी*कारः अपरं पक्षमेव विवृणोति। तद्यथा- "यत्र सानुबन्धकात्षष्ठ्युच्चार्यते, तत्राकृतायामेवेत्संज्ञायामादेशः प्रवर्तते, सत्यामपि वा

537 ज्ञा. स., पृ. 64
538 का. वृ., द्वि. भा., पृ. 292
539 तत्रैव

तस्यामनुबन्धकार्यमादेशे न भवतीत्यस्यार्थस्य ज्ञापनार्थं गाङ्यनुबन्धकरणम् इति।"[540] तत्रैव पुनः उच्यते- तदेवमस्य पक्षस्य मन्दत्वादुपन्यासः।

वस्तुतः "ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्य" (वा. 1606) इति यद् वार्त्तिकं पठितम् तत्रैव *भाष्यप्रदीपे* उच्यते- "सानुबन्धाद्यत्र षष्ठ्युच्चार्यते तत्राकृतायामेवेत्संज्ञायामादेशः प्रवर्तते। कृतायां वेत्संज्ञायां तन्निबन्धनानि कार्याणि न प्रवर्तन्ते इति ज्ञापनार्थं ङकारोच्चारणम्"[541] इति कैयटः वदति। तत्र पुनः विस्तरशः आलोचना विहिता, अत्र तु प्रबन्धभारभिया तन्नालोच्यते।

***महाभाष्य*काराशयः-** 'गाङ् लिटि' इति सूत्रे ङिद्ग्रहणस्य यद् ज्ञाप्यम् उक्तं, तस्य बहुदोषतया प्रत्याख्यानं क्रियते *भाष्य*कारेण। तेषु एकं प्रयोजनम् उक्तम्- लटः शतृशानचौ इति। तत्र पचमानः, यजमानः इति 'टित आत्मनेपदानां टेरे' इति एत्वं न भवति। किन्तु तत् प्रयोजनं नास्ति, यतो हि प्रकृतानाम् आत्मनेपदानां टेः एत्वं भवति। तिप्तस्झीत्यत्र यानि आत्मनेपदानि उपात्तानि तेषाम् आत्मनेपदानां टेः एत्वं भवति इति हेतोः पचमानः, सेवमानः इत्यादौ दोषः नास्ति।

**अत्रावधेयम्-** "ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्य" इति वार्त्तिकं यद् उक्तं तत्तु प्रत्याख्यातं *महाभाष्य*कारेण तस्य दुष्टत्वात्। पुनः स्वमतमपि *भाष्य*कारेण उपस्थापितम् प्रकृतानामात्मनेपदानां टेरेत्वं भवति इति।

---

540 तदेव, पृ. 293

541 तत्रैव

ङित्करणस्य प्रयोजनं तर्हि किं स्वीकृतं *भाष्य*कारेण इति चेत् गाङ्चनुबन्धकरणं विशेषणार्थम्। *ज्ञापकसंग्रहे* ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्येति दूषणवार्त्तिकेनैव समाधानं दत्तं सेवमानः, पचमानः इत्यादिषु।

*काशिका*कारौ अपि भाष्यमतं प्रस्तुतवन्तौ- पचमानः, यजमानः इत्यादिषु प्रकृतैः तिबादिभिः आत्मनेपदानि विशिष्यन्ते, अत एव 'टित आत्मनेपदानां टेरे' इति एत्वं न भवति। तत्रैव *पदमञ्जरी*कारः वदति- "य एते तिबादयः प्रकृतास्तेषां मध्ये यान्यात्मनेपदानि विहितानीत्येवमात्मनेपदानि विशिष्यन्ते।"[542] तिबादिषु शानच् तु नास्ति इति न तत्र अतिप्रसङ्गः।

तत्र तर्हि 'टित आत्मनेपदानां टेरे' इति अनुक्त्वा टित तङां टेरे इति वक्तव्यम्।

"केचित्तु आने मुक् इति निर्देशं ज्ञापकं वर्णयन्ति- तिङामेवैत्वं नान्येषामिति, इतरथा ह्यानयीति वक्तव्यं स्यात्। नेति वयम्, योऽलादेश आनः पूङ्यजोः शानन् तस्यायं निर्देशः स्याद्- वयमानः, यजमानः इति।"[543]

तत्र *न्यास*कारः कथयति टितस्तङाम् इति वक्तव्ये आत्मनेपदानाम् इति वचनम् उक्तं तत्तु वैचित्र्यार्थम्। तङाम् इति कथ्यमाने तु तसस्तकारेण प्रत्याहारग्रहणं भवेत्। तत्र उच्यते- अर्थवद्ग्रहणपरिभाषया न भविष्यति। यत्तर्हि थस्य स्थाने आदिश्यते तेन स्याद् इति चेन्न, तिबादिषु प्रत्ययेषु सन्निविष्टा ये तेषां

542 का. वृ., तृ. भा., पृ. 217
543 तत्रैव

तिङां ग्रहणं गंस्यते। "प्रत्यासत्तेर्वा आत्मनेपदीयत्वेन तशब्देन प्रत्याहारग्रहणं विज्ञास्यते। व्याप्तेस्त्वनाश्रयः, लक्ष्यस्थित्यनुरोधात् "[544] इति।

## 3.8. इवशब्देन सप्तमी भवति।

'तत्र तस्येव'[545] इति शास्त्रेण तत्रेव इति तस्येव इति चार्थे सप्तम्यन्तात् षष्ठ्यन्तात् च वतिप्रत्ययः विधीयते। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः, चैत्रस्येव चैत्रवत् मैत्रस्य गावः इत्यादिकमुदाहरणम्। अत्र सप्तम्यन्ताद् इवार्थे वतिप्रत्ययविधानस्य सङ्गतिः प्रदर्श्यते।

***ज्ञापकसंग्रह*कारमतम्-** 'मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः', 'चैत्रस्येव चैत्रवत् मैत्रस्य गावः' इत्यादिषु उदाहरणेषु 'तत्र तस्येव' इति योगेन सप्तम्यन्तात् षष्ठ्यन्तात् च वतिप्रत्ययः विधीयते।

शङ्का भवति यत्, तत्र इवशब्दयोगे सम्बन्धसामान्ये षष्ठीविभक्तेः सम्भवेऽपि, इवयोगे तु न केनापि लक्षणेन सप्तमीविभक्तेः विधानं नास्ति तर्हि सप्तम्यन्ताद् इवार्थे वतिप्रत्ययविधानं कथं सङ्गच्छते। तदेव मनसि निधाय *ज्ञापकसंग्रह*कारः ब्रूते- 'तत्र तस्येव' अस्मादेव ज्ञापकादिवशब्देन सप्तमी भवति इति।[546]

---

544 तत्रैव

545 पा. सू. 5.1.116

546 ज्ञा. स., पृ. 77

अर्थाद् अस्मादेव इवार्थे सप्तम्यन्ताद् वतिप्रत्ययविधानाद् ज्ञापकाद् इवयोगे सप्तमीविभक्तिः भवति इति ज्ञापनात् न कोऽपि दोषः।

अस्य च ज्ञापितवचनस्य फलं तावद्, देवेषु इव  नाम ब्राह्मणेषु इव नाम इत्यादिप्रयोगः साधु भवति।

**दीक्षिताशयः-** भट्टोजिदीक्षितः अस्मिन् विषये तथा किमपि नोक्तवान्, उदाहरणमात्रमेव प्रदर्शितवान्। अस्य च ज्ञाप्यस्य विषयः *बालमनोरमा*कारेण स्पष्टीकृतः। तत्रेवेति तस्येवेति चार्थे सप्तम्यन्तात् षष्ठ्यन्ताच्च वतिः स्याद् इत्यर्थः कृतः तेन। अस्य च योगस्य आरम्भः अतृतीयान्तार्थः। अस्मादेव निर्देशाद् इवशब्दयोगे षष्ठ्यर्थे सप्तमी अपि भवति इति दर्शितम्। 'तेन तुल्यं क्रिया चेद्वतिः'[547] इत्यस्मात् सूत्रात् क्रिया चेद् इति न अनुवर्तते। अत उच्यते, मधुरायामिव मधुरावत्स्रुघ्ने प्राकारः इति। अत्र तु अधिकरणे सप्तमी नास्ति, तथा सति विद्यमानेति क्रियापदसापेक्षतया असामर्थ्यात्। तस्मादेव अस्मादेव सूत्रनिर्देशाद् इवशब्दयोगे षष्ठ्यर्थे सप्तमी इति *भाष्यं* संगच्छते। एवञ्च मधुरासंबन्धिप्राकारसदृशः स्रुघ्नस्य प्राकार इति बोधः भवति इति *बालमनोरमायां* स्पष्टमुच्यते। *तत्त्वबोधिनी*कारस्तु अस्मिन् विषये तथा विस्तरशः किमपि नावोचत्। सप्तम्यन्तात् षष्ठ्यन्ताच्च इवार्थे प्रत्ययः। क्रिया चेद् इति न अनुवर्तते। तेन द्रव्यादितुल्ये

547 पा. सू. 5.1.115

वत्प्रत्ययः भवति इति स्पष्टं *तत्त्वबोधिनी*टीकायाम्। अस्यां टीकायां तु मथुरावत्स्रुघ्नः इति उदाहरणं प्रदत्तं, न तु मधुरावत्स्रुघ्नः इति।

***काशिका*कारमतम्-** "तत्रेति सप्तमीसमर्थात् तस्य इति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। पाटलिपुत्रवत् साकेते परिखा। षष्ठीसमर्थात्- देवदत्तस्येव देवदत्तवद् यज्ञदत्तस्य गावः। यज्ञदत्तस्येव देवदत्तस्य दन्ता यज्ञदत्तवत्"[548] इति *काशिकायां* प्रोक्तम्। एवञ्च सप्तम्यन्तात् समर्थात् सुबन्तात्, षष्ठ्यन्तात् च समर्थात् सुबन्तात् इवार्थे वतिप्रत्ययः भवति इति सिध्यति।

***पदमञ्जरी*कारमतम्-** द्रव्यगुणयोः तुल्यत्वे वतिप्रत्ययः 'तेन तुल्यं क्रिया चेद्वतिः' इति शास्त्रेण न स्याद्, अतः षष्ठ्यन्तात्  सप्तम्यन्ताद् इवार्थे तत्र तस्येव इति शास्त्रेण वतिप्रत्ययः विधीयते।

तत्र *पदमञ्जरी*कारस्य आशयः यत् 'तेन तुल्यं क्रिया चेद्वतिः' इति पूर्वेणैव शास्त्रेण वतिप्रत्ययः न सिध्यति, तत्र तु तृतीयासमर्थात् सुबन्तात् वतिप्रत्ययः, अत्र तु सप्तमीषष्ठीसमर्थात् सुबन्तात् कथं स्यात्। तदा आक्षेपः क्रियते- 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' इति शास्त्रेण इति या तृतीया तया इवशब्दयोगे सर्वे विभक्त्यर्थाः भवन्ति, तद्यथा- ब्राह्मणः इव अधीते, ब्राह्मणेन तुल्यम् अधीते, ब्राह्मणम् इव पश्यति, ब्राह्मणेन तुल्यं पश्यति, ब्राह्मणेन इव

548 का. वृ., च. भा., पृ. 101

अधीतम्, ब्राह्मणेन तुल्यम् अधीतम्, ब्राह्मणस्य इव क्षत्रियस्य स्वम्, ब्राह्मणेन तुल्यं क्षत्त्रियस्य स्वम्, ब्राह्मण इव क्षत्त्रिये वर्तते, ब्राह्मणेन तुल्यं क्षत्त्रिये वर्तते। ततः तृतीयान्तादेव 'तेन तुल्यं क्रिया चेद्वतिः' इति पूर्वसूत्रेण वतिप्रत्ययः स्यात्। एवञ्च 'पूर्ववत्सनः'[549] इति पञ्चम्यन्ताद् सुबन्ताद् वतिप्रत्ययः दृश्यते खलु। किन्तु तथापि प्रकृते वतिप्रत्ययः न सिध्यति। कारणं हि पूर्वत्र क्रियातुल्यत्वे वतिप्रत्ययः। तत्र पूर्वसूत्रे तु अवश्यं क्रियाग्रहणं कर्तव्यम्। गवा तुल्यः गवयः इत्यादौ प्रत्ययः यथा न स्यात्। एवं तर्हि द्रव्यगुणयोः तुल्यत्वे वतिः न स्याद् इति षष्ठीसप्तम्यान्ताद् इवार्थे अनेन शास्त्रेण वतिप्रत्ययः विधीयते इति 'तत्र तस्येव' इति सूत्रमिदम् आवश्यकम्।

***न्यास*कारमतम्-** *न्यास*कारकथनं तावत् 'तत्र तस्येव' इत्यत्र इव इति किमर्थम् उच्यते। तुल्यग्रहणस्य अनुवृत्त्या एव तत्सिद्धिः भविष्यति। किन्तु क्रियाविशेषणत्वात् तत् कर्म, तस्य अनुवृत्तिः भवितुं नार्हति। यदि च अनुवृत्तिः क्रियते तर्हि कर्मणि एव तुल्ये प्रत्ययः स्यात्। तथा च मथुरायामिव मथुरावत्, स्रुघ्ने प्रासादः इत्यादि न सिध्येत्। तस्माद् इवग्रहणं कर्तव्यमेव। अत एव *न्यास*कारः कथयति- "अक्रियार्थश्चायमारम्भः" इति।[550]

**भाष्यकाराशयः-** तृतीयामसर्थात् सुबन्ताद् वतिप्रत्ययः क्रियातुल्यत्वे 'तेन तुल्यं क्रिया चेद्वतिः' इति शास्त्रेण भवति, 'तत्र तस्येव' इति शास्त्रेण

---

549 पा. सू. 1.3.62

550 का. वृ., च. भा., पृ. 101

द्रव्यगुणादितुल्ये षष्ठ्याद्यन्तादिति कथं तेन वतिप्रत्ययसिद्धिः। तत्र उच्यते इवयोगे ये सर्वे विभक्त्यर्थाः भवन्ति, ते अर्थाः तुल्ययोगे 'तुल्यार्थैरतुलोपमाभ्याम्'[551] इति शास्त्रेण तृतीयाविभक्त्या सम्बद्धाः सन्ति। ब्राह्मणस्येव क्षत्रियस्य स्वं, ब्राह्मणेन तुल्यं क्षत्रियस्य स्वम्। ब्राह्मणे इव क्षत्रिये वर्तते, ब्राह्मणेन तुल्यं क्षत्रिये वर्तते। एवञ्च तृतीयया षष्ठीसप्तम्यर्थस्य सम्बद्धत्वात् तृतीयान्ताद् एव पूर्वेण प्रत्ययः विधास्यते, क्रियाग्रहणं च न करिष्यते। एवञ्च यः एव चार्थः मधुरायाम् इव पाटलिपुत्रे प्राकाराः इति स एव मधुरया तुल्याः पाटलिपुत्रे प्राकाराः इति। तत्र पूर्वसूत्रे क्रियाग्रहणम् अवश्यं कर्तव्यम्, गवा तुल्यः गवयः इत्यादौ प्रत्ययः यथा न स्यात्। तस्मिन् क्रियाग्रहणे क्रियमाणे सति गुणद्रव्ययोः तुल्यत्वे प्रत्ययः न प्राप्नोति इति षष्ठीसप्तम्यन्ताद् इवार्थे वतिप्रत्ययः विधीयते। ननु इवयोगे अपि 'तुल्यार्थैरतुलोपमाभ्यां' इति तृतीया सुलभा, अतः तत्र तस्य इति व्यर्थं भवति खलु, तेन इत्यस्य अनुवृत्त्या एव तत् सिध्यति। अत्र *प्रदीप*कारः वदति, "इवशब्दश्च द्योतकत्वान्न व्यतिरेकहेतुः- गौरिव गवय"[552] इति।

तत्र तृतीयानुवृत्त्या एव इवयोगे अस्मादेव ज्ञापकाद् अनुमिततृतीयान्ताद् वतिप्रत्यये सिद्धे सति तत्र इति सप्तमीनिर्देशः ज्ञापयति- शेषविषये भवति इवयोगे सप्तमी इति। तृतीया तु नेष्यते इति नासौ ज्ञाप्यते इति *प्रदीपे* स्प्षटम्।

551 पा. सू. 2.3.72

552 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 291

## *महाभाष्य*सम्मतज्ञापकविमर्शः

किन्तु प्रयोजनं नास्ति चेदेव ज्ञापकं भवति। अत्र च "सप्तम्युपादानस्य प्रयोजनं मधुरायामिव मधुरावत्पाटलिपुत्रे प्राकार इत्यादौ प्राकाराद्याधेयापेक्षाधिकरण-विहितसप्तम्यन्तात्प्रत्ययविधानम्"।[553] किञ्च प्रयोजनम् अस्ति एव। पुनश्च ज्ञापकेन अनेन सप्तम्यनुमाने अधिकरणसप्तम्यन्ताद् वतेः अनुत्पत्तिः स्यात् इत्येवम् आशङ्क्य *प्रदीप*कारः समाधत्ते यत् तन्त्रेण सूत्रद्वयम् उच्चरितम् इति *भाष्य*कारस्य आशयः। तयोः एकेन योगेन स्वलक्षणविहितषष्ठीसप्तम्यन्ताद् वतिप्रत्ययः विधीयते। द्वितीयेन योगेन तु इवशब्दयोगे तस्य इत्यस्य अर्थे तत्र इति सप्तमीविभक्तिः विधीयते। सप्तमीविभक्त्या षष्ठीविभक्तिः मा बाधि इति तस्य इत्यनेन प्रतिसूयते। महाविभाषाधिकाराद् वा षष्ठीविभक्तिः न बाध्यते इत्येतत् सर्वं विस्तरशः *प्रदीपे* उच्यते।

**अत्रावधेयम्-** एवञ्च 'तत्र तस्येव' इति अस्मादेव इवार्थे सप्तम्यन्ताद् वतिप्रत्ययविधानाज्ज्ञापकाद् इवयोगे सप्तमीविभक्तिर्भवति इति ज्ञाप्यते, *भाष्य*कारः अपि ब्रूते- "इवशब्देन योगे सप्तमीति"[554]। *महाभाष्ये* अस्य च ज्ञाप्यस्य विषये यद् अन्यत् फलं प्रदर्शितं, तत्तु रामानुजताताचार्यदर्शितोदाहरणेन तुल्यमेव। तद्यथा- देवेष्विव नाम, ब्राह्मणेष्विव नाम इत्येषः प्रयोगः उपपद्यते।

553 तत्रैव

554 तत्रैव

## 3.9. लजन्यतरस्यामिति समुच्चये।

'सिध्मादिभ्यश्च'[555] इति शास्त्रेण सिध्मादिगणपठितेभ्यः प्रथमान्त-समर्थशब्देभ्यः मत्वर्थे विकल्पेन लच् अपि भवति। पक्षे मतुप्-प्रत्ययः तु विधीयते एव इति सिध्मादिसूत्रार्थः। 'सिध्मादिभ्यश्च' इत्यस्मिन् चकारस्य प्रयोजनम्, तथा च 'सिध्मादिभ्यश्च' इत्यस्मिन् सूत्रे अनुवृत्तम् अन्यतरस्यांग्रहणं समुच्चयार्थकम् अस्ति नवेति आलोचना अत्र करिष्यते।

***ज्ञापकसंग्रह*कारमतम्-** अत्रोच्यते सिध्मादिसूत्रे 'प्राणिस्थादातो लजन्यतरस्याम्'[556] इति शास्त्राद् अन्यतरस्याम् इत्यनुवर्तते। तथा च सिध्मादिभ्यः मत्वर्थे अन्यतरस्यां लच् भवतीति सूत्रार्थः प्राप्यते। तथा सति सिध्मादिगणे यानि अकारान्तानि विकल्पेन लच् तेभ्यः विहितः भवति। तथा विहिते लचः अभावपक्षे 'अत इनिठनौ'[557] इति योगेन इनिठनौ अपि प्राप्नुतः। किन्तु तन्नेष्यते, इष्यते तु मतुप्प्रत्ययः एव। तत्साधयितुं *ज्ञापकसंग्रह*कारो ब्रूते- "अदन्तपिच्छादि-तुन्दाद्यन्यतरपाठेनैव सिद्धे भेदेन पाठो ज्ञापयति लजन्यतरस्यामिति समुच्चये इति।"[558] अर्थात् निपातानाम् अनेकार्थत्वाद् अन्यतरस्यामिति शब्दः अत्र सूत्रे अनुवृत्तः समुच्चयार्थकः न तु विकल्पार्थकः। तस्माद् अन्यतरस्यांग्रहणेन मतुप्प्रत्ययः

---

555 पा. सू. 5.2.97

556 पा. सू. 5.2.96

557 पा. सू. 5.1.115

558 ज्ञा. स., पृ. 78

अनायासेन समुच्चीयते। ततः सिध्मादिभ्यः लच् मतुप् च भवतः इति सूत्रार्थः फलति। तेन इनिठनौ तु न प्रसक्तौ।

अत्र तावत् प्रश्नः समुदेति यद् अन्यतरस्यामिति शब्दः समुच्चयार्थः इत्यत्र किं ज्ञापकम् इति चेत् पिच्छादीनां तुन्दादीनां च पृथक् सूत्रे ग्रहणमिति गृह्यताम्। तेन 'तुन्दादिभ्य इलच्च'[559] इत्येकं सूत्रम्। तत्र इलच् इनिठनौ मतुप् चेति चत्वारः प्रत्ययाः इष्यन्ते। अत्रोच्यते यद्, यदि अन्यतरस्यांग्रहणस्य अनुवृत्त्या तत्प्रत्ययचतुष्टयं सिध्मादिभ्यः अपि स्यात् तर्हि अस्यैव अन्यतरस्यांशब्दस्य 'लोमादिपामादिपिच्छादिभ्यः शनेलचः'[560] इति सूत्रे अपि अनुवृत्त्या पिच्छादिभ्यः अपि तत्प्रत्ययचतुष्टयं स्यात्। एवं सति तुन्दादिषु एव पिच्छादयः पठितव्याः। तेन पाठेन तुन्दादिभ्यः 'लोमादिपामादि' इति प्रत्ययचतुष्टयस्य सिद्धिः स्यात्, तेन 'तुन्दादिभ्य इलच्च' इति पृथक् सूत्रमनावश्यकम्।

अथवा पिच्छादिष्वेव तुन्दादयः पठनीयाः। अर्थात् तुन्दादिगणे पिच्छादीनां पाठादेव पिच्छादिभ्यः 'तुन्दादिभ्य इलच्च' इति शास्त्रेण तत्प्रत्ययचतुष्टयस्य सिद्धिः स्यात्। तेन 'लोमादिपामादि'सूत्रे पिच्छादिग्रहणं निरर्थकं स्यात्। एवञ्च पिच्छादितुन्दाद्योः पृथक्पाठस्य पृथग्योगकरणस्य च युक्तिरेव नास्ति। अतः 'सिध्मादिभ्यश्च' इति शास्त्रे अन्यतरस्यांशब्दः समुच्चयार्थः न विकल्पार्थः इति ज्ञापयति। तेन अन्यतरस्यांग्रहणेन मतुप्प्रत्ययः समुच्चीयते, न यथाप्राप्तम्

---

559 पा. सू. 5.2.117

560 पा. सू. 5.2.100

अभ्यनुज्ञायते। तस्मात् सिध्मादिपिच्छादिभ्यः इनिठनौ न भवतः। अर्थात् प्रकृतस्य मतुप्प्रत्ययस्य समुच्चयेन लच्-मतुप् इत्यनयोः प्रत्यययोः सिद्धौ अपि तत्प्रत्ययचतुष्टयं तुन्दादिभ्यः न स्यात्। अतः पिच्छादिभ्यः पृथक् 'तुन्दादिभ्य इलच्च' इति लक्षणं कृतम्। तस्य च शास्त्रस्य इनिठन्भ्यां परं प्रवृत्तेः चकारबलेन मतुप् इनिठनौ चेति प्रत्ययाः समुच्चीयन्ते इत्येवं चतुर्णां प्रत्ययानां सिद्धिः भवति। सिध्मादिपिच्छादिसूत्रयोस्तु इनिठनोः पूर्वं पाठेन समुच्चयार्थकेन अन्यतरस्यांग्रहणेन पूर्वप्रकृतः मतुप्प्रत्ययः एव समुच्चीयते इति तेभ्यः द्वौ प्रत्ययौ भवतः इति सिध्यति।

यदि च अन्यतरस्याम् इत्यस्य विकल्पार्थकत्वं तदा अभावपक्षे पूर्वेण परेण वा विहिताः सर्वेऽपि प्रत्ययाः यथाप्राप्तं स्युः। तथा च समुच्चयसमर्थकवार्त्तिकं "पिच्छादिभ्यस्तुन्दादीनां नानायोगकरणं ज्ञापकसमावेशस्य"[561] (वा. 5765) इति। तदेतत् सर्वं मनसिकृत्य लिखति *ज्ञापकसंग्रह*कारः- "अदन्तपिच्छादि-तुन्दाद्य-न्यतरपाठेनैव सिद्धे भेदेन पाठो ज्ञापयति लजन्यतरस्यामिति समुच्चय इति। 'केशाद्वोऽन्यतरस्याम्' इत्यन्यतरस्यांग्रहणस्य पुनःकरणाच्चेदं समुच्चयार्थम्। द्युद्रुभ्यां नित्यार्थमेके एतदन्यतरस्यां ग्रहणमिच्छन्ति विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति।"[562]

**एस-सि-वसुमहोदयमतम्-** एस. सि. वसुमहोदयेनापि उच्यते यत् प्रकृते अन्यतरस्यामिति समुच्चयार्थं न तु विकल्पार्थम्। तथा चोच्यते तेन "The word

---

561 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 351

562 ज्ञा. स., पृ. 78

अन्यतरस्याम् understood in this sutra, causes the employment of the affix मतुप् in the alternative. It does not mean that the affix लच् is optional. For were लच् optional, then the affix इनि and ठन् would come by V. 2. 115 after those words of सिध्मादि class which end in अ. But that is not the case."[563]

***काशिका*कारोक्तिः-** *काशिकार*मतेन तु अन्यतरस्यांग्रहणेन मतुप्समुच्चीयते, न तु प्रत्ययो विकल्प्यते। अत एव अकारान्तेभ्यः इनिठनौ प्रत्ययौ न स्तः। तथा च *काशिकायाम्-* "लजन्यतरस्याम् इति वर्तते। सिध्मादिभ्यः प्रातिपदिकेभ्यो लच् प्रत्ययो भवत्यन्यरस्यां मत्वर्थे। सिध्मलः, सिध्मवान्। गडुलः, गडुवान्"[564] इति।

***न्यास*कारकथनम्-** समुच्चयार्थः अन्यतरस्यामिति समर्थयिता *न्यास*कारः कथयति यद् यदि अन्यतरस्यांग्रहणेन विकल्पेन लच् स्यात् तर्हि पक्षे यथाप्राप्तम् एव स्याद् इति अकारान्तात् सिध्मादेः इनिठनौ स्याताम्। अतः दोषोऽयं दूरीकृतः अन्यतरस्यामिति समुच्चयार्थकः इति कथनेन। अत्र मतुबेव समुच्चीयते नान्यत्प्रत्ययः। तथा चोच्यते *न्यास*कारेण "मतुबिह स्वरितत्वात्, सन्निहित इति स एव समुच्चीयते, न तु यथाप्राप्तं प्रत्ययान्तरमित्येके।"[565] परेषां मते तु

---

563 अष्टा., प., अनु. एस. सि. वसुः, पृ. 931

564 का. वृ., च. भा., पृ. 201

565 तदेव, पृ. 209

अन्यतरस्यामिति विकल्पार्थमेव। न च इनिठनौ उभौ विधीयेते, तयोर्महाविभाषयैव सिद्धत्वात्। अस्तु तर्हि प्रत्ययान्तरं पक्षे विधीयेत, सोऽपि न, यथाप्राप्तम् आपादयितुं सन्निहितप्रत्यासत्तेः मतुबेव। एवम् अन्यतरस्यांग्रहणे सति मतुब् एव विकल्पेन भवति इत्येवमाशयेन अन्यतरस्यांग्रहणात् समुच्चीयते इत्युक्तम्। न तु प्रत्ययः विकल्प्यते। न च लचः भावः अभावः वा विधीयते।

***पदमञ्जरी*कारमतम्**- निपाताः अनेकार्थकाः भवन्ति। अतः निपातानाम् अनेकार्थकत्वादत्र अन्यतरस्यांग्रहणं समुच्चये अर्थे वर्तते। अत्र प्रमाणवार्त्तिकम्- लजन्यतरस्यामिति समुच्चयः इति। अन्यत्र यथा अन्यतरस्यांग्रहणं विकल्पार्थे वर्तते, तथात्र नास्ति। विकल्पार्थे अन्यतरस्यांग्रहणे लचा मुक्ते यथाप्राप्तमेव स्यात्, ततः अकारान्तेभ्यः इनिठनौ भवेताम्। समुच्चयार्थे प्रकृतः मतुबेव समुच्चीयते इति न दोषः। अत्र तावत् प्रश्नः भवति, कथं तावद् ज्ञायते यद् अत्र समुच्चयार्थः वर्तते न तु विकल्पार्थः। अस्ति अत्र ज्ञापकम्। पठति हि आचार्यः पिच्छादीन् तुन्दादीन् च पृथक्। कथं वा ज्ञापकमिति चेत्- अत्र तुन्दादिभ्य इलच्च इति चत्वारः प्रत्ययाः इष्यन्ते- ते च प्रत्ययाः इलच्, इनिः, ठन्, मतुप् चेति। यदि चात्र अन्यतरस्यां विकल्पार्थं स्यात् तदा पिच्छादिभ्यः अपि ते चत्वारः प्रत्ययाः स्युः। कथमिति चेत् इलचः विकल्पकारणात् इनिठनौ प्रत्ययौ स्याताम्, तयोः इनिठनोरपि विकल्पकारणात् मतुप् स्यात्। ततः तुन्दादिषु एव पिच्छादयः पठनीयाः अथवा पिच्छादिषु वा तुन्दादयः पाठ्याः। तयोः पृथक्पाठाद् ज्ञायते यत् ठनि

अन्यतरस्यांग्रहणात् मतुप्समुच्चीयते, न यथाप्राप्तमभ्यनुज्ञायते इति। एवं तर्हि पिच्छादिभ्यः द्वौ प्रत्ययौ  इलच् मतुप् चेति, तुन्दादिभ्यः चत्वारः प्रत्ययाः इति पृथक्पाठः अर्थवान् अस्ति। अत्र तावत् प्रश्नः, तुन्दादिभ्यः अनकारान्तेभ्यः अपि इनिठनौ इष्येते, पिच्छादिभ्यः तु अकारान्तेभ्यः एव, तत्र तुन्दादिषु यदि पिच्छादयः पठ्येरन्, तदा पिच्छादिभ्यः अपि अनकारान्तेभ्यः इनिठनौ स्याताम्। पुनः पिच्छादिषु तुन्दादयः पठ्येरन् तदा तुन्दादिभ्यः अपि अकारान्तेभ्यः इनिठनौ प्रत्ययौ न भवेतामिति चेत् तर्हि कानिचित् अकारान्तानि पिच्छादिषु पठति, कानिचित् तुन्दादिषु, तद्यथोक्तस्यार्थस्य ज्ञापकं भविष्यति। तेन 'केशाद्वोऽन्यतरस्याम्'[566] इति वक्तव्यं न भवति। कुतः इति चेत् प्रकृतान्यतरस्यांग्रहणानुवृत्तेः इन्ठन्मतुपां सिद्धत्वात्। तदनिठनोः प्राप्त्यर्थं क्रियमाणं पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थत्वं ज्ञापयति।

***महाभाष्य*काराशयः**- *महाभाष्ये* ज्ञापकान्तरमुच्यते- 'केशाद्वोऽन्यतरस्याम्' इत्यस्मिन् शास्त्रे अन्यतरस्यांशब्दस्योपादानं नावश्यकम्। 'प्राणिस्थादातो लजन्यतरस्याम्' इत्यस्माद् अन्यतस्यांपदानुवृत्त्या एव कार्यसिद्धिः भविष्यति। अतः प्रकृतसूत्रे अन्यतरस्यांपदं व्यर्थं 'सिध्मादिभ्यश्च' इति सूत्रे अनुवृत्तम् अन्यतरस्यांपदं समुच्चयार्थकम् इति ज्ञापयति। एवञ्च 'केशाद्वोऽन्यतरस्याम्' इत्यस्मिन् सूत्रे यदि अन्यतरस्याम् इति पदस्य तथानुवृत्तिः स्यात् तदा समुच्चयार्थः एव लभ्येत। विकल्पार्थः तु इष्यते तस्मात् 'केशाद्वोऽन्यतरस्याम्' इत्यस्मिन् शास्त्रे पृथक्

---

566 पा. सू. 5.2.109

अन्यतरस्यांग्रहणं विहितम्। अतः पक्षे इनिठनौ अपि प्राप्येते। तस्मादेव केशवः केशिकः केशवान् केशी इति रूपचतुष्टयं सिध्यति। तदेव कैयटः वदति- "केशाद्वः इत्येव वक्तव्यम्। तत्र प्रकृतान्यतरस्यांग्रहणानुवृत्त्या ठन्-इनि-मतुपो भविष्यन्तीति किमन्यतरस्यांग्रहणेन ठन्-इनिप्रास्यर्थेन। तत्पुनः क्रियमाणं पूर्वस्यान्यतरस्यांग्रहणस्य मतुप्सम्च्चयार्थत्वं ज्ञापयतीत्यर्थः"[567]।

केचन तु तज्ज्ञापकाभावमिच्छन्ति। ते वदन्ति यत् 'केशाद्वोऽन्य-तरस्याम्' इत्यस्मिन् शास्त्रे अन्यतरस्यांग्रहणं 'द्युद्रुभ्यां मः'[568] इति पूर्वसूत्रस्य अनित्यत्वज्ञापनार्थमिति। अन्यथा तत्रापि अन्यतरस्यामिति पदस्य अनुवृत्तिः क्रियते चेत् तस्यापि अनित्यत्वापत्तिः। तस्माद् 'द्युद्रुभ्यां मः' इति सूत्रे अन्यतरस्याम् इत्यस्य निवृत्तिं ज्ञापयति। एतदेव *ज्ञापकसंग्रह*कारः कथयति- "द्युद्रुभ्यां नित्यार्थमेके एतदन्यतरस्यां ग्रहणमिच्छन्ति विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति"[569]

**अत्रावधेयम्-** एवञ्च *उद्द्योतज्ञापकसंग्रह*योः अध्ययनेन इदम् आयाति यत् 'सिध्मादिभ्यश्च' इति सूत्रे अनुवृत्तम् अन्यतरस्यांपदं समुच्चयार्थकम् इति। एवं समानसभावस्य प्रकाशकत्वात् उभयोः ग्रन्थयोः कर्ता एक एव नागेशः इत्यपि अनुमातुं शक्यते।

567 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 351

568 पा. सू. 5.2.108

569 ज्ञा. स., पृ. 78

वस्तुतस्तु 'घुद्रुभ्यां मो नित्यम्' इति नित्यपदं संयुज्य नित्यत्वं साधयितुं शक्यम्, तदर्थम् उत्तरसूत्रे अन्यतरस्यांपदोपादानम् इत्येतत् न युज्यते इत्यन्यतरस्यांग्रहणं ज्ञापकम् एवास्ति। एतदेव *उद्द्योते* लिख्यते यत् "वस्तुतस्तु 'घुद्रुभ्यां मो नित्यम्' इत्येव सिद्धे 'अन्यतरस्यां'ग्रहणं ज्ञापकमेव। इदमेव भाष्ये- 'एके' इत्यत्रारुजिबीजमिति।"[570]

## 3.10. प्रागेतस्माद्योगाद्विभाषानुवर्तते।

एकपूर्वाद् गोपूर्वाच्च नित्यं ठञ् स्याद् इत्यर्थके 'एकगोपूर्वाट्ठञ् नित्यम्'[571] इति शास्त्रे नित्यपदोपादानं कुतः इति शङ्कायाः समाधानम् अत्र प्रस्तूयते।

***ज्ञापकसंग्रहकारमतम्-*** 'एकगोपूर्वाट्ठञ् नित्यम्' इति शास्त्रस्य अर्थस्तावत् एकपूर्वाद् गोपूर्वाच्च नित्यं ठञ् स्याद् इति। 'एकगोपूर्वाट्ठञ् नित्यम्' इति सूत्रे नित्यग्रहणं नावश्यकम् इति शङ्का उत्पद्यते। यदि च उच्यते, नित्यग्रहणाभावे सति 'केशाद्वोऽन्यतरस्यां' इति शास्त्राद् अन्यतरस्याम् इत्यस्य अनुवृत्तिः स्यात्। तेन पक्षे मतुप्प्रत्ययः स्यादिति मतुप्प्रत्ययवारणाय नित्यपदोपादानं सूत्रे आवश्यकम् इति चेत् न, यतो हि पूर्वसूत्रे एव अन्यतरस्याम् इत्यस्य निवृत्तिः, अतः अत्र तस्य अनुवृत्त्यसम्भवः।

---

570 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 351

571 पा. सू. 5.2.118

अस्यां स्थितौ *ज्ञापकसंग्रह*कारः ज्ञाप्यं प्रस्तौति- "नित्यग्रहणं ज्ञापयति प्रागेतस्माद्योगाद्विभाषानुवर्तत"[572] इति।

एवञ्च यस्माद् अस्मिन् शास्त्रे नित्यग्रहणं विहितम् अस्ति, तेन पूर्वसूत्रे अन्यतरस्यांग्रहणम् अनुवर्तते इति ज्ञाप्यते। तेन प्रकृतसूत्रे अपि तस्य अनुवृत्तिः भविष्यति, ततः पक्षे मतुप्प्रत्ययः अपि प्राप्नुयात्, सः मतुप्प्रत्ययः मा भूद्, अत एव तस्य निवारणाय नित्यग्रहणं कृतम् इति स्वांशे चारितार्थ्यम्। ज्ञाप्यस्य अन्यत् फलं तावद् 'व्रीह्यादिभ्यश्च'[573] इति सूत्रस्य वैकल्पिकत्वम्।

**दीक्षिताशयः-** ऐकशतिकः, ऐकसहस्रिकः, गौशतिकः, गौसहस्रिकः च इति उदाहरणानि प्रददता भट्टोजिदीक्षितेन अस्य ज्ञाप्यस्य विषये तस्य सूत्रस्य वृत्तौ किमपि नोक्तम्। तत्र *बालमनोरमा*कारः कथयति- "यद्यपि नित्यग्रहणाभावेऽपि ठञा इनिठनोर्निवृत्तिः सिध्यति, तथापि समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्त्या मतुप् समुच्चीयेत। तन्निवृत्त्यर्थं नित्यग्रहणम्"[574] इति। एवं तर्हि मतुप्प्रत्ययनिवृत्तये नित्यग्रहणम् आवश्यकम् इति *बालमनोरमा*कारनये सिध्यति। *तत्त्वबोधिनी*कारनये अपि- नित्यग्रहणं मतुपः बाधनाय। अन्यथा ठञ्प्रत्ययेन इनिठनोः बाधे विहिते अन्यतरस्यांग्रहणानुवृत्त्या मतुप्प्रत्ययः स्यादेव।

---

572 ज्ञा. स., पृ. 80

573 पा. सू. 5.2.116

574 वै. सि. कौ., द्वि. भा., पृ. 583

***काशिका*कार-*पदमञ्जरी*कार-*न्यास*कारमतम्-** *काशिका*कारस्यापि नये नित्यग्रहणं मतुप्प्रत्ययदूरीकरणाय उपात्तम्। तथा च तेनोक्तम्- “नित्यग्रहणं मतुपो बाधनार्थम्”[575] इति। अन्यतरस्यांग्रहणात् सर्वत्रैव अत्र प्रकरणे मतुप्प्रत्ययसमुच्चयाद् अत्रापि मतुप्प्रत्ययः प्राप्नुयात्। अतः तद्वारणाय नित्यग्रहणं कार्यं, तेन विभाषापदस्य अनुवृत्तिः न भवति, तेन मतुबपि न भवति इति *पदमञ्जरी*काराशयः। अयमेव भावः *न्यासे* उक्तः। तेन उक्तम्- “असति हि नित्यग्रहणेऽन्यतरस्यांग्रहणं मतुप्समुच्चयार्थम् सर्वत्रानुवर्तते इति मतुबपि स्यात्। तस्माद् बाधनार्थं नित्यग्रहणम्”[576] इति। एवम् मतुप्प्रत्ययबाधार्थं नित्यग्रहणम् आवश्यकम्।

**भाष्यकाराशयः-** नित्यपदप्रयोजनं वदन् *भाष्य*कारः किमर्थं नित्यग्रहणं कर्तव्यम् इति प्रश्नं पृच्छति, स्वयमेव कथयति, विभाषा यथा न स्यात् तदर्थं नित्यग्रहणं कार्यम्। तदपि न साधु यतो हि पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तम्। तर्हि अस्मिन् सूत्रे विभाषापदस्य अनुवृत्तिर्नास्ति, तर्हि कथं तन्निषेधये नित्यग्रहणम् इति प्रश्नः तथैव तिष्ठति। अन्ते सिद्धान्तं प्रस्तौति- “नित्यग्रहणेन तर्हि इदं ज्ञाप्यते यत्- प्रागेतस्माद्योगात् विभाषा इत्यनुवर्तते”[577] इति। अतः अत्रापि वाग्रहणानुवृत्त्या पक्षे मतुप्प्रत्ययः अपि स्यात्, तद्वारणाय नित्यग्रहणम् आवश्यकम्।

575 का. वृ., च. भा., पृ. 225

576 तत्रैव

577 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 355

**अत्रावधेयम्-** *महाभाष्य*कारेण अस्य च ज्ञाप्यस्य अन्यत् फलं किमिति तु न दर्शितम्। किन्तु *ज्ञापकसंग्रहे* अस्य फलं प्रदर्शितम्, तद्यथा व्रीह्यादिभ्यश्च इति सूत्रस्य वैकल्पिकत्वम्। *काशिकापदमञ्जरीन्यास*टीकासु तु अन्यत् फलं न दर्शितम्।

## 3.11. कारकसंज्ञायां तरतमयोगो न भवति।

क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं भवति इत्यर्थके 'साधकतमं करणम्'[578] शास्त्रे तमब्ग्रहणं कुतः इति प्रश्नः उदेति। अस्य च प्रश्नस्य उत्तरम् अग्रे प्रदीयते।

***ज्ञापकसंग्रह*कारमतम्-** ननु प्रत्येकं कारकस्य यत्किञ्चित्क्रिया-निर्वर्तकत्वादेव साधकत्वं सिध्यति, ततः साधकम् इति न कथ्यते चेदपि करणसंज्ञायाः असाधके प्रवृत्तिः न भविष्यति। अतः साधकम् इति पदोपादानम् साधकतमम् इत्यर्थं तु बोधयिष्यति। अतः तमब्ग्रहणस्य किं प्रयोजनमिति जिज्ञासा उदेति। यथा 'अभिरूपाय कन्या देया' इति कथिते सति अनभिरूपाय दाने प्रवृत्तेः अभावाद् अभिरूपतमाय कन्या देया इति तमब्ग्रहणेन विना एव लभ्यते। एवमत्रापि स्याद् इति शङ्का विहिता। अत एव *ज्ञापकसंग्रह*कारः वदति- "तमग्रहणं ज्ञापयति कारकसंज्ञायां तरतमयोगो न भवतीति।"[579]

578 पा. सू. 1.4.42

579 ज्ञा. स., पृ. 129

अतः प्रकृते तमबर्थः न लभ्येत तमब्ग्रहणं विना। तस्मात् तमबर्थलाभाय तमब्ग्रहणं कृतं सूत्रे।

अस्य च फलं तावत्- एतत्सूत्राद् अन्यत्र कारकप्रकरणे तरतमभावः न आश्रीयते इति ज्ञाप्यते। अन्यथा 'आधारोऽधिकरणम्'[580] इत्यत्र अन्वर्थमहासंज्ञाबलेन एव आधारलाभे सति पुनः आधारपदग्रहणात् प्रकृष्टः आधारः नाम सर्वावयवव्याप्त्या यः आधारः सः अधिकरणसंज्ञः स्यात् इति ज्ञाप्येत। तथा सति दोषः स्यात् अर्थात् तिलेषु तैलम्, दधनि सर्पिः इत्यादौ एव अधिकरणसंज्ञा स्यात्, गङ्गायां घोष इत्यादौ तु न सा संज्ञा न स्यात्।

**दीक्षिताशयः-** तत्र साधकतमं करणम् इति सूत्रवृत्तौ दीक्षितः पदकृत्यं दर्शयति- "तमब्ग्रहणं किम्। गङ्गायां घोषः।"[581] तस्य आशयं कथयन् *बालमनोरमा*कारः विवृणोति- "कारकाधिकारादेव सिद्धे पुनः साधकग्रहणादेव प्रकृष्टं साधकमिति विज्ञायते इति प्रश्नः।"[582] तत्र उच्यते तमब्ग्रहणेन कारकप्रकरणे गौणमुख्यन्यायः एतत्सूत्रादन्यत्र न प्रवर्तते इति ज्ञाप्यते। अन्यथा आधारोऽधिकरणम् इत्यत्र अन्वर्थमहासंज्ञाबलादेवाधारलाभे पुनस्तद्ग्रहणसामर्थ्यात् सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः स्यात्। एवं च तिलेषु तैलं दध्नि सर्पिरित्यादावेव

580 पा. सू. 1.4.45
581 वै. सि. कौ., द्वि. भा., पृ. 633
582 तत्रैव

स्यात्, गङ्गायां घोषः, कूपे गर्गकुलमित्यादौ न स्यात्। अतस्तमब्ग्रहणमिति *भाष्ये* स्पष्टम्।

***काशिका*कारमतम्-** वामनजयादित्यौ दीक्षिताशयमेव *काशिकावृत्तौ* विवृणुतः। तत्र उदाहरणमेकम् अधिकं प्रदत्तम् अस्ति इत्येतावान् विशेषः अस्ति। तदुदाहरणं तावत् "तमब्ग्रहणं किम्। गङ्गायां घोषः। कूपे गर्गकुलम्"[583] इति द्वितीयम् उदाहरणम् अधिकं प्रोक्तम्।

***पदमञ्जरी*कारमतम्-** *पदमञ्जरी*कारनये कारकाधिकारत्वात् साधकत्वे सिद्धे सति पुनः साधकश्रुतिः प्रकर्षार्था भविष्यतीति प्रश्नः इति तमब्ग्रहणं किम् इति प्रश्नस्य तात्पर्यम्। "असति तमब्ग्रहणे आधारो नाम यत्राधारात्मा व्याप्तो भवत्याधेयेन, तेनेहैव स्यात्- तिलेषु तैलम्, पयसि सर्पिरिति, गङ्गायां घोषः इत्यत्र न स्यात्।"[584] तमब्ग्रहणे क्रियमाणे तु इदं ज्ञाप्यते यत्- इह प्रकरणे सामर्थ्यगम्यः प्रकर्षः नाश्रीयते, तेन अत्रापि न भवति।

"यदा च देशधर्मो घोषं प्रत्याधारभावः स्रोतस्युपचर्यते, तदेवं तमब्ग्रहणस्य प्रयोजनम्। यदा च गङ्गाशब्दस्तीरे वर्त्तते तदा न प्रयोजनम्, आधेयेन व्याप्तिसम्भवान्मुख्य एवाधारभाव"[585] इति।

---

583 का. वृ., प्र. भा., पृ. 558

584 तत्रैव

585 तत्रैव

***न्यास*कारमतम्-** एतन्नये यदि तमब्ग्रहणं न क्रियेत, ततः गङ्गायां घोषः इत्यत्र अधिकरणसंज्ञा न स्यात्। इह हि द्विविधः आधारः- गौणः, मुख्यश्चेति। तत्र मुख्यो य आधेयेन व्याप्यते, यथा तिलेषु तैलमस्ति, अत्र तैलेनाधेयेनाधारभूतास्तिला व्याप्ताः। अव्याप्तः गौणः यथा- गङ्गायां घोष इति। अत्र हि सामीप्याद् गङ्गाया आधारत्वमुपचरितम्, न मुख्यं व्याप्त्यभावात्। तत्र असति तमब्ग्रहणे गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः इति मुख्यस्यैव अधिकरणसंज्ञा स्यात्, न इतरस्य, तमब्ग्रहणात् तस्यापि भवति। किन्तु तथापि इह तमब्ग्रहणं न कर्तव्यम्, कथमिति चेत्, विनापि तमब्ग्रहणेन प्रकर्षावगतिर्भवति। यथैव ह्यनभिरूपाय कन्यादानस्य प्रवृत्तिः नास्ति, इत्यभिरूपाय कन्या देयेत्युक्ते विनापि प्रकर्षप्रत्ययेनाभिरूपतमायेति गम्यते, तथा इहापि कारकाधिकाराद् असाधके संज्ञायाः प्रवृत्तिर्नास्ति, साधकं करणम् इत्युक्ते तमब्ग्रहणम् अन्तरेण साधकतमम् इति गम्यते, तत् किं तमब्ग्रहणेन। तदेतत् तमब्ग्रहणं ज्ञापनार्थं कृतम्। किं तर्हि ज्ञाप्यते इति चेत्- "इह कारकाधिकारे इतः सूत्रादन्यत्र विना तमब्ग्रहणेन प्रकर्षो नाश्रीयते इति। तस्य च फलं भवति यत् आधारोऽधिकरणम् इत्यनेन गङ्गायां घोषः इत्यादावमुख्यस्यापि गङ्गादेराधारस्याधिकरणसंज्ञा सिद्धा भवति।"[586]

**भाष्यकाराशयः-** *महाभाष्ये* प्रकृतसूत्रव्याख्यानप्रसङ्गे आक्षेपभाष्याणि नैकानि उक्त्वा समाधानभाष्यम् अवादीत् पतञ्जलिः। स वदति- "एवं तर्हि सिद्धे सति

---

586 तदेव, पृ. 559

यत्तमग्रहणं करोति तज्ज्ञापयत्याचार्यः- कारकसंज्ञायां तरतमयोगो न भवतीति"[587] तस्य च प्रयोजनमपि तेन उक्तम्- "यत्र संप्राप्य निवृत्तिः। तेनेहैव स्यात्- ग्रामादागच्छति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवति इत्यत्रापि सिद्धं भवति।"[588] इदं तावद् अपायस्य उदाहरणम्। अपादानम् इति महासंज्ञयैवापाये ध्रुवे लब्धे पुनस्तद्ग्रहणसामर्थ्यात्प्रकर्षविवक्षायामत्र न स्यादिति भावः।

*भाष्य*कारेण आधारस्यापि उदाहरणं दत्तम् अस्ति- "यत्र कृत्स्नः आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्- तिलेषु तैलं दध्नि सर्पिरिति। गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति इति।"[589]

**अत्रवाधेयम्-** अत्र प्रकरणे तरमतयोगाभावे ईप्सितमात्रस्य कर्मत्वं प्राप्नोति इत्येवं प्रश्नः नागेशेन उपस्थापितः *प्रदीपोद्द्योत*टीकायाम्। एतस्य प्रश्नस्य समाधानं लभ्यते कैयटस्य *महाभाष्यप्रदीप*टीकायाम्। स वदति- "तत्र तमश्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययग्रहणमन्तरेणेह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते" इति।[590] वस्तुतः नागेशः *ज्ञापकसंग्रहे* इदं ज्ञाप्यं न प्रस्तुतवान्। एतस्य

587 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 259

588 तत्रैव

589 तत्रैव

590 तत्रैव

पर्यालोचनं मया अग्रिमाध्याये करणीयम् आसीत्। परन्तु विषयस्य महत्त्वाद् गभीरतया च अत्रैव अध्याये मया आलोचितः अस्ति।

## 3.12. आयन्नादयः उपदेशे भवन्ति।

'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'[591] इति शास्त्रेण फादीनां प्रत्ययादीनाम् आयन्नादयः आदेशाः विधीयन्ते, किन्तु ते आदेशाः किम् उपदेशे भवन्ति इति शङ्कायाः समाधानम् अत्र आलोच्यते।

***ज्ञापकसंग्रह*कारमतम्-** 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति सूत्रेण फादीनां प्रत्ययादीनाम् आयन्नादयः आदेशाः विधीयन्ते। एवञ्च तत्र नडशब्दात् फक्प्रत्यये नड फ इति स्थिते प्रत्ययस्वरेण फकारोत्तस्य अकारस्य उदात्तत्वे सति अस्वरकस्य फ् इत्यस्य स्थाने जातः आयन् स्वरसहितः स्यात्, तेन नाडायनशब्दः अन्तोदात्त एव स्यात्। किन्तु तत्तु नेष्यते, आयनः आकारस्य उदात्तत्वम् इष्टम् अस्ति। अस्यां स्थितौ समाधानप्रकारं ज्ञापयति *ज्ञापकसंग्रह*कारः- 'घच्छौ च'[592] इति चित्करणं ज्ञापकम् आयन्नादय उपदेशे भवन्तीति।[593]

एवञ्च 'घच्छौ च' इति सूत्रे घचः चित्करणम् अत्र ज्ञापकं भविष्यति, तेन न कश्चिदपि दोषः। तथा च प्रत्ययानाम् उपदेशावस्थायाम् एव स्वरप्रवृत्तेः पूर्वम् एव प्रत्ययादीनां फादीनाम् आयन्नादयः आदेशाः भवन्ति। एवञ्च आदेशात् परं

---

591 पा. सू. 7.1.2

592 पा. सू. 4.4.117

593 ज्ञा. स., पृ. 99

स्वरः प्रवर्तते। तेन आयन इत्यादेः आद्यवर्णस्य आकारादेः उदात्तत्वं भवति इति आद्युदात्तत्वं सिध्यति एव।

कथं च चित्करणं व्यर्थं सद् ज्ञापकं भवति इति प्रदर्श्यते- अग्रशब्दात् घच्प्रत्यये विहिते सति, अग्र घ् अ इत्यत्र घकारस्य इयादेशे अग्रियशब्दे अन्तिमस्य अकारस्य उदात्तत्वसिद्ध्यर्थं घच्प्रत्ययस्य चित्करणं क्रियते। किन्तु एतत् सर्वम् उपदेशावस्थायाम् एव घकारस्य इयादेशे सति घटते। ततः इयादेशात् परं प्रत्ययस्वरेण आदेः इकारस्य उदात्तत्वे प्राप्ते तद् बाधित्वा अन्तोदात्तत्वस्वरः यथा स्यात् तदर्थं चित्करणं सार्थकं भवति। यदि च उपदेशकाले आदेशः न भवति तदा तु चित्करणं निरर्थकं स्यात्। कथमिति चेत् यदि उपदेशकाले आदेशः न भवति तदा घ इत्यत्र अकारस्य प्रत्ययस्वरेण उदात्तत्वे सति अस्वरकस्य घ इत्यस्य इयादेशः अपि अस्वरक एव भविष्यति। तर्हि पूर्वं प्रवृत्तः अकारस्वरः इति प्रत्ययस्वरः तथैव स्थास्यति। एवञ्च अग्रियशब्दस्य अन्तोदात्तत्वं तु सिध्यति एव। तस्माद् घचः चित्करणं निरर्थकं भवति। एवञ्च एतत्चित्करणसामर्थ्यदेव उपदेशावस्थायाम् एव आयन्नादयः आदेशाः भवन्ति इति ज्ञाप्यते इति न कश्चिद् दोषः।

**दीक्षिताद्याशयः-** दीक्षितवृत्तौ वा *बालमनोरमा*टीकायां वा *तत्त्वबोधिनी*-टीकायां वा अस्य ज्ञाप्यस्य विषये तथा किमपि नोक्तम्।

***काशिका*कार-*पदमञ्जरी*कार-*न्यास*कारमतम्-** आयन्नादयः आदेशाः प्रत्ययोपदेशकाले एव भवन्ति इति *पदमञ्जरी*कारस्य सिद्धान्तः। तथा च तेन उक्तम्- "एते आयन्नादयः प्रत्ययोपदेशकाले एव भवन्ति। कृतेष्वेतेषु प्रत्ययाद्युदात्तत्वं भवति, तथा च घच्छौ च इति घचश्चित्करणम् अर्थवद् भवति इति।"[594] *पदमञ्जरी*कारनये अपि प्रत्ययोपदेशकाले एव आयन्नादयः आदेशाः भवन्ति। तथा च अन्यथा यदि प्रत्ययस्वरे विहिते आयन्नादयः आदेशाः स्युः, तर्हि घशब्दस्य अकारस्य उदात्तत्वे विहिते घकारस्य हलः स्रंसनधर्मिणः स्रंसनधर्मिणि अनुदात्ते आदेशे विहिते अन्तोदात्तत्वं सिद्धमिति चित्करणमनर्थकं स्याद् इत्याशयः। *न्यास*काराशयस्तावत्- घचः चित्करणम् 'चितः'[595] इत्यन्तोदात्तत्वं यथा स्यादिति ब्रुवाणस्य *न्यास*कारस्य नयस्तावद् यदि च प्रत्ययस्य उपदेशावस्थायाम् एव आयन्नादयः आदेशाः भवन्ति तदैव घचः चित्करणम् अर्थवद् भवति नान्यथा। तथा च सः वदति यत् "अन्यथा यदि प्रत्ययस्य उपदेशकालोत्तरम् एते आदेशाः भवेयुः, ततः यत्रैवासति चित्करण उदात्तत्वं भवति, घकाराकारे सत्यपि चित्करणे तत्रैव तेन भवितव्यमिति चित्करणमनर्थकं स्यात्। तस्माच्चित्करणादवसीयते- प्रत्ययोपदेशकाल एवैत आयन्नाद्यादेशास्तावद्भवन्ति, पश्चात् प्रत्ययाद्युदात्तत्वमिति भावः।"[596]

---

594 का. वृ., प. भा., पृ. 358

595 पा. सू 5.1.157

596 का. वृ., प. भा., पृ. 358-359

**भाष्यकाराशयः-** महामुनिः पतञ्जलिः अस्य सूत्रस्य विषये वदति- स्वरसिद्ध्यर्थम् आयन्नादिषु उपदेशिवद्भवचनं कर्तव्यम्। उपदेशकाले आयन्नादिषु इष्टस्वरः यथा तदर्थम् अर्थात् स्वरसिद्ध्यर्थम् उपदेशिववद्वचनं कर्तव्यम्। यदि च उपदेशिवद्वचनं न क्रियते तर्हि प्रत्ययसंज्ञासन्नियोगेन आद्युदात्तत्वे विहिते आन्तर्यतः आदेशाः अस्वरकाणाम् अस्वरकाः भवेयुः। किन्तु उपदेशिवद्वचनं नावश्यकं, कुत इति चेत्, 'घच्छौ च' इत्यत्र चित्करणं ज्ञापकं भवति आयन्नादयः आदेशाः उपदेशे भवन्तीति। तथा च पतञ्जलिना प्रोक्तम्- "यदयं क्वचिद्धादींश्चितः करोति, अग्राद्यद्घच्छौ च तज्ज्ञापयत्याचार्यः- उपदेशावस्थायामायन्नादय भवन्तीति।"[597]

**अत्रावधेयम्-** *महाभाष्ये ज्ञापकसंग्रहे* च इति उभयोः स्थलयोः चित्करणसार्थक्यं दर्शितम् आयन्नादयः आदेशाः उपदेशावस्थायां न भवन्ति इति ज्ञाप्यप्रदर्शनेन। अस्य च विस्तरशः आलोचना *महाभाष्ये* लभ्यते। *काशिका*दिषु यद्यपि अस्य च ज्ञाप्यसिद्धिविषये बहु उक्तम् अस्ति। परन्तु भट्टोजिदीक्षितादयस्तु तत्र सूत्रे एतं विषयमेव न स्पृष्टवान्।

597 म. भा., ष. ख., सम्पा. दधिरामशर्मा, पृ. 12

## 3.13. अष्टनो दीर्घग्रहणं षट्संज्ञायां ज्ञापकम् आकारान्तस्य नुडर्थम् आत्वविकल्पस्य च ज्ञापकमेतत्।

दीर्घाद् अष्टन्शब्दात् परं या शसादिः विभक्तिः अस्ति, सा उदात्ता भवति इत्यर्थकस्य 'अष्टनो दीर्घात्'[598] इति सूत्रस्य अष्टासु इति उदाहरणस्थलम्। अत्र प्रश्नः भवति प्रकृते सूत्रे दीर्घात् इति पदोपादानं कुतः, अस्य च समाधानम् अत्र आलोच्यते।

***ज्ञापकसंग्रह*कारमतम्-** 'अष्टनो दीर्घात्' इति शास्त्रस्य अष्टासु इत्युदाहरणम्। तस्य च सूत्रस्य दीर्घाद् अष्टन्शब्दात् परं या शसादिविभक्तिः अस्ति सा उदात्ता भवति इत्यर्थः।

अत्र प्रश्नः भवति यत् तस्मिन् सूत्रे दीर्घग्रहणं नावश्यकम्। यदि च दीर्घग्रहणं न क्रियते तदा तदभावे 'अष्टसु' इत्यत्र ह्रस्वाद् अष्टन्शब्दात् परा या सुविभक्तिः अस्ति तस्याः अपि विभक्तेः उदात्तत्वं भवेत्, अतः तदतिव्याप्तिवारणाय दीर्घग्रहणं तस्मिन् सूत्रे आवश्यकम्।

किन्तु तदपि दीर्घग्रहणस्य प्रयोजनं नास्ति। कथमिति चेत् 'अष्टसु' इत्यत्र 'झल्युपोत्तमम्'[599] इति परशास्त्रेण षट्त्रिचतुर्भ्यः या झलादिः विभक्तिः भवति तदन्ते पदे उपोत्तमम् उदात्तं स्याद् इत्यर्थकेन उपोत्तमस्य टकारोत्तरस्य अकारस्यैव

---

598 पा. सू 6.1.172

599 पा. सू 6.1.180

उदात्तत्वात् 'सु' इत्यस्य 'अष्टनः' इति पूर्वशास्त्रेण उदात्तत्वस्य प्राप्तिरेव नास्ति। पुनः शङ्का जायते यत् 'अष्टासु' इत्यत्रापि उपोत्तमस्वरः भवेत् परत्वात्। तदा उच्यते, येन नाप्राप्तिन्यायेन 'अष्टनः' इति स्वरेण उपोत्तमस्वरस्य बाधः भविष्यति इति अष्टनः इति सूत्रस्वरस्य बाधकत्वम् इत्येवं रीत्या समाधेयम् अस्ति। एवं तर्हि 'अष्टसु' इत्यत्रापि परमुपोत्तमस्वरं बाधित्वा अपवादतया 'अष्टनः' इति विभक्तिस्वरः सिध्येद् इति तद्वारणाय दीर्घग्रहणम् आवश्यकम्। इत्येवं दीर्घग्रहणस्य सार्थकता इत्यपि न साधु।

'अष्टासु' इत्यत्र हि नकारस्य आकारे विहिते नकारान्तत्वं नास्ति इति हेतोः षट्संज्ञाविरहेण षट्संज्ञाम् आदाय झल्युपोत्तमम् इति विधीयमानस्वरः नैव भवेद् इति तस्मिन्नवश्यं प्राप्ते सति 'अष्टनः' इति शास्त्रम् आरभ्यते इति वक्तुं न शक्यते इति अपदवादत्वम् अपि नास्ति। तथा च 'अष्टसु' इत्यत्र परत्वाद् उपोत्तमस्वरः एव भवेद्, नकारलोपे विहितेऽपि तस्य असिद्धत्वात् नकारान्तत्वेन षट्संज्ञकत्वाद् उपोत्तमस्वरप्रवृत्तेः। एवं दीर्घग्रहणस्य वैयर्थ्यापत्तिः।

तदा *ज्ञापकसंग्रह*कारः वदति प्रकृतशास्त्रे दीर्घग्रहणम् आत्वे विहितेऽपि षट्संज्ञा भवतीति ज्ञापनाय अस्ति। तथा च 'अष्टासु' इत्यत्रापि षट्संज्ञकत्वेन उपोत्तमस्वरे प्राप्ते एव 'अष्टनः' इति शास्त्रस्य आरम्भाद् येन नाप्राप्तिन्यायेन 'अष्टन' इति शास्त्रस्य अपवादत्वम्। इत्येवं अष्टासु इत्यत्र उपोत्तमस्वरः न स्यात्।

तुल्यन्यायेन अष्टसु इत्यत्राप्यपवादत्वाद् विभक्तिस्वरे प्राप्ते तद्वारणार्थं दीर्घग्रहणम् आवश्यकम् इति स्वांशे चारितार्थ्यम् दीर्घग्रहणस्य।

अस्य च अन्यत् फलम् अपि अस्ति। तथा च दीर्घग्रहणं आकारान्तस्य नुडर्थमिति फलम् दर्शितं *ज्ञापकसंग्रह*कारेण। तथा च अष्टन् आम् इत्यत्र 'अष्टन आ विभक्तौ'[600] इति योगेन नकारस्य आत्वे विहिते सति आकारान्तस्यापि प्रकृतशास्त्रोक्तज्ञापकेन षट्संज्ञा भवति इति हेतोः 'षट्चतुर्थ्यश्च'[601] इति शास्त्रेण आमः नुडागमे विहिते सति अष्टानाम् इति रूपं सिध्यति। तदेतत् सर्वं *ज्ञापकसंग्रह*कारः लिखति- "अष्टनो दीर्घग्रहणं षट्संज्ञायां ज्ञापकम् आकारान्तस्य नुडर्थम्। आत्वविकल्पस्य च ज्ञापकमेतत्।"[602]

**दीक्षिताशयः-** *वैयाकरणसिद्धान्तकौमुदी*कारः दीक्षितः अस्मिन् विषये वृत्तौ किमपि नावादीत्। *बालमनोरमा*कारेण दीर्घग्रहणेन अष्टनः आत्वविकल्पः ज्ञाप्यते इति कथ्यते। यदि च आत्वं नित्यं स्यात् तदा व्यावर्त्याभावाद् दीर्घग्रहणम् व्यर्थं स्यात्। अतः दीर्घग्रहणं कृते तु आत्वे षट्संज्ञा भवति इति ज्ञापयति। अन्यथा हि आत्वपक्षे लब्धावकाशः अष्टनः स्वरः परत्वाद् अनात्वपक्षे षट्स्वरेण बाध्येत, तदा तु दीर्घग्रहणस्य आवश्यकता एव न स्यात्। संदर्भे अस्मिन् *तत्त्वबोधिनी*कारः न कामपि आलोचनां कृतवान्।

---

600 पा. सू 7.1.84

601 पा. सू 7.1.55

602 नागेशः, ज्ञापकसंग्रहः, सम्पा. एन एस रामानुजताताचार्यः, पृ. 85

***काशिका*कारमतम्-** *काशिका*कारानुसारेण दीर्घग्रहणम् द्वयोः विषययोः ज्ञापकं भवति, प्रथमं तावद् अष्टनः आत्वविकल्पं ज्ञापयति, द्वितीयं तु कृतात्वस्य षट्संज्ञां ज्ञापयति। यदि च तथा न स्यात्, तदा आत्वपक्षे सावकाशः अष्टनः स्वरः परत्वाद् अनात्वपक्षे षट्स्वरेण बाधिष्यते। तदा तु दीर्घग्रहणस्य आवश्यकता एव नास्ति। अतः दीर्घग्रहणेन उपरि उक्तं विषयद्वयं ज्ञाप्यते इति बोद्धव्यम्।

***न्यास*कारमतम्-** *न्यास*कारकथनम् अस्ति यद् यदि च नित्यम् आत्वं स्यात् तदा दीर्घग्रहणं व्यर्थं स्यात् व्यावर्त्यं किमपि नास्तीति हेतोः। दीर्घग्रहणं तावत् कुत इति चेद् यत्र आत्वं नास्ति तत्र अयं स्वरः मा भूद् इत्येवमर्थं दीर्घग्रहणं क्रियते। पुनः कृतात्वस्य षट्संज्ञापि ज्ञाप्यते। यदि च कृतात्वस्य षट्संज्ञा न स्यात् तदा आत्वपक्षे षट्संज्ञायाम् असत्यां सावकाशः अष्टनः स्वरः, तत्रापि षट्स्वरः प्राप्नोति इति कृत्वा। पुनश्च यदि च दीर्घग्रहणं न क्रियेत, तदा तु अनवकाशत्वाद् यदा आत्वपक्षे अष्टनः स्वरः न भवति, तदा इतरस्मिन् अपि पक्षे स्यात्। तस्माद् तद् दूरीकरणाय दीर्घग्रहणं क्रियमाणम् अर्थवद् भवति।

**भाष्यकाराशयः-** अष्टसु प्रक्रमेषु ब्राह्मणः आदधीत इत्येवं प्रयोजनं ब्रुवाणेन महर्षिणा पतञ्जलिना पुनरुक्तं यद् अष्टनो दीर्घाद् इति सूत्रे दीर्घादिति नावश्यकम्। तर्हि अष्टसु प्रक्रमेषु ब्राह्मणः आदधीत इति कथं सिध्यति, तदा उच्यते, षट्स्वरः अत्र बाधकः भविष्यति। कथं तर्हि बाधकः इति चेत् नाप्राप्ते षट्स्वरे अष्टनः स्वरः आरभ्यते स यथैव दीर्घाद्बाधते, एवं ह्रस्वादपि बाधेत। किन्तु

अत्र शङ्का जायते यद् आत्वे विहिते षट्संज्ञायाः अभावाद् दीर्घात् षट्स्वरः न प्राप्नोति खलु। तदा *भाष्य*कारः वार्त्तिकं पठति- "अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थम्"[603] इति। अर्थात् आत्वे विहिते अपि षट्संज्ञा भवति इति ज्ञापनार्थम् अष्टनः दीर्घग्रहणं क्रियते। एतस्य ज्ञापनस्य च प्रयोजनम् आकारान्तस्य नुड् यथा स्यात्। किन्तु आत्वं तु नित्यमेव। तदपि न। यतो हि दीर्घग्रहणेन अन्यथा अनुपपत्त्या आत्वं विकल्पेन भवति इति ज्ञायते। अन्यथा तु आचार्यः पाणिनिः अष्टनः इत्येव ब्रूयात्।

वस्तुतः अनेकस्य अर्थस्य ज्ञापकम् इदं सूत्रम्। *उद्द्योत*कारः अपि समर्थयति- "अन्यथानुपपत्तिर्ह्यनेकस्याप्यर्थस्य ज्ञापिकेत्यर्थः"[604] इति।

**अत्रावधेयम्-** तस्य दीर्घग्रहणस्य ज्ञापकद्वयम् अस्ति। तत्तु विस्तरशः उपरि व्याख्यातमेव अस्ति। तत्र 'अष्टन आ विभक्तौ' इति शास्त्रेण विहितम् आत्वं नित्यम् अतः सप्तमीबहुवचने अष्टासु इति दीर्घघटितमेव रूपं भविष्यति, न तु 'अष्टसु' इति ह्रस्वघटितरूपम्। तर्हि ह्रस्वघटितरूपस्य यद् व्यावर्तकं दीर्घग्रहणं तद् व्यर्थं खलु। अस्यां शङ्काकायाम् उच्यते यद् अष्टनः विधीयमानम् आत्वं वैकल्पिकम् इति ज्ञापनाय दीर्घग्रहणम् कृतम् अस्ति सूत्रे। एवञ्च आत्वाभावपक्षे अष्टसु इति रूपमपि लभ्यते इति हेतोः तत्र 'अष्टनो दीर्घात्' इति शास्त्रेण

---

603 म. भा., ष. ख., सम्पा. दधिरामशर्मा, पृ. 161

604 तत्रैव

विहितस्य स्वरस्य अप्रवृत्त्यर्थं तस्मिन् सूत्रे दीर्घग्रहणं सार्थकम्। अत एव *ज्ञापकसंग्रह*कारः ब्रूते यत् "आत्वविकल्पस्य च ज्ञापकमेतत्"[605] इति।

एवञ्च एकमेव दीर्घग्रहणं वचनद्वयस्य ज्ञापकम् इति फलितम्। कारणं हि अन्यथानुपपत्त्या अनेकस्यापि अर्थस्य ज्ञापनं सम्भवति। तत्र चकारेणैव अनेकस्य अर्थस्य ज्ञापनं गम्यते।

एन. एस. रामानुजताताचार्यमतानुसारेण ज्ञायते यद् अष्टानाम् इत्यत्र अष्टन् आम् इति स्थिते आत्वापेक्षया अन्तरङ्गम् अस्ति षट्संज्ञा। षट्संज्ञायाम् कर्तव्यायां तु आत्वं बहिरङ्गत्वाद् असिद्धम् अस्ति, अतः नान्तत्वाद् एव ष्णान्ता षट् इति षट्संज्ञा सेत्स्यति। तन्निमित्तकनुटि 'नोपधायाः'[606] इति शास्त्रेण अकारस्य दीर्घे आकारे नलोपे च अष्टानाम् इति अभीष्टरूपस्य सिद्धिः भवति एव। एवञ्च आत्वे विहिते अपि षट्संज्ञा भवति इति ज्ञापनस्य तु तथा फलं नास्ति। अतः ज्ञापनफलाभावाद् 'भवत्यात्वे कृते षट्संज्ञा' इति न ज्ञापितव्यम्। तत्र विभाषा आत्वमिति ज्ञापनीयम्। तया वचनज्ञापकतया एव दीर्घग्रहणस्य प्रयोजनं भवति अष्टभिः, अष्टाभिः इत्येवं रूपद्वयस्य सिद्धिः।

---

605 ज्ञा. स., पृ. 85

606 पा. सू 6.4.7

एवञ्च “आत्वविकल्पस्य च ज्ञापकमेतत्”[607] इति *ज्ञापकसंग्रह*कारेण यद् उक्तं तत्र चकारः विकल्पार्थकः अतः तत्र चकारः वा इत्यर्थे प्रयुक्तः इति प्रतिभाति इत्येवं एन. एस. रामानुजताताचार्यस्य आशयः।

## 3.14. अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवति।

उपमानशब्दः संज्ञायामाद्युदात्तः भवति इत्यर्थकं ‘संज्ञायामुपमानम्’[608] इति सूत्रं व्यर्थं खलु। चञ्चा इत्यादौ तु प्रत्ययलक्षणेनैव एव स्वरस्य सिद्धिः भवेत्। तेन तत् शास्त्रं व्यर्थं सद् ‘अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवति’ इति कथं ज्ञापयति तदत्र आलोचयिष्यते।

***ज्ञापकसंग्रह*कारमतम्-** उपमानशब्दः संज्ञायामाद्युदात्तः भवति इति संज्ञायाम् आद्युदात्तत्वस्वरविधायकं ‘संज्ञायामुपमानम्’ इति सूत्रमिदं व्यर्थं खलु। यदि च तस्य प्रयोजनम् उच्यते- चञ्चेव चञ्चा इत्यादौ ‘संज्ञायां च’[609] इति शास्त्रेण कन् विधीयते। तत्र ‘लुम्मनुष्ये’[610] इति योगेन तस्य कनः लुप् भवति, तेन चञ्चा इति सिध्यति, तत्र आद्युदात्तत्वस्वरः यथा स्यात् तदर्थं तत् सूत्रम् आवश्यकम्। तन्न वक्तव्यम्, यतो हि लुप्तस्य कन्प्रत्ययस्य प्रत्ययलक्षणम् आश्रित्य नित्त्वाद्

---

607 ज्ञा. स., पृ. 85

608 पा. सू. 6.1.204

609 पा. सू. 5.3.79

610 पा. सू. 5.3.98

'ञ्नित्यादिर्नित्यम्'[611] इति शास्त्रेणैव आद्युदात्तत्वस्वरः भविष्यति। पुनश्च 'न लुमताङ्गस्य'[612] इति प्रत्ययलक्षणप्रतिषेधः अपि नास्ति। यतो हि आद्युदात्तत्वस्वरः अङ्गाधिकारे पठितः नास्ति।

एवञ्च चञ्चा इत्यादौ प्रत्ययलक्षणेनैव एव स्वरस्य सिद्धिः स्यात्। तेन 'संज्ञायामुपमानम्' इति शास्त्रं व्यर्थं भवति। तथा च तत् शास्त्रं व्यर्थं सद् अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञापयति। तथा च 'ञ्नित्यादिर्नित्यम्' इति स्वरस्य इत्संज्ञानिमित्तकत्वम् अस्ति इति हेतोः तस्मिन् कर्तव्ये कन्लुपः प्रत्ययलक्षणं न भवति। अतः चञ्चा इत्यस्य निदन्तत्वं न लभ्यते। अतः आद्युदात्तस्वरः यथा स्यात् तदर्थं 'संज्ञायामुपमानम्' इति सूत्रं सार्थकमिति स्वांशे चारितार्थ्यं फलितम्।

अस्य च ज्ञापितवचनस्य फलं तावत् गर्गाः इत्यादौ गर्गस्य गोत्रापत्यानि इत्यर्थे 'गर्गादिभ्यो यञ्'[613] इति सूत्रविहितस्य यञः 'यञञोश्च'[614] इति लुकि तस्य प्रत्ययलक्षणमाश्रित्य 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वस्वरस्य प्राप्तिरस्ति। परन्तु सः अनुबन्धनिमित्तके स्वरे प्रत्ययलक्षणं नेति ज्ञापनात् न सिध्यति।

**दीक्षिताशयः-** भट्टोजिदीक्षितः वृत्तौ लिखति यत् "उपमानशब्दः संज्ञायामाद्युदात्तः। चञ्चेव चञ्चा। कनोऽत्र लुप्। एतदेव ज्ञापयति क्वचित्स्वरविधौ

611 पा. सू. 6.1.198
612 पा. सू. 1.1.63
613 पा. सू. 4.1.105
614 पा. सू. 2.4.64

प्रत्ययलक्षणं नेति।"[615] यद्यपि *ज्ञापकसंग्रह*कार-दीक्षितयोः मध्ये ज्ञाप्यस्वरूपविषये किञ्चिद्वैषम्यं लभ्यते, तथापि तात्पर्यं तु समानेव। अस्य च ज्ञाप्यविषये *बालमनोरमा*कारः *तत्त्वबोधिनी*कारः च किमपि नावोचत्।

***काशिका*कार-*पदमञ्जरी*कार-*न्यास*कारमतम्-** *काशिका*कारनये यदि कन्लुप्ते अपि प्रत्ययलक्षणम् आश्रित्य 'ञ्नित्यादिर्नित्यम्' इति सूत्रेणैव आद्युदात्तत्वस्वरः सिद्धः भवति तर्हि एतदेव सूत्रं ज्ञापयति- "क्वचिदिह स्वरविधौ प्रत्ययलक्षणं न भवतीति।"[616] ज्ञापकस्य अभावदशायां तु "सप्तमीनिर्देशेऽपि प्रत्ययलक्षणप्रतिषेधः न स्यात्, स्वरविधौ सप्तम्यस्तदन्तसप्तम्यः इति ज्ञापनेन तदन्तस्य कार्यित्वात्"[617] इति *पदमञ्जरी*कारः। पुनः *न्यासे* अपि उच्यते- यदि हि क्वचित् स्वरविधौ प्रत्ययलक्षणं स्यात्, तर्हि कर्तव्यमेव इदं वचनम्। प्रत्ययलक्षणेन सिद्धत्वात्, कृतञ्च। अत एव एतद् ज्ञापयति यत् "प्रत्ययलक्षणमिह स्वरविधौ न भवतीति।"[618] क्वचिद्ग्रहणं कुतः इति चेत्, "क्वचित्तु भवतीति प्रदर्शनाय। तथा हि 'सर्वस्य सुपि' इति शास्त्रे उक्तम्- प्रत्ययलक्षणेनाप्ययं स्वरः इष्यते इति।"[619]

---

615 वै. सि. कौ., च. भा., पृ. 487
616 का. वृ., च. भा., पृ. 681
617 तत्रैव
618 तत्रैव
619 तत्रैव

तत्र *वैयाकरणसिद्धान्तकौमुद्याः तत्त्वबोधिनी*व्याख्यायामुच्यते- "प्रत्यय-लक्षणेनापि सर्वस्वरस्येष्यमाणत्वाद् इति।"[620]

**भाष्यकाराशयः-** तस्य च ज्ञाप्यस्य किं प्रयोजनम् इत्यत्र *भाष्य*कारः वदति- अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवति इति। गर्गाः, वत्साः, विदाः, उर्वाः इति ञ्नितीत्याद्युदात्तत्वं न भवति। किन्तु अस्मिन् पक्षे अपि दोषाः भवन्ति, पथिप्रियः-मथिप्रयः इत्यत्र पथिमथोः सर्वनामस्थाने इति विहितम् आद्युदात्तत्वं प्राप्नोति, इष्यते तु अन्तोदात्तत्वम्। तस्य च समाधानं कुर्वन् *भाष्य*कारः वदति यत्- "पथिमथोः सर्वनामस्थाने लुकि लुमता लुप्ते प्रत्ययलक्षणं न भवति"[621] इति न दोषः। अत्र च वार्त्तिकं पठितवान् *भाष्य*कारः- "उपमानस्याद्युदात्तवचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य"[622] (वा. 6317) इति।

**अत्रावधेयम्-** संज्ञायामुपमानम् इति शास्त्रेण क्वचिदिह स्वरिविधौ प्रत्ययलक्षणं न भवतीति ज्ञाप्यते, तेन क्वचित् तु स्वरविधौ प्रत्ययलक्षणं भवत्येव इति अवधेयम्। विस्तरस्तु उपरि प्रोक्तः।

---

620 वै. सि. कौ., च. भा., पृ. 487

621 म. भा., ष. ख., सम्पा. दधिरामशर्मा, पृ. 175

622 तत्रैव

## 3.15. स्वरविधौ सङ्घातः कार्यी भवति। स्वरविधौ सप्तम्यस्तदन्त-सप्तम्यो भवन्ति।

भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यादित्यर्थके 'भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति'[623] इति सूत्रे प्रत्ययपदेन कथं स्वरविधौ सङ्घातः कार्यी भवतीति आलोचयिष्यते। किञ्च प्रकृतसूत्रस्थितेन पूर्वपदेन कथं स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्ति इत्यपि अत्र स्पष्टीकरिष्यते।

**दीक्षितादीनामाशयः-** तस्य च शास्त्रस्य विषये दीक्षितेन कथितम्- "भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात्। योऽग्निहोत्रं जुहोति। ममत्तु नः परिज्मा। जजनत्। माता यद्वीरं दधनत्। जागर्षि त्वम्।"[624] जुहोतीत्यत्र प्रत्ययात्पूर्वस्य ओकारस्योदात्तत्वं विधेयमस्ति। यदि च एतत्सूत्रं न स्यात् तर्हि 'अनुदात्ते च'[625] इत्याद्युदात्तस्वरः स्यात्, तदुक्तं *भाष्यप्रदीपे* "अनुदात्ते च इत्याद्युदात्तत्वे प्राप्ते वचनम्। जागरामिति सौत्रनिर्देशः जागर्तीत्यादिप्रयोगस्थस्य कृतगुणस्यानुकरणं वा।"[626] "आद्युदात्तस्यापवादोऽयमिति"[627] *पदमञ्जर्याम्*।

---

623 पा. सू. 6.1.192

624 वै. सि. कौ., च. भा., पृ. 478

625 पा. सू. 6.1.190

626 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 171

627 का. वृ., च. भा., पृ. 673

**भाष्यमते भ्यादिग्रहणप्रयोजनम्-** किमस्ति भ्यादिग्रहणस्य प्रयोजनम् इति चेत् भ्यादिग्रहणाभावे पित्प्रत्ययाभावेऽनुदात्ते चेत्यस्य चारितार्थ्येन पिति प्रत्ययेऽस्यैव प्रवृत्तिरिति ददाति, दधाति इत्यादिषु दोषः। किन्तु एतदपि नास्ति प्रयोजनम् यतो हि अभ्यस्तस्वरोऽत्र बाधको भविष्यति किन्तु तदेकदेश्याक्षेपभाष्यम्। सिद्धान्ते च समाधानद्वयं दीयते *भाष्य*कारेण। प्रथमं तावत् 'अन्तत उभयं स्यात्'। अर्थात् विरोधात्समावेशाभावे पर्यायेणोभयं स्यात्। सर्वेषामभ्यस्तानां पितः लसार्वधातकात्पूर्वस्योदात्तत्वं स्यादिति प्रतिपादयितुं द्वितीयसमाधानं प्रदीयते *भाष्य*कारेण "अनवकाशाः खल्वपि विधयो बाधका भवन्ति, सावकाश-श्चाभ्यस्तस्वरः। कोऽवकाशः। मिमीते"[628] इति। मिमीते इत्यत्र धातोर्ङित्वात् 'तास्यानुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्निन्वङोः'[629] इति योगेन लसार्वधातुकस्यानुदात्तत्वे कृते 'अनुदात्ते च' इत्याद्युदात्तत्वम्।

**स्वरविधौ सङ्घातः कार्यी भवतीति ज्ञापनफलम्-** नन्वस्मिन् सूत्रे प्रत्ययग्रहणं किमर्थमिति चेद् प्रत्ययपदानुपादाने बिभयानि इत्यत्र नि इति पिति परे पूर्वस्य आट उदात्तत्वं स्यात्। इष्यते तु आटः पूर्वस्यैव तदर्थं प्रत्ययग्रहणम्। सति च तस्मिन् 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति यदागमपरिभाषयाट्सहितस्य प्रत्ययत्वात् प्रत्ययात्पूर्वस्योदात्तत्वमित्युक्ते आनि इत्यतः पूर्वस्य भकारोत्तरस्यैवोदात्तत्वं भविष्यतीत्येतदर्थं प्रत्ययग्रहणमिति चेद् तदपि न,

628 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 71

629 पा. सू. 6.1.184

प्रत्ययपदानुपादाने पिति पूर्वमुदात्तमित्यत्र पितः नेर्भक्तः आडपि पिद्ग्रहणेन ग्रहीष्यते। तथा चोक्तं *भाष्ये* "पिद्भक्तः पिद्ग्रहणेन ग्रहीष्यत इत्यानीत्यस्मिन् परे ततः पूर्वस्यैवोदात्तत्वमित्याट उदात्तत्वस्य अप्राप्तिः। एवञ्च प्रत्ययपद-ग्रहणवैयर्थ्यापत्तिः।"[630] तदा *भाष्य*कारः कथयति "एवं तर्हि सिद्धे सति यत्प्रत्ययग्रहणं करोति तज्ज्ञापयत्याचार्यः- स्वरविधौ सङ्घातः कार्यी भवतीति।" एवञ्च प्रत्ययग्रहणवैयर्थ्यापत्त्या प्रत्ययग्रहणेन "स्वरविधौ सङ्घातः कार्यी भवतीति" ज्ञापितम्। तेन आनि इत्यतः पूर्वस्य संघातस्योदात्तत्वं मा भूत्, परन्तु प्रत्ययात्पूर्वस्याच उदात्तत्वं यथा स्यादित्येतदर्थं प्रत्ययग्रहणम् इति स्वांशे चारितार्थ्यम्। अस्य च ज्ञापनफलम् अर्थात् अन्यत्र किमस्ति फलमस्येति ब्रूते *भाष्य*कारः- "चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेनेति यदुक्तं तदुपपन्नं भवतीति।"[631] शयानः, आसीनः इत्यादिषु शानच् प्रत्ययोऽस्ति। अस्य च शानच्प्रत्ययस्य चित्त्वात् 'चितः' इति योगेन चितोऽन्त उदात्तः प्रसक्तः। पुनरपि 'तास्यानुदात्तेन्ङिददु-पदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः' इति शास्त्रेणापि शानचः अनुदात्तोऽपि प्राप्तः। उभयोः प्राप्तौ 'विप्रतिषेधेन परं कार्यम्'[632] इति योगेन परत्वादनुदात्त एव भवतीति बोधकं "चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेनेति।"[633] वार्त्तिककारेणोक्तं तास्यनुदात्तेतादिसूत्रे। तदेतत् यदि स्वरविधौ संघातस्य कार्यित्वं स्यात्तदैव

630 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 71

631 तदेव, पृ. 172

632 पा. सू. 1.4.2

633 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 172

सङ्गच्छते। अन्यथा 'आदेः परस्य'[634] इति परिभाषया शानच आदेः आकारस्यानुदात्तत्वम्, अन्त्यस्य च 'चितः' इत्यन्तोदात्तत्वमिति विरोध एव नास्ति। कुतस्तर्हि विप्रतिषेधसूत्रसञ्चार उपपद्यते। संघातस्य स्वरकार्यित्वे तु आन इति संघातस्य अनुदात्तत्वं तदन्तस्य उदात्तत्वेन विरुध्येत इत्येवं विप्रतिषेधाद् वार्त्तिकवर्त्मना परत्वाद् अनुदात्त्वत्वमिति कथनुपपद्यते। *भाष्य*कारोऽपि समर्थयति तत्र- "वक्ष्यत्येतत् स्वरविधौ सङ्घातः कार्यी भवतीति।"[635]

**स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति ज्ञापनलाभः**- अस्ति खलु 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[636] इति परिभाषयैव पूर्वस्येति लाभः। यतो हि 'भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति' इति सूत्रे पिति इति सप्तम्यस्ति, तस्मात् सप्तमीश्रवणात् तया परिभाषया पूर्वस्येति लाभात् 'भीह्रीभृहुमदजनधन-दरिद्राजागरां प्रत्ययात्पूर्वं पिति' इति योगे पूर्वग्रहणस्य वैयर्थ्यापत्तिः। "एवं तर्हि सिद्धे सति यत्पूर्वग्रहणं करोति तज्ज्ञापयत्याचार्यः 'स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति'"।[637] इत्येवं पूर्वग्रहणं व्यर्थं सत् स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति ज्ञापयति।

संघातस्य प्रत्ययान्तस्य कार्यनिवृत्त्यर्थं पूर्वग्रहणं स्वरविधौ तदन्तस्य कार्यित्वं ज्ञापयतीत्यर्थः। तदन्तपक्षे चायमर्थः स्यात्- "भ्यादिविहितपिदन्तस्योदात्तं

---

634 पा. सू. 1.1.54

635 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 172

636 पा. सू. 1.1.66

637 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 173

भवतीति"[638] *भाष्यप्रदीपे*। एवञ्च तर्हि तदन्तपक्षे भीप्रभृतिभ्यो विहितो यः पित् तदन्तमुदात्तं भवतीति सूत्रार्थः फलति। तर्हि सर्वेषामचां पर्यायेणोदात्तत्वं स्यात्। इष्यते तु एकस्य प्रत्ययात्पूर्वस्यैव, इत्येतदर्थं पूर्वग्रहणमिति स्वांशे चारितार्थ्यम्। अस्ति च फलमन्यत्र। "'उपोत्तमं रिति' रिदन्तस्य। 'चङ्यन्यतरस्याम्' चङन्तस्य"[639] इति। 'उपोत्तमं रिति'[640] इत्यत्र रिति प्रत्यये परतः उपोत्तमस्योदात्तत्वं नेष्यते, किन्तु रित्प्रत्ययान्तस्य यदुपोत्तमं तस्योदात्तत्वमिष्यते। तथा चोक्तं *प्रदीपे* "अत्र हि रिति प्रत्यये परत उपोत्तमोदात्तप्रसङ्गः, रित्प्रत्ययान्तस्य चोपोत्तमोदात्तत्वमिष्यत" इति।[641]

अत्र पुनः काचित् शङ्कोत्पद्यते- स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति यदि ज्ञाप्यते तर्हि 'चतुरः शसि'[642] इति शसन्तस्यापि प्राप्नोति इति चेत् शस्ग्रहणसामर्थ्यात् तन्न भविष्यति। "यदि 'चतुरः शसि' शस उदात्तत्वमिष्टं स्यात्, ततः 'ऊडिदम्' इत्यस्यानन्तरं 'चतुरश्च' इति ब्रूयात् तत्र असर्वनामस्थानग्रहणस्य अनुवृत्त्या 'षट्त्रिचतुर्भ्यो हलादिः'[643] इति हलादेरुदात्तत्वविधानाच्च शस एव

---

638 तदेव, पृ. 172

639 तत्रैव

640 पा. सू. 6.1.217

641 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 173

642 पा. सू. 6.1.167

643 पा. सू. 6.1.179

भविष्यतीति"[644] *पदमञ्जर्या*म्। 'षट्त्रि-' इत्यस्य तदन्तेऽप्रवृत्तिरिति वार्त्तिकमते 'चतुरः शसि' इत्यस्यापि विहितविशेषणाश्रयेण तदन्तेऽप्रवृत्तिः। *भाष्य*मते तूभयोरपि तदन्ते प्रवृत्तिरिति न दोषः। वस्तुतः चतुर्भ्यश्चेति *न्यासे* परमचतुरौ परमचतुरोरित्यादौ दोषस्तदवस्थ एव। अत एवाह षट्त्रीत्यस्येति। वार्त्तिकमते तदन्ते उभयोरप्रवृत्तिः। *भाष्य*मते च प्रवृत्तिरिति न दोषः इति भावः।

**भाष्यकारादिमते पिद्ग्रहणप्रयोजनम्-** किमस्ति तावत् पिद्ग्रहणस्य प्रयोजनम्। दरद्रतीति *काशिकावृत्तौ*। *भाष्ये* तावत् प्रथमतयोच्यते जाग्रतीत्यत्र मा भूत् प्रत्ययात् पूर्वमुदात्तत्वम्। किन्तु तदपि प्रयोजनं नास्ति 'अभ्यस्तानामादिः'[645] इत्यनेन पूर्वस्योदात्तत्वं भविष्यति। *प्रदीपे* उच्यते- अत्र स्वरभेदः स्यात्। अनेन पूर्वस्य ऋकारस्य उदात्तत्वं स्यात्। परम् 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य'[646] इति स्वरितस्वरापत्तिः। 'अभ्यस्तानामादिः' इत्यनेन उदात्तत्वे पदमाद्युदात्तत्वं भवति। एवं तर्हि नित्यत्वात् पूर्वं यणादेशे विहिते न भवति स्वरभेदः। पुनरपि स्वरभिन्नस्य प्राप्नुवन् यणादेशोऽप्यनित्यः। एवं तर्ह्येतत् साधु नास्ति स्पष्टोदाहरणान्तरसद्भावात्। तर्हि दरिद्रतीति प्रयोजनम्। अत्र इकारस्योदात्तत्वं मा भूत्, आद्युदात्तत्वमेव यथा स्यादित्येतदर्थं पिद्ग्रहणमित्याशयः। न चाकारेण

644 का. वृ., च. भा., पृ. 673

645 पा. सू. 6.1.189

646 पा. सू. 8.1.4

व्यवहितत्वान्न भविष्यतीति वाच्यम्। 'श्नाभ्यस्तयोरातः'[647] इति परत्वाल्लोपे विहिते नास्ति व्यवधानम्। नापि स्थानिवद्भावाद् व्यवधानम्, तस्य च स्थानिवद्भावस्य प्रतिषेधात् 'स्वरविधिं प्रति न स्थानिवद्भवति'।[648]

**अत्रावधेयम्-** *ज्ञापकसंग्रहमहाभाष्यकाशिका*दिग्रन्थानुशीलनेन इदं स्पष्टं यत् सर्वत्रैव स्वरविधौ सङ्घातः कार्यी भवति इति ज्ञाप्यम्, पुनः स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति ज्ञाप्यञ्च आलोचितम् अस्ति। तत्र *महाभाष्ये* विषयः अयं बहुस्पष्टीकृतः। *ज्ञापकसंग्रहे* प्रोक्तम् इदं ज्ञाप्यद्वयं तावत् *महभाष्य*सम्मतम् अस्ति इत्यत्र नास्ति संदेहलेशः। अत्र च प्रकृतसूत्रस्थितभ्यादिप्रयोजनं पुनश्च प्रकृतसूत्रस्थितपित्प्रयोजनं सप्रसङ्गम् आलोचितम्। तदेतत्सूत्रार्थस्य स्पष्टज्ञानायोपकारकं स्यात्।

## 3.16. उपसंहृतिः

अस्मिन्नध्याये ये तावद् विषयाः उपरि प्रोक्ताः तेषां सारः क्रमशः प्रस्तूयते अत्र। प्रकृते अध्याये बहुविधशङ्कायाः निरसनं दर्शितम्। येषाम् अध्ययनेन सूत्रार्थस्य स्पष्टं धारणा स्यादिति आशासे।

लुक् श्लुः, लुप् इत्येतैः विशिष्टशब्दैः विधीयमानं प्रत्ययादर्शनं क्रमशः लुक्संज्ञा, श्लुसंज्ञा लुप्संज्ञा च भवति। पुनः प्रसक्तस्य अदर्शनं लोपसंज्ञं भवति। अत्र तावत् प्रश्नः एतेषु केषां सर्वादेशत्वं, केषां वा अन्त्यादेशत्वम्। अस्याः शङ्कायाः

647 पा. सू. 6.4.112

648 म. भा., प. ख., सम्पा. भार्गवशास्त्री, पृ. 173

समाधानम् अत्र विहितम् अस्ति। लोपस्य अन्त्यादेशत्वम्, लुगादीनाञ्च सर्वादेशत्वम्।

'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' इति सूत्रे बहुवचनस्येति पदेन सर्वो द्वन्द्वो विभाषयैकवद्भवति इति सोदाहरणं प्रदर्शितम्।

चरेष्टः इति सूत्रेण विधीयमानः टप्रत्ययः कर्मणि उपपदे भवति अथवा अधिकरणे उपपदे भवति इत्यस्य समाधानं प्रदत्तम् अधिकरणे उपपदे एव चरधातोः टप्रत्ययः भवति 'भिक्षासेनादायेषु च' इति सूत्रे भिक्षाग्रहणं व्यर्थं भूय तज्ज्ञापयति।

'लट् स्मे' इति शास्त्रं परोक्षानद्यतनविषयम् अस्ति न वेति आलोचितम्।

लडादिलकाराणां लस्य इत्संज्ञा भवति न वेति आलोचना विहिता। तत्रोच्यते णलः लित्करणात् लकाराणां लस्य इत्त्वं न भवति।

'टित आत्मनेपदानां टेरे' इति सूत्रेण टित्-लकारस्य आदेशस्य टेः एत्वं विधीयते। तच्च एत्वं सेवमान, पचमान, लभमान इत्यादिषु आनस्य टेरपि प्राप्नुयात् शानचः आत्मनेपदत्वादिति शङ्कायाः निरसनं विहितम्।

'तत्र तस्येव' इति शास्त्रेण तत्रेव इति तस्येव इति चार्थे सप्तम्यन्तात् षष्ठ्यन्तात् च वतिप्रत्ययः विधीयते। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः, चैत्रस्येव चैत्रवत् मैत्रस्य गावः इत्यादिकमुदाहरणम्। अत्र सप्तम्यन्ताद् इवार्थे वतिप्रत्ययविधानस्य सङ्गतिः दर्शिता।

## *महाभाष्य*सम्मतज्ञापकविमर्शः

'सिध्मादिभ्यश्च' इत्यस्मिन् सूत्रे अनुवृत्तम् अन्यतरस्यांग्रहणं समुच्चयार्थकम् अस्ति नवेति आलोचना कृता।

'एकगोपूर्वाट्ठञ् नित्यम्' इति शास्त्रे नित्यपदेन पूर्वसूत्रे अन्यतरस्यांग्रहणम् अनुवर्तते इति ज्ञापितम्।

कथं वा कारकसंज्ञायां तरतमयोगः न भवति इति 'साधकतमं करणम्' शास्त्रे तमब्ग्रहणव्याख्यानेन प्रदर्शितम्।

'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति शास्त्रेण फादीनां प्रत्ययादीनाम् आयन्नादयः आदेशाः विधीयन्ते, किन्तु ते आदेशाः किम् उपदेशे भवन्ति इति शङ्कायाः समाधानं विहितम्।

'अष्टनो दीर्घात्' इति दीर्घग्रहणं षट्संज्ञायां ज्ञापकम् आकारान्तस्य नुडर्थम् आत्वविकल्पस्य च ज्ञापकमेतत् सर्वम् उपरि आलोचितम्।

'चञ्चा' इत्यादौ प्रत्ययलक्षणेनैव एव स्वरस्य सिद्धिः स्यात्। तेन 'संज्ञायामुपमानम्' इति शास्त्रं व्यर्थं सद् अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञापयति इत्येतत् सविस्तरम् आलोचितम्।

'भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति' इति सूत्रे प्रत्ययपदेन कथं स्वरविधौ सङ्घातः कार्यी भवतीति आलोचितम्। पुनः प्रकृतसूत्रस्थितेन पूर्वपदेन कथं स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्ति इत्यपि अत्र स्पष्टीकृतम्।

## तृतीयोऽध्यायः

शोधप्रबन्धस्यास्य 'महाभाष्यसम्मतज्ञापकविमर्शः' इत्याख्ये अस्मिन्नध्याये येषां तावद् ज्ञाप्यानां आलोचनं विहितम् अस्ति तेषां *महाभाष्य*सम्मतत्वमिति उपरि प्रदर्शितम् अस्ति। एतद्विहाय कारणान्तरं तावद्- *परिभाषेन्दुशेखर*स्य प्रारम्भे '*भाष्य*वार्त्तिकयोरुपनिबद्धानि यानि परिभाषाणि' इति ब्रुवाणस्य नागेशस्य भाष्यानुक्तानि वार्त्तिकानुक्तानि च केनापि आत्मबुद्ध्या ज्ञापकसिद्धत्वेन कल्पितानि वचनानि नोपादेयानि इति सिद्धान्तः।

तथा च नागेशानुसारेण 'नञ्घटितमनित्यम्' इति परिभाषा नास्ति यतो हि इयं परिभाषा भाष्ये न दृश्यते। यदि च उच्यते भाष्ये यथैव अनुल्लिखितसूत्राणाम् अस्तित्वप्रामाण्यं स्वीक्रियते तथैव एतासां परिभाषाणां अस्तित्वप्रामाण्यं स्वीकरणे का क्षतिः। तदा नागेशः कथयति- "भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात्। भाष्याविचारितप्रयोजनानां सौत्राक्षराणां पारायणादावदृष्टमात्रार्थकत्वकल्पनाया एवौचित्यात्" इति।[649]

एवमेतेन *ज्ञापकसंग्रह*स्य नागेशकर्तृत्वं *ज्ञापकसंग्रहो*क्तज्ञाप्यानां च *महाभाष्य*सम्मतत्वं सिध्यति। यद्यपि एतद्दिशा *ज्ञापकसंग्रह*कर्तृत्वं द्वितीयाध्याये आलोचितम्। नागेशभट्टः *परिभाषेन्दुशेखरे* यद्यपि परिभाषाणां साक्षात्सर्वत्रैव प्रायः '*भाष्ये* स्पष्टमेषा'[650], 'सूत्रे *भाष्ये*'[651], '*भाष्ये* ध्वनितैषा'[652], 'सूत्रे *भाष्ये*

---

649 प. भा. शे., पृ. 385

650 तदेव, पृ. 65, 113., 145

651 तदेव, पृ. 31, 33

स्फुटमेतत्'[653] इत्याद्येवंरूपेण *महाभाष्य*सम्मतत्वं दृढतया प्रस्तौति। तादृशप्रयोगस्तु *ज्ञापकसग्रहे* तथा न दृश्यते इत्यपि विज्ञेयम्।

कानिचन ज्ञाप्यानि *ज्ञापकसंग्रहे* प्रोक्तानि सन्ति येषां ज्ञाप्यानां परिभाषारूपत्वाद् अत्र अस्मिन्नध्याये आलोचना नैव विहिता। तेषां केषाञ्चित् ज्ञाप्यानां परिभाषात्वात् *परिभाषेन्दुशेखरे* उल्लेखे सति *ज्ञापकसंग्रहे* पुनरुल्लेखः कुत इति तु चिन्त्यम्। तेषां च ज्ञाप्यानां सूचिः शोधप्रबन्धस्य द्वितीयाध्याये प्रदत्ता। एवं शोधप्रबन्धस्यास्य तृतीयाध्यायः समाप्तिं याति इति शिवम्।

652 तदेव, पृ. 38

653 तदेव, पृ. 95

# चतुर्थोऽध्यायः

## *महाभाष्यज्ञापकसंग्रह*भिन्नग्रन्थादिलब्धज्ञापकानां पर्यालोचनम्

### 4.1. उपोद्घातः

इतः पूर्वस्मिन्नध्याये '*महाभाष्य*सम्मतज्ञापकविमर्शः' प्रस्तुतः। वस्तुतः पाणिनीयसूत्रज्ञाप्यविषये *महाभाष्ये* बहुविधविषयाः आलोचिताः। ततः परम् अपि केचन ज्ञाप्यविषयाः तादृशाः सन्ति येषाम् आलोचनं *महाभाष्य*कारेण विहितं नास्ति, यद्यपि तेषां केषाञ्चित् सूत्राणां चर्चा विहिता अस्ति *महाभाष्ये*। एवञ्च *महाभाष्य*कारेण अस्पृष्टाः तादृशाः ज्ञाप्यविषयाः तदुत्तरकाले शाब्दिकचक्रचक्रवर्तिना वैयाकरणशिरोमणिना श्रीमद्भट्टोजिदीक्षितेन *वैयाकरणसिद्धान्तकौमुद्यां* चर्चिताः। पुनरपि कानिचिज्ज्ञाप्यानि श्रीवासुदेवदीक्षितविदुषा विरचितायां *वैयाकरणसिद्धान्त*व्याख्यायां *बालमनोरमा*-ख्यटीकायां प्रस्तुतानि। पुनश्च अन्यानि कानिचिज्ज्ञाप्यानि श्रीज्ञानेन्द्र-सरस्वतीकृतायां *वैयाकरणसिद्धान्तकौमुदी*व्याख्यायां *तत्त्वबोधिन्याख्य*व्याख्यायां लभ्यन्ते। यानि ज्ञापितवचनानि नागेशमहाभागेन *परिभाषेन्दुशेखरे* परिभाषारूपेण पठिताः अथवा सीरदेवमहाशयेन *परिभाषावृत्तौ* परिभाषारूपेण पठिताः सन्ति, तेषां ज्ञाप्यानां चर्चा अस्मिन्नध्याये नैव क्रियते। '*महाभाष्यज्ञापकसंग्रह*भिन्नग्रन्थादिलब्धज्ञापकानां पर्यालोचनम्' इत्यस्मिन्नध्याये चितानि कानिचन ज्ञापितवचनानि व्याकरणप्रयोगोपयोगीनि अत्र आलोच्यन्ते *वैयाकरण-सिद्धान्तकौमुदी*- *बालमनोरमा*टीका- *तत्त्वबोधिनी*टीका- *काशिकावृत्ति*-*न्यास*टीका-

## *महाभाष्यज्ञापकसंग्रह*भिन्नग्रन्थादिलब्धज्ञापकानां पर्यालोचनम्

*पदमञ्जरी*टीका- *महाभाष्य- भाष्यप्रदीप*टीका- *प्रदीपोद्द्योत*टीकानुसारेण। *ज्ञापकसंग्रह*व्याख्याकार-रामानुजताताचार्यकथनमपि तत्र तत्र वक्ष्यते। पाणिनिसूत्र-पठितॄणां यथा व्याकरणप्रयोगकौशलम् एधेत तद्धिया अत्र ज्ञाप्यानां संग्रहं कृत्वा चर्चा विधास्यते।

सामान्येन केषाञ्चित् सूत्राणाम् अर्थं वयं जानीमः, किन्तु कदाचित् तस्य सर्वत्र प्रयोगः कर्तुं न शक्यते। कदाचित् सूत्रार्थस्य स्पष्टम् अवधारणा नैव स्यात्। अतः लक्ष्येषु सूत्रार्थस्य संगतिः यथा स्यात् तदर्थम् अत्र प्रयत्नः क्रियते। यथा सर्वशब्दस्य सर्वनामत्वं सुविदितमेव। किन्तु परमसर्वादिशब्दानां सर्वनामत्वम् अस्ति न वेति प्रश्नः उदेति। तस्याः शङ्कायाः निरसनार्थम् अत्र चर्चा विहिता अस्ति। यथासंख्यमनुदेशः समानाम् इति शास्त्रे समशब्दार्थयोः तुल्यसर्वयोः कतरः अर्थः ग्राह्यः इत्यपि ज्ञास्यते। वयं जानीमः समासः विकल्पेन भवति कुत्रचिच्च नित्यमेव भवति। परन्तु कियत्पर्यन्तं नित्यमिति, कियत्पर्यन्तञ्च वैकल्पिकमित्यत्र आलोचयिष्यते। तिलमिश्राः इतिवत् गुडसंमिश्राः इत्यादीनामपि साधुत्वं प्रदर्शयिष्यते। पाणिनीयसूत्रेषु लिङ्गनिर्देशः विवक्षितः उत अविवक्षितः इत्यस्मिन् विषये चर्चा भविष्यति। मध्याह्नः इत्यादौ समासः साधुः अस्ति न वेति चर्चा करिष्यते। अर्थगौरवम्, बुद्धिमान्द्यम् इत्यादेः साधुत्वमपि प्रदर्शयिष्यते। समानाधिकरणपदः बहुव्रीहिः इति तु अस्माभिः ज्ञायते एव। किन्तु व्यधिकरणपदोऽपि बहुव्रीहिः भवति न वेति विषयः अत्र आलोचयिष्यते। ‘अधीगर्थ’

इति सूत्रे आवश्यकता अस्ति किम् अधिशब्दोच्चारणस्य, तद्विषये अत्र शास्त्रचर्चा करिष्यते। पचादेः आकृतिगणत्वं ज्ञापकेन साधयिष्यते। 'मतिबुद्धिपूजार्थेभ्यश्च' इति शास्त्रेण विशेषतया इच्छा, बुद्धिः, ज्ञानम् इत्येतदर्थकेभ्यः धातुभ्यः वर्तमानकालार्थे क्तप्रत्ययः विधीयते। अयं क्तप्रत्ययः तर्हि तदर्थकेभ्यः धातुभ्यः भूतकालार्थे सामान्यतया विहितस्य 'निष्ठा' इति क्तप्रत्ययस्य अपवादः स्यात् न वेति चर्चा अत्र प्रदर्शयिष्यते। स्त्रीप्रत्ययेषु तदन्तविधिः भवतीति ज्ञास्यते। क्वचित्सामान्योक्तावपि विशेष एव गृह्यत इति ज्ञापनं ज्ञास्यते। 'निजां त्रयाणाम्' इति निपातनादेव त्रयादेशे सिद्धे त्रेस्त्रयः इति सूत्रेण अबाधकान्यपि निपातनानि भवन्ति इति ज्ञाप्यते। तच्च विशदेन ज्ञास्यते। 'अवस्था', 'संस्था' इत्यादीनाम् अङन्तानां शब्दानां साधुत्वं प्रदर्शयिष्यते। पुष्ययुक्ता पोर्णमासी पौषीति कथं सिध्यति तत्प्रदर्शयिष्यते। संपूर्वकस्य परिपूर्वकस्य च करोतेः भूषणार्थे संघातार्थे च च सुप्रत्ययस्य विधानं भवति 'संपरिभ्यां करोतौ भूषणे' 'समवाये च' इति सूत्राभ्याम्। न केवलं तयोः अर्थयोः एव सुड्विधीयते, अपि तु अर्थान्तरेऽपि सुड्विधीयते, तद्यथा 'संस्कृतं भक्षाः' इत्यस्मिन् शास्त्रे उदाहरणं प्रदीयते भट्टोजिदीक्षितेन- "अष्टसु कपालेषु संस्कृतः पुरोडाशः" इति। अत्र च सुट् इति दृश्यते। एतत्समर्थयितुं दीक्षितः 'संपरिभ्यां करोतौ' इत्यस्मिन् योगे ब्रूते- "संपूर्वस्य क्वचिदभूषणेऽपि सुट्।"[654] इष्णुज्ग्रहणे खिष्णुचो द्व्यनुबन्धकस्यापि ग्रहणम् इकारादेर्विधान-

654 वै. सि. कौ., तृ. भा., पृ. 375

सामर्थ्यादिति ज्ञास्यते। कथञ्च वुञ्छणादिषु ठचश्चित्त्वेन इकादेशोऽ न्तरङ्गेभ्यो बलीयान् इति प्रदर्शयिष्यते। पाणिनीयसूत्रेण विधीयमानं कार्यं छन्दसि विकल्पेन भवतीति ज्ञास्यते। 'इको यणचि' इत्यत्र ङमुट् आगमः कुतः न इति प्रश्नस्य उत्तरेण सह 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति सूत्रस्य लोके यद्यपि नित्यत्वम् तथापि वेदे सूत्रे वा वैकल्पिकत्वं सोदाहरणं प्रदर्शयिष्यते। इत्येवम् एते विषयाः '*महाभाष्य*दिशा *ज्ञापकसंग्रह*स्य समीक्षा' इति शीर्षकोपेतस्य मम शोधप्रबन्धस्य '*महाभाष्यज्ञापकसंग्रह*भिन्नग्रन्थादिलब्धज्ञापकानां पर्यालोचनम्' इत्याख्ये अस्मिन् चतुर्थाध्याये प्रस्तुताः भविष्यन्ति। शोधप्रबन्धभारभिया चिता एव ज्ञाप्यविषयाः आलोचयिष्यन्ते। अस्मिन्नध्याये सर्वत्रैव तत्तज्ज्ञापितवचनम् आदौ लिखित्वा एव ततः तदालोचनाः करिष्यन्ते। यद्यपि सर्वत्र ज्ञापकसूत्रस्य यथा चत्वारः अंशाः भवन्ति आदौ वैयर्थ्यं, व्यर्थं सद् ज्ञापकं, स्वांशे चारितार्थ्यम्, फलमन्यत्र इत्येवंरूपाः न दृश्यन्ते। किन्तु तत्तदाचार्यशङ्कासमाधानमत्र प्रदर्शयिष्यते। एवञ्च क्रमशः ते विषयाः अधुना प्रस्तूयन्ते-

## 4.2. तदन्तस्यापीयं (सर्वनाम) संज्ञा स्यात्।

ननु 'सर्वादीनि सर्वनामानि'[655] इति शास्त्रेण या सर्वनामसंज्ञा कथ्यते सा सर्वादिगणपठितानां सर्व विश्व प्रभृतीनाम् एव स्यात्।

655 पा. सू. 1.1.27

# चतुर्थोऽध्यायः

एवञ्च परमसर्वादिशब्दानां कथं सर्वनामसंज्ञा स्यादिति प्रश्नः उदेति। यतो हि तेषां शब्दानां सर्वादिसमुदाये पाठः नास्ति। एवं यदि सर्वनामसंज्ञा न स्यात् तदा सर्वनामसंज्ञानिमित्तकाः त्रतसिलादयः प्रत्ययाः अपि ततो न स्युः इत्येवम् आशङ्कां हृदि निधाय दीक्षितः ब्रूते- “तदन्तस्यापीयं संज्ञा ‘द्वन्द्वे च’[656] इति ज्ञापकात्”[657] इति। तथा च ‘द्वन्द्वे च’ इति शास्त्रेण वर्णाश्रमेतराणाम् इत्यादौ सर्वनामशब्दान्तसमुदायरूपस्य द्वन्द्वसमासस्य सर्वनामसंज्ञायाः निषेधः क्रियते। यदि च केवलानामेव सर्वादिगणपठितानां सर्वनामत्वं न तु तदन्तानामपि, तर्हि तत्प्रतिषेधः वैयर्थ्यं याति। अतः तदन्तस्यापीयं संज्ञेति विज्ञायत इत्यर्थः। अर्थात् इतरशब्दस्य गणे पाठः अस्ति चेदपि तदन्तस्य गणे तु पाठः नास्ति इति सर्वनामसंज्ञाया अप्रसक्तिः तेन प्रतिषेधः निरर्थकः स्यात्। तस्मात् प्रतिषेधद्वारा सर्वाद्यन्तस्य अपि सर्वनामसंज्ञा भवतीति ज्ञाप्यते। एवञ्च परमसर्वादिशब्दानां सर्वनामसंज्ञा सिध्यतीति स्वांशे चारितार्थ्यम्। ननु परमसर्वादिशब्देषु गणपठितानां केवलानाम् एव सर्वादिशब्दानामस्तु सर्वनामत्वं, मास्तु तदन्तानामपि। ‘सर्वनाम्नः स्मै’[658] इत्यादिसर्वनामकार्याणामङ्गाधिकारस्थत्वेन ‘पदाङ्गाधिकारे तस्य च तदन्तस्य च’[659] ति परिभाषया परमसर्वस्मै इत्यादिषु सिद्धेरित्यत आह दीक्षितेन- “तेन परमसर्वत्र इति

656 पा. सू. 1.1.31

657 वै. सि. कौ., प्र. भा., पृ. 208

658 पा. सू. 7.1.14

659 प. भ. शे., पृ. 122

त्रल् परमभवकान् इत्यत्र अकच्च सिध्यति।"[660] नन्वङ्गाधिकारे तदन्तविधिं विनैव परमसर्वस्मा इत्यादौ स्मायादिसिद्धेस्तदन्तसंज्ञायाः किं फलम् इत्येवं प्रश्नं पृच्छति *तत्त्वबोधिनी*कारः। अत्र तेन परमसर्वत्र इत्यत्र त्रल्, परमसर्वतः इत्यत्र तसिल्, परमभवकान् इत्यत्र अकच्च सिध्यतीति भावः। "यद्यपि परमसर्वक इत्यत्र अकच्सिद्धिरपि प्रयोजनतया वक्तुं शक्या, तथापि कप्रत्ययेनेष्ट-सिद्धिर्भवितुमर्हतीत्याशयेन परमभवकान् इत्यत्र अकच् प्रयोजनत्वेन उक्त इति मन्तव्यम्।"[661] दीक्षितवचनमेव संगृह्य एन. एस. रामानुजताताचार्यः अपि ब्रूते- " 'सर्वादीनि' (सू. 1-1-27) तदन्तस्यापीयं संज्ञा। 'द्वन्द्वे च' (सू. 1-1-31) इति ज्ञापकात्।"[662] *प्रदीपोद्द्योत*कारः नागेशः कथयति- "नन्वतिसर्वस्य गणे पाठाभावात्संज्ञासूत्रे विशेष्यासन्निधानेन तदन्तविधेरभावाच्च कथमत्र प्राप्तिरित आह- प्रयोजनमिति। ('प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति तदन्तविधिः 'परमसर्वस्मै' इत्याद्यर्थम् आश्रितः)। शब्दरूपं विशेष्यमादाय तदन्तविधिरिति भावः।"[663] अपरः कश्चिद्विषयः अपि तेन उल्लिखितः- "एतत्तदन्तविधिफलत्वेन 'परमसः' इत्यस्योपन्यासः क्वचिद्दृश्यते स चिन्त्यः, त्यदादीनाम इत्यादावङ्ग-

---

660 वै. सि. कौ., प्र. भा., पृ. 208

661 ज्ञा. स., पृ. 177

662 तत्रैव

663 म. भा., प्र. ख., सम्पा. भार्गवशास्त्री, पृ. 223

विशेषणत्वमूलकतदन्तविधिना सिद्धत्वात्। स्मैभावे तु विहितविशेषणमिति बोध्यम्।"[664]

**इदमत्रावधेयम्-** प्रातिपदिकाद् इत्यनुवृत्तेः सर्वनाम्नः तद्विशेषणत्वे तदन्तविधिः न भवेद् इति तु न वक्तव्यम्। कारणं हि 'समासप्रत्ययविधौ प्रतिषेधः' भवति। तदन्तस्यापि संज्ञा भवति इति हेतोः परमसर्वत्र इत्यत्र त्रल्, परमभवकान् इत्यत्र अकच् सिध्यति। 'द्वन्द्वे च' इति शास्त्रं तु *महाभाष्य*कारेण व्याख्यातं नास्ति।

## 4.3. समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते।

अस्ति तत्र सर्वादिगणे समशब्दस्य पाठः। तस्य च समशब्दस्य यथा सर्व इत्यर्थः अस्ति तथैव तुल्यः इत्यपि अर्थोऽस्ति । तत्र तुल्यवाचकसमशब्दस्य अपि सर्वनामता स्यात्, यतो हि सर्वादिगणे समशब्दस्य विशेषः अर्थः प्रोक्तः नास्ति इति आशङ्कायाम् एन. एस. रामानुजताताचार्येण उच्यते- "समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते। 'यथासंख्यमनुदेशः समानाम्' (सू. 1-3-10) इति ज्ञापकाद् इत्युच्यते।"[665]

यदि च तुल्यार्थकस्य समशब्दस्य अपि सर्वनामत्वं स्यात् तदा पाणिनिना 'समेषाम्' इति तुल्यार्थे वक्तव्यं स्यात्। कारणं हि यदि तस्य सर्वनामसंज्ञा

---

664 तत्रैव

665 ज्ञा. स., पृ. 177

स्यात् तर्हि 'आमि सर्वनाम्नः सुट्'[666] इति सुट् प्राप्नुयात्। किन्तु तथा विहितं नास्तीति तुल्यपर्यायस्य समशब्दस्य सर्वनामसंज्ञा नास्तीति ज्ञाप्यते। अत एव 'समानाम्' इति सङ्गच्छते। अत एव *बालमनोरमा*कारः कथयति- "साम्यमिह संख्यातो विवक्षितम्। समानामिति यदि कर्मणि षष्ठी....इति।"[667] एवञ्च तन्नये यथासंख्यादिसूत्रे समशब्दार्थः साम्यमिति। अपि च तस्य समशब्दस्य सर्वनामसंज्ञा नास्ति। *तत्त्वबोधिनी*कारः अपि ब्रूते- "समानामिति संबन्धे षष्ठीति।"[668] एवं तन्नये अपि तस्य समशब्दस्य सर्वनामसंज्ञा नास्ति। यदि च सर्वनामत्वं स्यात् तदा तु सर्वेषामिति प्रयोगं कुर्यात्।

**इदमत्रावधेयम्-** *काशिकायाम्* अयं प्रश्नः पृच्छ्यते यत्- " 'यथासंख्यमनुदेशः समानाम्', समे देशे यजेतेति। समस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञेष्यते, न सर्वत्र।"[669] अर्थात् यदि च समशब्दस्य सर्वनामसंज्ञा भवति तर्हि 'आमि सर्वनाम्नः सुट्' इति सुटि 'समेषाम्' इति भवेत्, तर्हि कथं 'समानाम्' इति प्रयोगः सम्भवति। तदा तु सप्तम्याः एकवचने स्मिन्प्रयोगे समस्मिन्निति स्यात्, तर्हि कथं 'समे देशे यजेत' इति संगच्छते। न सर्वत्रार्थे वर्तमानस्य इति तु *न्यास*कारस्य आशयः। अर्थात् 'सर्वेषां नामानि सर्वनामानि' इति अन्वर्थसंज्ञकरणेन तल्लभ्यते। अत्र तु स एव समशब्दः सर्वेषां नाम भवति यः सर्वशब्दपर्यायः। प्रकृते

---

666 पा. सू. 7.1.52

667 वै. सि. कौ., प्र. भा., पृ. 132

668 तदेव, पृ. 133

669 का. वृ., प्र. भा., 133 -135

अनयोः अर्थयोः प्रयोगस्थले तु समशब्दः सर्वपर्यायः नास्ति। एवञ्च 'समानाम्' इति शब्दः तुल्यार्थे वर्तते। एवञ्च अन्वर्थसंज्ञाकरणेन संज्ञोपसर्जनीभूतानां सर्वनामसंज्ञा न भवति।

*महाभाष्य*कारेण तु अस्मिन् विषये 'यथासंख्यमनुदेशः समानाम्'[670] इत्यस्मिन् शास्त्रे किमपि उक्तं नास्ति।

एवञ्च सर्वादिगणे यः समशब्दः पठितः सः सर्वपर्यायः न तु तुल्यपर्यायः इति सिद्धान्तः।

## 4.4. एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम्

अष्टाध्याय्यां 'प्राक्कडारात्समासः'[671], 'सह सुपा'[672], 'अव्ययीभावः'[673], 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्य-यौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु'[674], 'यथासादृश्ये'[675], 'यावदवधारणे'[676], 'सुप्प्रतिना मात्रार्थे'[677], 'अक्षशलाकासंख्याः परिणा'[678], 'विभाषा'[679] इत्येवं सूत्रक्रमः

670 पा. सू. 1.3.10
671 पा. सू. 2.1.3
672 पा. सू. 2.1.4
673 पा. सू. 2.1.5
674 पा. सू. 2.1.6
675 पा. सू. 2.1.7
676 पा. सू. 2.1.8
677 पा. सू. 2.1.9
678 पा. सू. 2.1.10
679 पा. सू. 2.1.11

पठितः। ननु 'प्राक्कडारात्समासः' इत्यत ऊर्ध्वं 'सह सुपा' इत्यतः प्रागेव 'विभाषा' इत्यधिकारः कुतः न विहितः। तत्र समासविधायकानि कानिचित् शास्त्राणि आदौ विधाय पश्चाद्बहूनि सूत्राणि विदधाति। एवं मध्ये विभाषाधिकारं कुतः विदधाति इति प्रश्नः उदेति। एवञ्च तर्हि समासविधानस्य आरम्भे एव विभाषाधिकारः स्यात्। इत्येवम् आशङ्कां मनसि निधाय दीक्षितः समाधत्ते- "अधिकारोऽयम्। एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम्।"[680] अर्थात् मध्ये विभाषाधिकारसामर्थ्याद् एव इतः प्राचीनानां शास्त्राणां नित्यसमासत्वं गम्यत इत्यर्थः।

यद्यपि इतः प्राचीनानां शास्त्राणां विकल्पे प्रमाणाभावादेव नित्यत्वं सिध्यति। तथापि तस्यैव अर्थस्य लिङ्गेन दृढीकरणमिति अवगन्तव्यम्। तथा सति 'सह सुपा' इत्यपि नित्यसमासः भवेत्। ततः भूतपूर्वः इत्यादिस्थलेषु पूर्वं भूतः इति लोकिकविग्रहवाक्यप्रदर्शनम् अयौक्तिकं स्यात्। अत एव तत्रैव सूत्रे दीक्षितेन उच्यते- "सह सुपा इति तु नित्यसमासः। अव्ययम् इत्यादिसमासविधानाज्ज्ञापकाद् इति।"[681] यदि च 'सह सुपा' इति शास्त्रेण सुबन्तस्य सुबन्तेन विधीयमानः समासो नित्यः स्यात् तर्हि 'विभाषा' इत्यतः प्राक्तनैः 'अव्ययं विभक्ति' इत्यादिशास्त्रैः विधीयमानानां नित्यत्वेनाभिमतानां समासानाम् अपि तेनैव शास्त्रेण सिद्धिः स्यात्। 'अव्ययं विभक्ति' इत्यादिसमासविधानं निरर्थकं भवेत्। तस्मात् पृथक् 'अव्ययं

680 वै. सि. कौ., द्वि. भा., पृ. 19

681 तत्रैव

विभक्ति' इत्यादिशास्त्रविधानेन 'सह सुपा' इति समासस्य वैकल्पिकत्वं ज्ञाप्यते इति तदाशयः।

तदेतत् सर्वं संगृह्य एन. एस. रामानुजताताचार्यः लिखति- " 'विभाषा'। एतत्सामर्थ्यादिव प्राचीनानां नित्यसमासत्वम् 'सह सुपा' (सू. 2-1-4) इति तु न नित्यसमासः 'अव्ययम्' (सू. 2-1-6) इत्यादिसमासविधानात् ज्ञापकाद्"[682] इति।

*काशिकार*कथनम् अस्ति यत् " 'विभाषा' इत्ययमधिकारो वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा भवति"[683] इति। एतेन *महाभाष्य*काराशयः प्रकाशितः। किन्तु विभाषाधिकारसामर्थ्याद् एव इतः प्राचीनानां शास्त्राणां नित्यसमासत्वं गम्यत इति दीक्षितोक्तः भावः तु न *काशिका*यां नापि *पदमञ्जर्यां* नवा *न्यासे* स्पष्टं प्रोक्तः।

**इदमत्रावधेयम्-** *महाभाष्य*कारः विभाषापपरिबहिरञ्चवः पञ्चम्या इत्येकमेव सूत्रं पठित्वा तस्य योगविभागं करोति "विभाषेति योगविभागः"[684] (वा. 1239) इति वार्त्तिकमपि पठति। एवञ्च भाष्यकारः विभाषेति योगविभागः कर्तव्यः इति कथयन् विभाषा इत्ययमधिकारः लिखति। तेन उत्तरसूत्राणां वैकल्पिकत्वं तु ज्ञायते। वस्तुतः तस्मिन् सूत्रेषु भाष्यकारः इतोऽपि स्पष्टतया किमपि नावोचत् येन

682 ज्ञा. स., पृ. 177

683 का. वृ., द्वि. भा., पृ. 28

684 म. भा., द्वि. ख., सम्पा. भार्गवशास्त्री, पृ. 363

विभाषा इत्यतः पूर्वं यानि समासविधायकशास्त्राणि सन्ति तेषां नित्यत्वं स्पष्टम् अवगम्येत। समासविधायकसूत्रेषु वैकल्पिकत्वव्यवस्था उपरि प्रतिपादिता तत्तु दीक्षितवर्त्मना। सुप्सुपेत्यनेनैव सिद्धे समासे ‘अव्ययं विभक्ति’ इत्यादिसूत्रैः पुनः समासविधानं प्राचीनस्य क्वाचित्कतां ज्ञापयतीत्यर्थः। तेन च ‘सह सुपा’ इति समासस्य वैकल्पिकत्वं ज्ञाप्यत एव। तेन भूतपूर्व इत्यादौ पूर्वं भूत इति लौकिकविग्रहवाक्यप्रदर्शनं सङ्गतम्। एवञ्च इवेन समासस्यापि क्वाचित्कत्वाद् ‘उद्बाहुरिव वामनः’ इत्यादिप्रयोगः सिद्धः। ‘इवेन समासो विभक्त्यलोपश्च’ इति वार्त्तिकं (वा. 1236) यद्यपि कुगतिसूत्रे पठ्यते, तथापि सुप्सुपा इत्यत्रत्यमेव नित्याधिकारे स्मारितमिति कैयटः। एवं स्थिते उद्बाहुरिव वामनः इत्यादिलौकिकप्रयोगसिद्धये इवेन समासस्य छन्दोविषयकत्वं कल्पयन्तः प्रत्युक्ताः। छन्दस्यपि तत्समासस्य नित्यत्वानभ्युपगमात्। जीमूतस्येवेत्यत्र बह्वृचैः समासस्याभ्युपगमेऽपि तैत्तिरीयैः व्यस्तस्यैव पाठात्। क्वाचित्कोऽयं समासः। अत एव बह्वृचा एव पदपाठे अवगृह्णन्ति, याजुषास्तु भिन्ने एव पदे पठन्ति, उद्बाहुरिव वामनः इत्यादिव्यस्तप्रयोगाश्च युक्ताः।

## 4.5. मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्।

‘पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः’[685] इति शास्त्रेण मिश्र-शब्देनैव तृतीयान्तस्य सुबन्तस्य तत्पुरुषसमासविधानं भवतीति हेतोः गुडेन संमिश्राः

685 पा. सू. 2.1.31

गुडसंमिश्राः इत्येवं संमिश्रशब्देन तृतीयान्तस्य तत्पुरुषसमासः साधुर्न स्यादिति शङ्कां मनसि निधाय भट्टोजिदीक्षितः समाधत्ते- "मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्, 'मिश्रं चानुपसर्गमसन्धौ' इत्यत्रानुपसर्गग्रहणात्। गुडसंमिश्राः धानाः।"[686] तथा च 'मिश्रं चानुपसर्गमसन्धौ'[687] इति योगेन तत्पुरुषसमासे तृतीयान्तात् सुबन्तादुत्तरस्य उपसर्गरहितस्य मिश्रशब्दस्य अन्तोदात्तस्वरः कथ्यते। तिलमिश्राः सर्पिमिश्राः इत्यादीनि उदाहरणानि। तत्रैव सूत्रे दीक्षितः ब्रूते- "मिश्रग्रहणे सोपसर्गग्रहणस्येदमेव ज्ञापकम्।"[688] अस्मिन् सूत्रे अनुपसर्गपदानुपादाने तिलसंमिश्रा सर्पिसंमिश्राः इत्यादावपि अन्तोदात्तस्वरः भवेदिति तन्न स्यात्, अतः अनुपसर्गग्रहणमिति वक्तव्यम्। किन्तु सोपसर्गेण मिश्रशब्देन सह समासः एव नास्ति, तर्हि तत्पुरुषसमासे विधीयमानस्य अन्तोदात्तस्वरस्य प्राप्तिरिपि नास्ति इति अनुपसर्गग्रहणेन नास्ति किमपि प्रयोजनम्। एवम् उपात्तम् अनुपसर्गपदं मिश्रग्रहणे सोपसर्गस्यापि ग्रहणमिति ज्ञापयति। तेन तिलसंमिश्राः सर्पिसंमिश्राः इत्यादीनाम् अन्तोदात्तस्वरवारणाय अनुपसर्गग्रहणमिति स्वांशे चारितार्थ्यम्। फलम् अस्य अन्यत्र तु 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' इति सूत्रे मिश्रशब्देन संमिश्रशब्दस्य अपि ग्रहणेन गुडसंमिश्राः इत्यादीनां तृतीयातत्पुरुषसमासः साधुः। तथा च

686 वै. सि. कौ., द्वि. भा., पृ. 39

687 पा. सू. 6.2.154

688 वै. सि. कौ., च. भा., पृ. 586

रामानुजताताचार्यः अपि तदेव दीक्षितवचः संगृह्णाति- "मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्। 'मिश्रं चानुपसर्गमसन्धौ' (सू. 6-2-154) इत्यत्रानुपसर्गग्रहणात्।"[689]

**अत्रावधेयम्-** *काशिका* अधीयते इदम् अवगम्यते यत् तत्र मिश्रशब्देन समासः प्रदर्शितः- गुडमिश्रः, तिलमिश्रः इति। 'पूर्वसदृशसमोनार्थकलहनिपुण-मिश्रश्लक्ष्णैः' इति सूत्रे मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम् इति ज्ञाप्यविषये आलोचनं नैव विहितम्। किन्तु *पदमञ्जरी*टीकायाम् अस्य आलोचनं कृतम् अस्ति। तत्र यद् आलोचनं विहितम् तत्तु दीक्षितकथनेन सह समानम् एव अस्ति। तत्र मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम् इति ज्ञाप्यशरीरं दृश्यते। तत्तु दीक्षितोक्तज्ञाप्याद् अभिन्नमेव अस्ति। ज्ञापकम् अपि समानमेव प्रोक्तम्- 'मिश्रं चानुपसर्गमसन्धौ' इत्यत्रानुपसर्गग्रहणम्। तथा चोक्तं *पदमञ्जर्यां* प्रोक्तम्- " 'मिश्रं चानुपसर्गमसन्धौ' गुडसंमिश्रा धाना इत्येवमर्थम्। ज्ञापकात्सिद्धम्, यदयं 'मिश्रं चानुपसर्गमसन्धौ' इत्यत्रानुपसर्गग्रहणं करोति, तज्ज्ञापयति- मिश्रग्रहणे सोपसर्गस्यापि ग्रहणमिति।"[690] *न्यास*टीकायां तु किमपि उक्तं नास्ति। *महाभाष्ये* 'पूर्वसदृशसमोनार्थ-कलहनिपुणमिश्रश्लक्ष्णैः' इति सूत्रे अस्मिन् विषये अपि किमपि उक्तं नास्ति। पुनश्च तत्र 'मिश्रं चानुपसर्गमसन्धौ' इति शास्त्रं व्याख्यातमेव नास्ति, येन ज्ञाप्यमिदम् इतोऽपि स्पष्टं ज्ञायेत।

---

689 ज्ञा. स., पृ. 178

690 का. वृ., द्वि. भा., पृ. 47

## 4.6. सर्वोऽप्येकदेशोऽह्ना समस्यते।

'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे'[691] इति शास्त्रेण पूर्वादीनाम् अवयविना सह यः समासः विधीयते सः मध्याह्नः इत्यादौ न स्यात्। अह्नो मध्यः इति विग्रहे अह्नः अवयवित्वेऽपि अवयविना सह 'पूर्व अपर अधर उत्तर' इत्येतेषामेव चतुर्णाम् अवयववाचकानां समासविधानात् तत्र मध्यशब्दस्य समासः न स्यादिति आशङ्कां मनसि निधाय दीक्षितः समाधत्ते- "सर्वोऽप्येकदेशोऽह्ना समस्यते। 'संख्याविसाय' इति ज्ञापकात्।"[692] अर्थात् सूत्रनिर्दिष्टपूर्वादिचतुष्टयभिन्नस्य अपि अवयववाचकशब्दस्य अहन्शब्देन सह समासः भवति। तत्र तावत् ज्ञापकं भवति 'संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ'[693] इति योगेन सायपूर्वकस्य अह्नशब्दस्य स्थाने अहन्नादेशस्य विधानम्। तथा च अह्नः सायः अवसानं सायाह्नः इत्यत्र पूर्वादिचतुष्टयभिन्नस्य एकदेशस्य सायशब्दस्य अह्ना सह यदि समासः न स्यात् तर्हि अह्नस्य सायपूर्वकत्वं तु न सम्भवति, तदा सायपूर्वकस्य तस्य अह्नशब्दस्य स्थाने अहन्नादेशविधानम् अयौक्तिकं भवेत्। एवञ्च सायशब्दग्रहणं व्यर्थं सत् सर्वोऽप्येकदेशोऽह्ना सह समस्यत इति ज्ञापयति।

अत्र काचित् शङ्का। तद्यथा- अह्नशब्दस्य सायपूर्वकत्वं कथितं, तर्हि अह्नशब्देन सहैव समासविधानं ज्ञापयितुं शक्यते, न तु अहन्शब्देन सह। तदा

---

691 पा. सू. 2.2.1

692 वै. सि. कौ., द्वि. भा., पृ. 55

693 पा. सू. 6.3.110

उच्यते सायपूर्वकस्य अह्नशब्दस्य स्थाने अहन्नादेशे विहिते सति आदेशस्य अहन्शब्दस्य अपि सायपूर्वकत्वम् अनुमतमेव। किन्तु तत् न सङ्गच्छते, यदि सायशब्दस्य अहन्शब्देन सह समासः न भवति।

अत्र प्रश्नः उदेति, किं सर्वः अपि एकदेशः अह्ना समस्यते। तदा उच्यते- न केवलं सर्वः अपि एकदेशः अह्नैव समस्यते अपि तु कालसामान्येन। ज्ञापकस्य सामान्यापेक्षत्वात् तेन मध्यरात्रः पश्चिमरात्र इत्यादिप्रयोगाणां साधुत्वं सिध्यतीति पक्षान्तरमपि कौमुद्यामुपन्यस्तम्। तथा च प्रोक्तं दीक्षितेन- "केचित्तु सर्व एकदेशः कालेन समस्यते न त्वह्नैव। ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः, उपारताः पश्चिमरात्रगोचरा इत्यादिसिद्धमित्याहुः।"[694] "किन्तु अस्मिन् पक्षे अपि न चैवं दिनमध्यः रात्रिमध्यः इत्यादि न सिध्येदिति वाच्यम्, ज्ञापकसिद्धस्यासार्वत्रिकत्वादिति" *तत्त्वबोधिनी*काराः।[695] अर्थात् अत्र "ज्ञापकसिद्धं न सर्वत्र"[696] इति परिभाषया समाधानम् इच्छन्ति *तत्त्वबोधिनी*काराः। तथा च रामानुजताताचार्यः कथयति- "सर्वोऽप्येकदेशोऽह्ना समस्यते। 'संख्याविसाय' (सू. 6-3-110) इति ज्ञापकात्।"[697]

**अत्रावधेयम्-** *भाष्य*कारस्तु इदं सूत्रं न व्याख्यातवान्। तत्र *काशिका*याम् उच्यते यत्- " 'संख्याविसायपूर्वस्याह्नस्य' इति ज्ञापकात्सर्वैणैक-

694 वै. सि. कौ., द्वि. भा., पृ. 55
695 तत्रैव
696 प. भा. शे., पृ. 451
697 ज्ञा. स., पृ. 178 -179

देशशब्देनाह्नः समासो भवति।"[698] अन्यथा तु सायपूर्वत्वम् अह्नस्य न उपपद्यते। तेन मध्याह्नः, सायाह्नः इत्यादीनां साधुत्वं सिध्यति। *न्यास*टीकाकारः अपि ज्ञाप्यमिदं समर्थयति। *पदमञ्जर्यां* कश्चिद् विशेषः प्रतिपादितः। तथा च तत्र ज्ञाप्यस्वरूपं किञ्चिद्भिन्नं प्रोक्तम् मध्यरात्र इत्यादीनामपि सिध्यर्थम्। तथा चोक्तं *पदमञ्जरी*कारेण- "केचित्तु- सर्वैणैकदेशवाचिना कालवाचिनः समासो भवति, न त्वहन्शब्दस्यैवेति ज्ञापकशरीरं वर्णयन्ति, तेन मध्यरात्र इत्यपि सिद्धं भवति।"[699] केचिद्ग्रहणेन इदं ज्ञायते यत् *पदमञ्जरी*कारः एतेन मतेन सह सम्मतः नास्ति। वस्तुतः विषयः अयं दीक्षितेन स्पृष्टः एव अस्ति।

## 4.7. सूत्रेषु लिङ्गनिर्देशो न विवक्षितः।

'अर्ध नपुंसकम्'[700] इति सूत्रे नपुंसकपदोपादानं न स्यात् चेदपि अर्धम् इति नपुंसकलिङ्गनिर्देशादेव लिङ्गान्तरव्यावृत्तिः सिध्यति। तदा नपुंसकमिति पदं निरर्थकं खलु इति चेद् दीक्षितः ब्रूते समांशवाच्यर्धशब्दो नित्यं क्लीबे इति। अर्थात् पुनर्नपुंसकग्रहणं नित्यनपुंसकलिङ्गस्य ग्रहणार्थम्। " 'वा पुंस्यर्धोऽर्धं समेऽशंके' इति कोशात्। अंशसामान्यवाची अर्धशब्दः पुंसि वा नपुंसके वा भवति। समे त्वंशे अर्धशब्दः नपुंसकलिङ्गे एवेत्यर्थः। भाष्ये तु समप्रविभागे नपुंसकलिङ्गः, अवयववाची

---

698 का. वृ., द्वि. भा., पृ. 97

699 तदेव, पृ. 98

700 पा. सू. 2.2.2

पुंलिङ्गः।"[701] तदेवोक्तम् *अमरकोष-सुधा*टीकायाम्- "समप्रविभागेऽर्धशब्दः क्लीबमेव"[702] इति। तथा चोच्यते रामानुजताताचार्येण- "अर्धमिति निर्देशादेव नपुंसकत्वे सिद्धे नपुंसकग्रहणं 'सूत्रेषु लिङ्गनिर्देशो न विवक्षितः' इति ज्ञापयितुम्।"[703] एवञ्च सूत्रे नपुंसकग्रहणं व्यर्थं सत् सूत्रेषु लिङ्गनिर्देशो न विवक्षित इति ज्ञापयति। तेन समांशवाच्यर्धशब्दो नित्यं क्लीबे इति दीक्षितकथनं सङ्गच्छते इति स्वांशे चारितार्थ्यम्। तत्र *तत्त्वबोधिनी*कारः ब्रूते- "खण्डवाच्यर्धशब्दो न नित्यनपुंसकः, ग्रामार्धो नगरार्ध इति यथा। समांशवाची तु नित्यनपुंसकः, स एवेह गृह्यते, पूर्वापरा इति पूर्वसूत्रे एव अर्धशब्दे पठनीये अर्धम् इति योगविभागेन निर्देशान्नपुंसकत्वे लब्धे, पुनर्नपुंसकग्रहणादित्याशयेन व्याचष्टे- नित्यं क्लीबे स इति।"[704]

अंशसामान्यवाची तु पुंलिङ्गे इत्युक्तम्। ग्रामार्धो नगरार्ध इत्यादिषु खण्डवाच्यर्धशब्दो न नित्यनपुंसकः। समांशवाची तु नित्यनपुंसकः, स एवेह गृह्यते।

फलमन्यत्र यथा- 'तस्येदम्'[705] इत्यादिशास्त्रेषु इदम् इत्यादिलिङ्ग-निर्देशस्य अविवक्षितत्वात् तस्य अयम् इत्याद्यर्थेषु अपि सूत्रप्रवृत्तिः सिध्यति। अत

701 वै. सि. कौ., द्वि. भा., पृ. 57
702 अमर., पृ. 35
703 ज्ञा. स., पृ. 179
704 वै. सि. कौ., द्वि. भा., पृ. 57-58
705 पा. सू. 4.3.120

एव 'तत्र भवः'[706] इति शास्त्रेण राष्ट्रे भवः राष्ट्रियः इति यथैव सिध्यति तथैव दन्त्ये भवम् दन्त्यम् इत्यपि सिध्यति। अन्यथा केवलं भवः इत्येव अर्थे सूत्रस्य प्रवृत्तिः स्यात्। 'सूत्रे लिङ्गवचनमतन्त्रम्'[707] इति एतत्समानार्था परिभाषा।

**अत्रावधेयम्-** *तत्त्वबोधिनी*कारस्तु पूर्वतने पूर्वपरादिसूत्रे एव अर्धशब्दे पठनीये अर्धमिति योगविभागेन निर्देशान्नपुंसकत्वे लब्धे पुनर्नपुंसकग्रहणं किमर्थमित्येवं प्रश्नं पृष्ट्वा दीक्षितोक्तसमाधानं समर्थयति।

*भाष्य*कारः यद्यपि 'अर्ध नपुंसकम्' इति सूत्रे साक्षाद् अस्य ज्ञाप्यस्य विषये किमपि नावोचत्। तथापि *भाष्यप्रदीप*टीकायां तथा *प्रदीपोद्द्योत*टीकायाम् अस्य ज्ञाप्यस्य उल्लेखः सम्मतिपुरस्सरं विहितम्। "अर्द्धमिति निर्देशादेव नपुंसकत्वे लब्धे नपुंसकग्रहणं ज्ञापकं निर्देशेषु लिङ्गाविवक्षायाः"[708] इति *भाष्यप्रदीपे*। *प्रदीपोद्द्योते* च "नपुसंकग्रहणं तु सूत्रेषु निर्देशे लिङ्गाविवक्षायां ज्ञापकमित्याहुः"।[709]

*परिभाषेन्दुशेखरे* नागेशस्तु कथयति नित्यनपुंसकत्वार्थं तु न तदित्यन्यत्र निरूपितम्। धान्यपलालन्यायेन नान्तरीयकतया तयोरुपादानमिति तस्यापत्यमित्यत्र भाष्ये स्पष्टमित्येवमत्र सूत्रे लिङ्गवचनमतन्त्रमिति परिभाषां प्रस्तौति। वस्तुतः इयं परिभाषा युक्तिसिद्धा। गुरुपद-हालदारमोहदयस्तु इमां

---

706 पा. सू. 4.3.53

707 प. भा. शे., पृ. 321

708 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 414

709 तत्रैव

परिभाषां लोकन्यायसिद्धां मन्यते।[710] परिभाषावृत्तौ तु 'सूत्रे लिङ्गवचनमतन्त्रम्'[711] इति पाठः अस्ति। एतत्स्वीकारे एव 'कर्मणा यमभिप्रैति स सम्प्रदानम्'[712] इत्यत्र यम् इति पुंलिङ्गेन निर्देशस्य अविवक्षितत्वात् लिङ्गान्तरे सम्प्रदानसंज्ञा भवति। तेन ब्राह्मण्यै ददाति इति सिध्यति।

## 4.8. अनित्योऽयं गुणेन समासः।

'अर्थगौरवम्, बुद्धिमान्द्यम्, गुणकात्स्न्र्यम्' इत्यादयः शब्दाः अर्थस्य गौरवमित्यादिषष्ठीसमासरूपाः शिष्टजनैः प्रयुज्यन्ते। तेषां 'पूरणगुणसुहितार्थ-सदव्ययतव्यसमानाधिकरणेन'[713] इति शास्त्रबलेन साधुत्वं न स्यात् । गौरवमान्द्यादिशब्दास्तु गुणवाचकाः तेन तैः साकं षष्ठ्यन्तस्य सुबन्तस्य समासः न भवतीति 'पूरणगुण' इत्यादिशास्त्रेण प्रतिपादितम्। इत्येवम् आशङ्कां मनसि निधाय दीक्षितो ब्रवीति- "अनित्योऽयं गुणेन निषेधः, 'तदशिष्यं संज्ञाप्रमाणत्वात्' इत्यादिनिर्देशात्।"[714] अर्थात् योऽयं गुणेन सार्धं षष्ठ्यन्तस्य समासनिषेधः स न सार्वत्रिकः इति भावः। 'संज्ञाप्रमाणत्वात्' इत्यत्र गुणवाचिना प्रमाणत्वशब्देन सह षष्ठ्यन्तसंज्ञाशब्दस्य समासेन निर्देशात्। तेन इदं ज्ञायते यत् क्वचित् गुणे

---

710 व्या. द. इ., पृ. 369

711 प. वृ., पृ. 62

712 पा. सू. 1.4.32

713 पा. सू. 2.2.11

714 वै. सि. कौ., द्वि. भा., पृ. 47

षष्ठीसमासस्य साधुत्वं ज्ञाप्यते इत्येवम् अर्थगौरवम्, बुद्धिमान्द्यम् इत्यादेः साधुत्वं सिध्यति।

*बालमनोरमा*काराशयस्तावत्- वस्तुतस्तु अनित्यो गुणेन निषेध इत्ययमर्थस्तावत् *महाभाष्ये* न दृश्यते, पुनश्च कृष्णैकत्वम् इत्यादिषु स्थलेषु समासः साधुः न स्यात् इति तु न वक्तव्यम्। यतो हि 'पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्'[715] इति सूत्रे विंशत्यादिशब्दाः भाववचनाः भवन्ति इत्युक्त्वा गवां विंशतिः, गवां सहस्रमित्यर्थे गोविंशतिः, गोसहस्रम् इत्यादिप्रयोगः प्रदर्शितः। "अर्थगौरवमित्यादौ तु अर्थगतं गौरवमिति मध्यपदलोपिसमासो बोध्य इति शब्देन्दुशेखरे प्रपञ्चितम्।"[716]

**अत्रावधेयम्-** *न्यास*कारः अपि गुणेन निषेधः अनित्यः इत्याशयं प्रकटयति दीक्षिताद् भिन्नेन उदाहरणेन। तस्याशयस्तावत् यदि च गुणेन निषेधः नित्यः स्यात् तदा तु गोविंशतिः इति षष्ठीसमासः साधुः न स्यात्, संख्यायाः गुणत्वात् प्रतिषेधः स्यादेव। तदा उच्यते- 'शतसहस्रान्ताच्च निष्कात्'[717] इति यः पाणिनिनिर्देशः अस्ति तज्ज्ञापयति संख्यायाः समासः भवति इति। तं विना निष्कस्य प्रातिपदिकस्य शतसहस्रान्तता तु न सम्भवति।

---

715 पा. सू. 5.1.59

716 वै. सि. कौ., द्वि. भा., पृ. 47

717 पा. सू. 5.2.119

***पदमञ्जरी*कारा‌शयस्तावत्-** 'शतसहस्रान्ताच्च निष्कात्', 'क्रोशशतयोजन-शतयोरुपंसख्यानम्', 'खारीशतमपि न ददाति' इत्यादिमुनित्रयप्रयोगेण गोविंशतिः इत्यादौ संख्यया सह समासस्य न निषेधः। कथं वा करणपाटवं, बुद्धिमान्द्यं. यत्नगौरवम् इत्यादौ समासस्य साधुत्वमिति चेत् संज्ञाप्रमाणत्वाद्, उत्तरपदार्थप्राधान्यम् इत्यादिप्रयोगदर्शनेन गुणेन समासनिषेधः अनित्यः एव। *काशिकायां* तु विषये अस्मिन् किमपि उक्तं नास्ति।

यद्यपि *महाभाष्य*कारः अस्य ज्ञाप्यस्य विषये किमपि नावादीत् तथापि *भाष्यप्रदीप*टीकायाम् अस्य समर्थनं प्राप्यते। तथा च तेन कैयटेन प्रोक्तम्- "गोविंशतिरित्यादौ संख्यया समासो न निषिध्यते 'शतसहस्रान्ताच्च निष्कात्', 'क्रोशशतयोजनशतयोरुपंसख्यानम्', 'खारीशतमपि न ददाति' इति मुनित्रय-वचनाज्ज्ञापकात्। उत्तरपदार्थप्राधान्यमित्यादेश्च मुनिप्रयोगादस्य प्रतिषेध-स्यानित्यत्वाद्यत्नगौरवादिशब्दसिद्धिः"[718] इति।

## 4.9. व्यधिकरणपदोऽपि बहुव्रीहिः।

ननु 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादिषु स्थलेषु सच्छास्त्रात् जन्म यस्येति विग्रहाज्ज्ञायते व्यधिकरणपदः बहुव्रीहिः अस्ति न तु समानाधिकरणः।

718 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 432

किन्तु प्रश्नः उदेति, कथं तस्य साधुत्वम्। यतो हि 'अनेकमन्यपदार्थे'[719] इति योगेन समानाधिकरणानां पदानामेव बहुव्रीहिरिति सिद्धान्तितः। तस्य समाधानं 'सप्तमीविशेषणे बहुव्रीहौ'[720] इति सूत्रे ददाति दीक्षितः- "सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम्। कण्ठेकालः। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः"[721] इति। अर्थात् सप्तम्यन्तस्य बहुव्रीहौ कण्ठेकालः प्रभृति पूर्वनिपातविधानं ज्ञापयति भिन्नविभक्तिकयोः पदयोरपि बहुव्रीहिसमासः विधीयते। अतः 'सच्छास्त्रजन्मा हि विवेकलाभः' इति प्रयोगः साधुः।

अत्र *बालमनोरमा*कारः कथयति- "कण्ठे तिष्ठतीति कण्ठेस्थः, स कालो यस्येति विग्रहः।.यद्यपि कण्ठेस्थशब्दः प्रथमान्तः एवात्र बहुव्रीहौ पूर्वपदम्, तस्य कालशब्देन सामाधिकरण्यमस्त्येवेति कथं सप्तमीग्रहणं व्यधिकरणपद-बहुव्रीहिज्ञापकम्। किं च विशेषणत्वादेव सिद्धे किं वा सप्तमीग्रहणेन। तथापि यदा स्थपदमनादृत्य कण्ठे इत्यस्याधिकरणत्वं तस्य च कालरूपे उत्तरपदार्थे उपसंक्रमः, तदा कण्ठे इत्यस्याप्रथमान्तत्वाद् बहुव्रीहेरप्रसक्तेः तत्र सप्तम्यन्तस्य पूर्वनिपातविधिरभित्तिचित्रायितः स्यात्। ततश्च सप्तमीग्रहणाद् अप्रथमान्तोऽपि

719 पा. सू. 2.2.24

720 पा. सू. 2.2.35

721 वै. सि. कौ., द्वि. भा., पृ. 180

बहुव्रीहिः क्वचिदस्तीति विज्ञायते इति योज्यम्। तेन 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादि सिद्धम्।"[722]

**अत्रावधेयम्-** *काशिकायां* वा *पदमञ्जरी*टीकायां वा *न्यास*टीकायां वा कुत्रापि अस्य ज्ञाप्यविषये तस्मिन् सूत्रे चर्चा विहिता नास्ति। महाभाष्यादिषु अपि तस्य सूत्रस्य व्याखानावसरे ज्ञाप्यमिदं नैव आलोचितम्। परन्तु दीक्षितादिकथनेन तत्परिशीलनेन च व्यधिकरणपदः बहुव्रीहिः इति ज्ञापितवचनस्य साधुत्वं विज्ञायते।

## 4.10. अधिशब्दोच्चारणम् इङिकावध्युपसर्ग न व्यभिचरतः इति ज्ञापनार्थम्।

अत्र तावदुच्यते यत् 'अधीगर्थदयेशां कर्मणि'[723] इति सूत्रे नास्ति आवश्यकता अधिशब्दोच्चारणस्य। इगर्थ इत्यनेनैव स्मरणार्थकस्य इक्धातोः लाभः भवेत् इति शङ्कायामुच्यते *तत्त्वबोधिनी*कारैः यत् "अधिशब्दोच्चारणम् 'इङिकावध्युपसर्गं न व्यभिचरतः इति ज्ञापनार्थम्'। अन्यथा 'स्मृत्यर्थदयेशाम्' इत्येव ब्रूयात्, 'इगर्थे-' इति वा। इङंशे नेदं ज्ञापकमिति चेत्तर्हि तदंशे 'णेरध्ययने वृत्तम्' इत्यत्राधिशब्दोच्चारणं ज्ञापकमस्तु।" [724]

तथा च अधिशब्दोच्चारणं व्यर्थं सद् 'इक् स्मरणे' इति धातुः अधि इत्युपसर्गेण सहैव प्रयोक्तव्यः इति ज्ञापयति।

---

722 तत्रैव

723 पा. सू. 2.3.52

724 वै. सि. कौ., प्र. भा., पृ. 677

अत्र उच्यते- यद्यपि अत्रत्यम् अधिशब्दोच्चारणम् इग्धातोरेव अध्युपसर्गाव्यभिचारे ज्ञापकं भवेत्, न इङ्धातोः तथापि यथा 'इङ् अध्ययने' इति धातुः अध्युपसर्गं न व्यभिचरति तथा 'इक् स्मरणे' इति धातुः अपि इति दृष्टान्तप्रदर्शनार्थम् इङ्धातोरपि वचनशरीरे प्रवेशः कृतः।

**अत्रावधेयम्-** दीक्षितस्तु अस्य ज्ञाप्यस्य विषये किमपि नावादीत् तस्मिन् सूत्रे। इङः अध्युपसर्गाव्यभिचारे ज्ञापकं तु 'णेरध्ययने वृत्तम्'[725] इत्यत्र अधिशब्दोचारणमिति ध्येयमिति रामानुजताताचार्यः।[726] अर्थात् यदि इदम् इङ् अध्ययने इति धात्वंशे ज्ञापकं नास्ति तर्हि तत्र 'णेरध्ययने वृत्तम्' इत्यत्रत्यम् अधिशब्दोच्चारणम् अस्ति ज्ञापकमित्यवधेयम्। अत्र *तत्त्वबोधिनी*कार-रामानुजताताचार्ययोः विशेषः कः इति चेत्, *तत्त्वबोधिनी*कारनये प्रथमं तावद् 'अधीगर्थदयेशां कर्मणि'[727] इति सूत्रस्थम् अधिशब्दोच्चारणं ज्ञापकम् 'इङिकावध्युपसर्गं न व्यभिचरतः' इत्यस्य। यदि च तज्ज्ञापकं न स्वीक्रियते तर्हि द्वितीयं ज्ञापकं तावत् 'णेरध्ययने वृत्तम्' इत्यत्राधिशब्दोच्चारणम्। किन्तु रामानुजताताचार्यस्तु इङः अध्युपसर्गाव्यभिचारे 'णेरध्ययने वृत्तम्' इत्यत्रत्यम् अधिशब्दोच्चारणम् ज्ञापकम् इत्येकमेव ज्ञापकं स्वीकरोति।

---

725 पा. सू. 7.2.26

726 ज्ञा. स., पृ. 183

727 पा. सू. 2.3.52

भाष्यादिषु तु असौ विषयः नैव चर्चितः। *काशिकायाम्* अपि किमपि उल्लिखितं नास्ति।

***न्यास*कारशयस्तावत्-** इक् स्मरणे इत्यस्याधिपूर्वस्य ग्रहणम्। अधीगित्यनेन समानार्था अधीगर्थाः। ककारानुबन्धकरणम् अस्य धातोः अत्रैव सूत्रे विशेषणाय। अध्ययनार्थानाम् इत्युच्यमाने तु सन्देहः उदेति एव अयं कः धातुः इति। एवञ्चाधिपूर्वस्य उच्चारणेन अधिपूर्वस्यैव अस्य प्रयोगः इति दर्शयति। *पदमञ्जरी*कारस्यापि आशयः समानः एव। सः वदति यत् "इक् स्मरणे ककारोऽत्रैव विशेषणार्थः, अधिपूर्वस्यैवोच्चारणमेवायं प्रयोक्तव्य इति ज्ञापनार्थम्"[728] इति।

## 4.11. पचादिराकृतिगणः।

'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'[729] इति सूत्रे नन्द्यादिः, ग्रह्यादिः, पचादिश्चेति त्रयः गणाः निर्दिष्टाः। तेषु नन्द्यादिः ग्रह्यादिश्च आकृतिगणौ न स्तः। एवञ्च एताभ्यां साकं यस्य पचादेः निर्देशः अस्ति तर्हि तस्य अपि आकृतिगणत्वं न भवेदिति आशङ्कायामुच्यते- पचादेः आकृतिगणत्वं ज्ञापकेन साध्यते।

तथा हि 'शिवशमरिष्टस्य करे'[730] इति सूत्रे यः करशब्दः पठितः अस्ति, तस्य करशब्दस्य पचादिगणे पाठः नास्ति। तथापि पचादिगणे अपठितात् तस्मात् कृधातोः अच्प्रत्ययविधानेन करशब्दः निष्पद्यते। पुनश्च 'कर्मणि

728 का. वृ., द्वि. भा., पृ. 213

729 पा. सू. 3.1.134

730 पा. सू. 4.4.143

घटोऽठचत्'[731] इति सूत्रे यः घटशब्दः पठितः तस्य घटशब्दस्य पचादिगणे पाठः नास्ति। तथापि पचादिगणे अपठितात् घटधातोः अच्प्रत्ययविधानेन घटशब्दः निष्पद्यते। तथा च आचार्यस्य एवंविधप्रयोगात् पचादेः आकृतिगणत्वं ज्ञायते।

पुनश्च यङन्ताद् अच्प्रत्यये परे यङः लुग्विधीयते 'यङोऽचि च'[732] इति सूत्रेण। पचादिगणे तु यङन्तस्य पाठः नास्ति। तर्हि पाठाभावात् ततोऽच्प्रत्ययविधानं दुर्लभम् इति ततः अच्प्रत्ययदुर्लभतया अच्प्रत्यये परे सति यङः लुग्विधानम् असंगतम् इत्येवं लुग्विधानम् अयौक्तिकं सत् पचादेः आकृतिगणत्वं ज्ञापयति।

वस्तुतः दीक्षितेन पचादिराकृतिगणः इति केवलम् उक्तम् अस्ति। तत्र *बालमनोरमा*कारः उदाहरणद्वारा तदाशयम् इतोऽपि स्पष्टीकरोति। सः वदति यत् "सूत्रे करशब्दस्य पचादिगणे अपठितस्य कृञः अच्प्रत्ययान्तस्य 'कर्मणि घटः' इति सूत्रे घटेरचि घटशब्दस्य च प्रयोगदर्शनादित्यर्थः। अच्प्रत्यय इति। यङन्तादच्प्रत्यये परे 'यङोऽचि च' इति यङो लुग्विधीयते। न हि पचादिगणे यङन्तं पठितमस्ति। अतोऽपि पचादेराकृतिगणत्वं विज्ञायते इत्यर्थः"[733] इति।

**अत्रावधेयम्-** पचादेः आकृतिगणत्वे अस्ति कश्चिद् आक्षेपः। तथा च पचादेः आकृतिगणत्वे नदट् चोरट् इत्यादीनां तत्र पाठो व्यर्थः। तत्समाधानाय

---

731 पा. सू. 5.2.35

732 पा. सू. 2.4.74

733 वै. सि. कौ., च. भा., पृ. 35

दीक्षितः ब्रूते- "केषाञ्चित्पाठस्त्वनुबन्धासञ्जनार्थः।"[734] अर्थात् टकारानुबन्धासञ्जनार्थः इत्यर्थः।

तथा सति पुनश्च आक्षेपः भवति यत् ननु एवमपि वद चल इत्यादीनाम् अनुबन्धरहितानां तत्र किमर्थः पाठः। तत्समाधानाय दीक्षितः कथयते- "केषाञ्चिद्बाधकबाधनार्थः।"[735] अर्थात् "जारभर श्वपच इत्यादौ पचाद्यजपवादस्य कर्मण्यणो बाधनार्थं भरपचादीनां पाठ इति भाष्यम्। देवः सेव इत्यादौ 'इगुपधज्ञाप्रीकिरः कः' इति विशिष्य विहितस्य कस्य बाधनार्थं च"[736] इति *बालमनोरमा*कारः। *काशिका*कारमतेनापि पचादिराकृतिगणः। तथा चोच्यते-

अज्भिः सर्वधातुभ्यः पठ्यन्ते च पचादयः।
अण्बाधनार्थम् एव स्यात् सिध्यन्ति श्वपचादयः।।[737]

तत्र *पदमञ्जरी*काराशयस्तावत् 'यङोऽचि च' इत्यत्र यङः अस्मिन्नचि लुगुक्तः। पुनश्च 'शिवशमरिष्टस्य करे' इत्यत्र कृञ्धातोः अच्प्रत्ययः विहितः, 'कर्मणि घटोऽठचत्' इत्यत्रापि घटधातोः अच्प्रत्ययः विहितः। भाष्यकारः अपि कथयति 'अजपि सर्वधातुभ्यः वक्तव्यः'[738] इति। एवं तर्हि पचाद्यनुक्रमणं कुतः इति चेत् नदडित्यादावनुबन्धासञ्जनार्थम्।

---

734 तत्रैव

735 तत्रैव

736 तत्रैव

737 का. वृ., द्वि. भा., पृ. 529

738 म. भा., तृ. ख., सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च, पृ. 153

भाष्यकाराशयस्तावत् 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रे यद्यपि साक्षात् पचादिराकृतिगणः इति नैव उक्तवान्। तथापि "अजपि सर्वधातुभ्यः"[739] (वा. 1987) इति वार्त्तिकं समर्थयित्वा ब्रवीति अजपि सर्वधातुभ्यो वक्तव्यः। तेन भवः सवः इति सिध्यति। किन्तु तेन तु पचाद्यनुक्रमणं न कर्तव्यम् इति फलति। पुनः "पचाद्यनुक्रमणमनुबन्धासंजनार्थमपवादबाधनार्थं च"[740] (वा. 1988) इति वार्त्तिकं पठित्वा भाष्यकारः एतस्य प्रयोजनं बोधयति। तन्नये नदट्, चोरट् इत्यादौ अनुबन्धासंजनार्थं प्रकृतसूत्रे पचादिग्रहणं कर्तव्यम्। पुनः जारभरा श्वपचा इत्यादौ अपवादवाधनार्थं सूत्रे पचादिग्रहणं कर्तव्यम् इत्येवं पचादिग्रहणस्य सार्थक्यं दर्शयति।

## 4.12. अयं न भूते क्तस्य बाधकः।

ननु 'मतिबुद्धिपूजार्थेभ्यश्च'[741] इति शास्त्रेण विशेषतया इच्छा, बुद्धिः, ज्ञानम् इत्येतदर्थकेभ्यः धातुभ्यः वर्तमानकालार्थे क्तप्रत्ययः विधीयते। अयं क्तप्रत्ययः तर्हि तदर्थकेभ्यः धातुभ्यः भूतकालार्थे सामान्यतया विहितस्य 'निष्ठा'[742] इति क्तप्रत्ययस्य अपवादः भवेत्। तथा भवति चेत् 'पूजितो यः सुरासुरैः' इत्यादिनां प्रयोगाणां साधुत्वं न स्यात्। यदि च उच्यते तत्रापि वर्तमानकालार्थे एव क्तप्रत्ययः

---

739 तत्रैव

740 तत्रैव

741 पा. सू. 3.2.188

742 पा. सू. 3.2.102

विधीयते, तदपि न वक्तव्यम्। एवञ्च तस्यां दशायां तद्योगे ‘क्तस्य च वर्तमाने’[743] इति शास्त्रेण षष्ठ्याः आपत्तिः स्यात्। तदा सुरासुरैः इति तृतीयायाः साधुत्वं न स्यात्, सुरासुराणाम् इति प्रयोगः स्यात्। अत्र तावत् समाधानं दीयते यत्- “ ‘तेन’ इत्यधिकारे ‘उपज्ञाते’ इति लिङ्गात् अयं न भूते क्तस्य बाधकः।”[744]

तत्र तेन उपज्ञातम् इत्यर्थे ‘उपज्ञाते’[745] इति योगेन छप्रत्ययविधानं भवति। तेन पाणिनिना उपज्ञातं पाणिनीयम् इत्युदाहरणं सिध्यति। “उपज्ञातं प्रथमज्ञातम्” इति *बालमनोरमा*कारः।[746] “विनोपदेशं ज्ञातमुपज्ञातम्” इति *तत्त्वबोधिनी*कारः।[747] तत्र तेन इति तृतीयासमभिव्याहारेण उपज्ञात इति शब्दस्य भूतार्थकक्तान्तत्वं निश्चितम्। किन्तु यदि ‘मतिबुद्धिपूजार्थेभ्यश्च’ इति शास्त्रेण विहितः वर्तमानार्थकः क्तप्रत्ययः भूतार्थकस्य क्तप्रत्ययस्य बाधकः भवेत् तदा तु ‘तेन उपज्ञातम्’ इति अयं निर्देशः सङ्गतः न स्यात्। ‘उपज्ञा’ इत्यस्यापि बुद्ध्यर्थकत्वात् तत्र ‘तस्य उपज्ञातम्’ इति निर्देशः स्यात् तच्च पाणिनिना न कृतम्। एवञ्च ‘उपज्ञाते’ इत्यत्र यतो हि पाणिनिना उपज्ञा इति बुद्ध्यर्थकधातोः उत्तरं क्तप्रत्ययस्य विधानं करोति, अतः ‘मतिबुद्धिपूजार्थेभ्यश्च’ इति सूत्रविहितः क्तप्रत्ययः भूतकालार्थे विधीयमानस्य क्तस्य नापवादः इति सिध्यति।

---

743 पा. सू. 2.2.67

744 ज्ञा. स., पृ. 184

745 पा. सू. 4.3.115

746 वै. सि. कौ., द्वि. भा., पृ. 436

747 तत्रैव

**इदमत्रावधेयम्-** भाष्यकारः यद्यपि साक्षाद् एनं विषयं नोपस्थापितवान् परन्तु पतञ्जलिकैयटनागेशानाम् आशयः स एवास्ति। तथा चोच्यते *महाभाष्य*कारेण 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रे "शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि। रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि। हृष्टतुष्टौ तथाक्रान्तस्तथोभौ संयतोद्यतौ। कष्टं भविष्यतीत्याहुरमृताः पूर्ववत्स्मृताः। न म्रियन्ते अमृताः।"[748] *काशिका*कारौ अपि तथैव उक्तवन्तौ।[749] तत्र क्तप्रत्ययस्य मत्याद्यर्थेभ्यः परस्य भूतविषयताया अपि वर्तमानविषयत्वात् तक्रकौण्डिन्यन्यायेन बाधः भवति। ज्ञातम् इत्येतत्तु भूते अपि भवति।

कुतः इति चेत् *प्रदीप*कारः वदति यत् "तेनेत्यधिकारात् तृतीयान्तादुपज्ञातेऽर्थेऽण्प्रत्ययविधानात्।"[750] अन्यथा वर्तमानार्थे क्तप्रत्ययः अस्ति चेत् 'क्तस्य च वर्तमाने' इति शास्त्रेण षष्ठीविभक्तिः भवेद् खलु।

*उद्द्योत*कारस्यापि अत्र सम्मतिः अस्ति। तन्नये तावत् तेनेत्यधिकारात् तृतीयान्ताद् उपज्ञाते अर्थे अण्प्रत्ययस्य विधानं भवति इति हेतोः विधेयविषये अयं न्यायः न तु बाधविषये इति ज्ञाप्यते, कालः तु अत्र अनुवाद्यः इति तस्य आशयः। प्रकृतज्ञाप्यस्वीकारे के लाभाः इति चेत् पूजितो यः सुरासुरैः इत्यपि सिद्धं भवति। शीलितो रक्षितः क्षान्त इत्यादि भाष्योक्तमपि साधु भवति। एतेषां ग्रहणं तु न

748 म. भा., तृ. ख., सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च, पृ. 213

749 का. वृ., द्वि. भा., पृ. 683

750 म. भा., तृ. ख., सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च, पृ. 213

कर्तव्यम् इति तु न वक्तव्यम्। यतो हि सूत्रे चकारः अनुक्तसमुच्चयार्थः। तथा चोक्तं *काशिका*काराभ्याम्- "अनुक्तसमुच्चयार्थश्चकारः"[751] इति। तेन अनुक्त-समुच्चयार्थेन एषां ग्रहणमिति भावः। अमृताः इति भाष्योक्तं वर्तमानार्थे अस्ति। तच्च स्पष्टीकरोति नागेशः यत् "वर्तमाने इत्यर्थस्तदाह- न म्रियन्ते इति।"[752] अर्थात् यथा शीलादिषु वर्तमाने निष्ठाप्रत्ययः भवति तथा अमृतशब्दस्यापीति ज्ञेयम्। पुनरत्रावेधयं यत् यद्यपि शीलादयः वर्तमानार्थे व्युत्पाद्यन्ते तथापि शीलितः, रक्षितः, आक्रुष्टः वा देवदत्तेन इत्यतेषु स्थलेषु 'क्तस्य च वर्तमाने' इति योगेन षष्ठीविभक्तिः न भवति। एतदेव समर्थयन् *न्यास*कारः कथयति- "यथा न भवति तथा तत्रैव प्रतिपादितम्"[753] इति। *काशिका*कार*भाष्य*कारादीनां मतानुसारेण तावत् कष्टं भविष्यति इति भविष्यतीत्यर्थे कष्टशब्दः। अमृतशब्दस्तु वर्तमानार्थे। सुप्तः, शयितः, आशितः, लिप्तः, तृप्तः इत्येवमादयस्तु वर्तमानार्थे बोद्धव्याः।

## 4.13. अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।

ननु बहवः कुरुचराः यस्यां सा बहुकुरुचरा, नदम् अतिक्रान्ता अतिनदा इत्यादिषु उपसर्जनेषु कुरुचरनदादिशब्देभ्यः 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः'[754] इत्यादिना शास्त्रेण विधीयमानानां ङीबादिप्रत्ययानां प्राप्तिः

751 का. वृ., द्वि. भा., पृ. 683

752 म. भा., तृ. ख., सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च, पृ. 213

753 का. वृ., द्वि. भा., पृ. 684

754 पा. सू. 4.1.15

नास्ति। यतो हि समासप्रत्ययविधौ तदन्तविधिप्रतिषेधः अस्ति। वस्तुतः उपसर्जनेभ्यः कुरुचरादिशब्देभ्यः 'टिड्ढाणञ्' इत्यादिशास्त्रेण विधीयमानानां ङीबादिप्रत्ययानां निवारणाय 'अनुपसर्जनात्'[755] इत्यधिकारः काम्यते। स चाधिकारः व्यर्थः खलु, बहुकुरुचरशब्दस्य टिदन्तत्वाभावाद् एव ततः ङीपः प्रसक्तिरेव नास्ति।

यदि उच्यते- टिदन्तं तु प्रातिपदिकविशेषणम् अस्ति, तेन तदन्तविधौ टिदन्तान्तादपि ङीपः प्राप्तिः अस्ति, तदपि न वक्तव्यम्। एवञ्च अनुपसर्जनाधिकारः व्यर्थः सन् स्त्रीप्रत्ययेषु तदन्तविधिः भवति इति ज्ञापयति। तथा चोच्यते दीक्षितेन- "अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।"[756] तेन बहुकुरुचरा, अतिनदा इत्यादिषु स्थलेषु ङीबादिप्रत्ययवारणाय अनुपसर्जनाधिकारः आवश्यकः इति सिध्यति इति स्वांशे चारितार्थ्यम्। किम् अस्य अन्यत् फलम् अस्ति इति चेदुच्यते- 'वनो र च'[757] इत्यादौ वन्नन्तान्तलाभः।

अत्र काचित् शङ्का- मास्तु स्त्रीप्रत्ययेषु तदन्तविधिः। एवञ्च स्त्रीप्रत्ययेषु तदन्तविध्यभावेऽपि नद इव आचरति नदा स्त्री इत्यादिषु आचारक्विबन्त-प्रकृतिककर्तृक्विबन्तेषु ङीबादिनिवृत्त्यर्थम् अनुपर्जनाधिकारस्य आवश्यकता अस्ति, तर्हि कथं वा तस्य स्त्रीप्रत्ययविधिषु तदन्तविधिज्ञापकत्वम् इति चेत्, तथा न

---

755 पा. सू. 4.1.14

756 वै. सि. कौ., प्र. भा., पृ. 524 -525

757 पा. सू. 4.1.7

वक्तव्यम्। "अनुपसर्जनाधिकारस्य स्त्रीप्रत्ययविधिषु तदन्तविधि-ज्ञापनार्थत्वपरभाष्य-प्रामाण्येन यामाचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानोन्नयनादित्यलम्।"[758]

अत्र रामानुजताताचार्यस्याशयस्तावत्- शूद्रशब्दस्य जातिवाचकत्वं महच्छब्दपूर्वकत्वाभावश्चेति विशेषणद्वयमिति वार्त्तिककृत्। महाशूद्रशब्दस्य अजादिगणे पाठाभावादेव टापः अप्राप्त्या अमहत्पूर्वा इति व्यर्थं सद् तज्ज्ञापकं भवति। शुद्रशब्दस्तु अजादिगणे पठितः तर्हि तदन्तविधिना सोऽपि गृह्यते एव इति तु न वक्तव्यम्, ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधात्। एवञ्च तदन्तविधिना शूद्रशब्देन महाशूद्रशब्दः अपि गृह्येत इति तद्व्यावर्तयितुं अमहत्पूर्वाग्रहणमिति स्वांशे चारितार्थ्यम्। अस्य फलं तावद् उगिदन्ताद् अतिभवच्छब्दादपि ङीप्प्रत्ययसिद्ध्या अतिभवतीति रूपनिष्पत्तिः।[759]

**इदमत्रावधेयम्-** वस्तुतः अन्यत् फलं किमिति दीक्षितेन उक्तं नास्ति। नापि *तत्त्वबोधिनी*कारेण उक्तम् अस्ति। 'वनो र च' इत्यादौ वन्नन्तान्तलाभः इति यत् फलम् उक्तम् अस्ति तत् तु *बालमनोरमा*कारेण उक्तम् अस्ति। स्त्रीप्रत्ययेषु तदन्तविधिः भवति इत्यस्य ज्ञापकविषये भाष्यादिविषयविशेषः अत्र आलोच्यते। तत्र तावत् प्रश्नः भवति- तज्ज्ञाप्यस्य तावत् किम् अस्ति ज्ञापकं "शूद्रा चामहत्पूर्वा जातिः" (वा. 2400) इति 'अमहत्पूर्वा' इति ज्ञापकम् उत 'अनुपसर्जनात्' इत्ययम् अधिकारः। तत्र तु सिद्धान्तः- 'अनुपसर्जनात्' इत्ययम् अधिकारः तस्य ज्ञापकं

---

758 वै. सि. कौ., प्र. भा., पृ. 524 -525

759 ज्ञा. स., पृ. 65

भवति। 'शूद्रा चामहत्पूर्वा जातिः'[760] इत्यस्यार्थस्तावत् शूद्रशब्दष्टापमुत्पादयति जातिश्चेद्भवति। शूद्रा। महत्पूर्वस्य तु प्रतिषेधः भवति। महाशूद्रशब्दः आभीरजातिवचनः। तत्र तदन्तविधिना प्राप्तस्य टाप्प्रत्ययस्य निषेधः क्रियते। किन्तु ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति अतः महाशूद्रशब्दात् टाप्प्राप्तिरेव नास्ति, तस्माद् तद्वारणाय विहितम् 'अमहत्पूर्वा' ग्रहणं व्यर्थं सद् ज्ञापकं भवति स्त्रीप्रत्ययप्रकरणे ग्रहणवता प्रातिपदिकेन तदन्तविधिः अवश्यमेव प्रवर्तते। तस्मादेव 'वनो र च' इति शास्त्रेण यथा धीवन्-शब्दस्य स्त्रीत्वे द्योत्ये नकारस्य रेफादेशं कृत्वा ङीप्प्रत्यये विहिते धीवरी इति शब्दः सिध्यति, तथैव अतिक्रान्तम् धीवानम् या सा इत्यत्रापि 'वनो र च' इति शास्त्रेण रेफादेशे ङीप्प्रत्यये च विहिते अतिधीवरी इति शब्दः सिध्यति इति *काशिका*काराशयः।[761] एवमेव अतिपीवरी इत्यपि सिध्यति। यदि च तदन्तविधिः न स्यात् तदा 'वनः' इति प्रत्ययग्रहणात् 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवति'[762] इति धीवरी, पीवरी इत्यादिषु एव स्यात्, न तु अतिधीवरी, अतिपीवरी इत्यत्र स्यात्। किन्तु स्त्रियां तदन्तविधौ स्वीकृते दोषः आपद्यते पञ्चानाम् अजानां समाहारः पञ्चाजी इति द्विगोरपि तदन्तविधिना टाप् प्राप्नोति। अर्थात् अमहत्पूर्वग्रहणेन यदि स्त्रीप्रत्ययेषु तदन्तविधिः ज्ञाप्यते तदा तु पञ्चाजी इत्यादौ टापा बाधितः ङीप् न स्यादिति भावः। अत्र

760 वै. सि. कौ., प्र. भा., पृ. 499 -500

761 का. वृ., च. भा., पृ. 275 -276

762 प. भा. शे., पृ. 96 -100

समाधानं कथयति भाष्यकारः “अजादिभिरत्र स्त्रियं विशेषयिष्यामः- अजादीनां या स्त्री”[763] इति।

'आभीरी तु महाशूद्री जातिपुंयोगयोः समा' इत्यमरः।[764] *तत्त्वबोधिनी*कारः कथयति 'अमहत्पूर्वा' इति व्यर्थं भवति, महाशूद्रशब्दः समुदित एवाभीरत्वजातौ वर्तते। तत्र अवयवस्य अनर्थकतया शूद्रशब्दार्थसमवेतस्त्रीत्वाभावेन टापः प्रसक्त्यभावात्। तदन्तविधिज्ञापनाय 'अमहत्पूर्वा' ग्रहणमिति तु सः न स्वीकरोति, यतो हि तन्नये अनुपसर्जनाधिकारेणैव तदन्तविधिः ज्ञापितः। अत्र पुनः विज्ञेयं “शूद्रा चामहत्पूर्वा जातिः” इत्यादिवचनं 'अजाद्यतष्टाप्'[765] इति सूत्रस्थं वार्त्तिकमेव, न तु इदं गणसूत्रमिति नव्याः वैयाकरणाः।[766] *काशिका*कारनये तु “शूद्रा चामहत्पूर्वा जातिः” इति 'अमहत्पूर्वा' इति ज्ञापकम् पुनश्च 'अनुपसर्जनात्' इत्ययम् अधिकारः अपि ज्ञापकः इति विज्ञेयम्। *तत्त्वबोधिनी*कारस्तु द्वितीयं ज्ञापकमेव स्वीकरोति। *पदमञ्जरी*कारानुसारेण अमहत्पूर्वेति प्रतिषेधः अकर्तुं शक्यः। तदन्तविधिस्तु अनुपसर्जनाधिकारेण ज्ञाप्यते। तथा चोक्तं तेन “एवं चामहत्पूर्वेति प्रतिषेधः शक्योऽकर्तुम्, न हि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वम्। तदन्तविधिस्तु 'अनुपसर्जनात्' इत्यत्र ज्ञापयिष्यते” इति।[767] भाष्ये अपि स्त्रीप्रत्ययेषु तदन्तविधिः

763 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 32

764 अमर., पृ. 208

765 पा. सू. 4.1.4

766 वै. सि. कौ., प्र. भा., पृ. 499 -500

767 का. वृ., तृ. भा., पृ. 278

स्वीक्रियते। तथा च तेन उक्तम्- “एवं तर्हि ज्ञापयत्याचार्यः- भवतीह तदन्तविधिरिति।”[768]

## 4.14. क्वचित्सामान्योक्त्वापि विशेष एव गृह्यते।

ननु ‘स्यतासीलृलुटोः’[769] इति सूत्रे यथा लृ इत्यनेन लृट् लृङ् इत्यनयोः ग्रहणं भवति तद्वत् ‘अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्’[770] इति सूत्रे ‘तृन्तृच्’ इत्यनयोः स्थाने तृ इत्येव पाठः स्यात्, तेन ‘तृन्तृच्’ इत्यनयोः ग्रहणं तु भवेदेव। एवञ्च तृ इत्यनेन सामान्येन तृन्तृचोर्ग्रहणं भविष्यति। यथा ‘तुरिष्ठेमेयस्सु’[771] इत्यत्र तृ इत्यनेन तृन्तृचोः प्रत्यययोः सामान्यग्रहणं तद्वत् अत्रापि भविष्यति, तेन न कोऽपि दोषः प्रसज्येत। तदा उच्यते ‘तुरिष्ठेमेयस्सु’ इतिवत् तृ इत्येव सिद्धे तृन्तृचोर्भेदेनोपादानं क्वचित् सामान्यनिर्देशेऽपि विशेष एव गृह्यत इति ज्ञापनार्थम्। तथा चोच्यते *तत्त्वबोधिनी*कारेण- “ ‘तुरिष्ठेमेयस्सु’ इतिवत् तृ इत्येव सिद्धे तृन्तृचोर्भेदेनोपादानं क्वचित् सामान्योक्तावपि विशेष एव गृह्यते इति ज्ञापनार्थम्। तेन ‘न कोपधायाः’ इत्यत्र सामान्योक्तावपि अकतद्धितयोरेव को

---

768 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 32

769 पा. सू. 3.1.33

770 पा. सू. 6.4.11

771 पा. सू. 6.4.154

गृह्यते, न कमात्रम्। तेन यदग्रे वक्ष्यति 'कोपधप्रतिषेधे तद्धितवुग्रहणम्' इति तदुपपन्नं भवतीत्येके।"[772]

अर्थात् किम् अस्ति अस्य ज्ञापनस्य प्रयोजनम् इति चेदुच्यते- 'न कोपधायाः'[773] इति शास्त्रे कः इति सामान्यतया निर्देशेऽपि तद्धितस्यैव कस्य ग्रहणं कृतम्। न तु कृत्प्रत्ययस्य कस्य ग्रहणं कृतम्। तस्मात् पाका भार्या यस्य सः पाकभार्यः इत्यत्र पुंवद्भावप्रतिषेधः नास्ति। पाकशब्दः तावत् कप्रत्ययान्तः उणादिषु निपातितः अस्ति। तेन 'कोपधप्रतिषेधे' इत्येतदुपपन्नं भवति इति एकेषां मतम्।

अपरेषां मतं तावत्- अन्ये त्वाहुः 'असृ-' इत्येव कथनीये तृन्तृजिति भेदेनोपादानम् 'अर्वणस्तृ'व्यावृत्तये। यद्यप्यर्थवत्परिभाषया तन्निवृत्तिः सिध्यति, तथापि तस्याः परिभाषाया अनित्यत्वज्ञापनाय तयोः पृथगुपादानम्। तेन 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इति सिद्धमित्याहुः इति मतान्तरमपि *तत्त्वबोधिनी*टीकायां प्रतिपादितम् अस्ति।[774]

**अत्रावधेयम्-** अस्मिन् विषये नापि दीक्षितेन नापि *बालमनोरमा*कारेण किमपि उक्तम् अस्ति। *महाभाष्ये* सूत्रमिदं व्याख्यातमेव नास्ति। *तत्त्वबोधिनी*कारेण उल्लिखितं मतद्वयमपि *न्यास*कारेण प्रस्तुतम्। तस्याशयस्तावत् 'तुरिष्ठेमेयस्सु' इत्यत्र तुरिति तृन्-तृचोः यत् समानं रूपं तस्यैव ग्रहणं विहितं न तु भेदेन, तद्वत्रापि

---

772 वै. सि. कौ., प्र. भा., पृ. 278 -279

773 पा. सू. 6.3.37

774 वै. सि. कौ., प्र. भा., पृ. 278 -279

इहापि स्यात्। तदोच्यते- " 'अर्वणस्त्रसावनञः' इति अर्वादेशस्य तृशब्दस्य ग्रहणं मा भूद्"[775] इत्येवमर्थम् तृन्तृजिति भेदेनोपादानम्। किन्तु तदपि प्रयोजनं नास्ति। अर्थवद्ग्रहणपरिभाषया एव तस्य ग्रहणं न भविष्यति। तर्हि तृन्तृजिति भेदेनोपादानम् अर्थवद्ग्रहणपरिभाषाया अनित्यत्वज्ञापनार्थम्। तेन 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति'[776] इति उपपन्नं भवति।

अथवा अन्यत्प्रयोजनं स्यात्। तथा च 'सामान्यनिर्देशे क्वचिद्विशेष एव गृह्यते' इति ज्ञापनाय तृन्तृजिति भेदेनोपादानम्। तेन 'न कोपधायाः' इत्यत्र सामान्योक्तावपि तद्धितवुसम्बन्धी एव ककारः गृह्यते, न तु ककारमात्रम् इति विज्ञेयम्।

## 4.15. अबाधकान्यपि निपातनानि भवन्ति।

ननु 'त्रेस्त्रयः'[777] इति सूत्रे त्रय इत्येतददन्तं वा सान्तं वेति सन्देहः भवति। तत्र 'निजां त्रयाणाम्'[778] इति निर्देशेन अदन्तमिति निर्णयः कार्यः। ननु 'निजां त्रयाणाम्' इति निपातनादेव त्रयादेशे सिद्धे सति 'त्रेस्त्रयः' इति सूत्रस्य

775 का. वृ., प. भा., पृ. 581

776 प. भा. शे., पृ. 80

777 पा. सू. 7.1.53

778 पा. सू. 7.4.75

प्रयोजनं किमिति प्रश्नः, इति चेन्न तथा आक्षेपः कार्यः। 'अबाधकान्यपि निपातनानि भवन्ति' इति ज्ञाप्यते। तेन "पुरातनमिति"[779] सिध्यति।

अर्थात् निजां त्रयाणाम् इति निर्देशेनैव दीर्घादिबाधनेन त्रयादेशस्यापि सिद्धिः स्यात्। तेन 'त्रेस्त्रयः' इति सूत्रं व्यर्थं खलु। एवं 'त्रेस्त्रयः' इति सूत्रं व्यर्थं सद् 'अबाधकान्यपि निपातनानि भवन्ति' इति ज्ञापयति। तथा चोक्तं रामानुजताताचार्येण- " 'णिजां त्रयाणाम्' इति निर्देशादेव त्रयादेशे सिद्धे 'अबाधकान्यपि निपातनानि भवन्ति' इति ज्ञापनार्थमिदं सूत्रम्। तेन पुरातनमिति सिध्यति"[780] इति।

तथा च त्रयादेशनिपातनस्य अबाधकतया पक्षे त्रीणाम् इत्यपि रूपं प्राप्नोति इति तादृशरूपप्राप्तौ तद्वारणार्थं त्रेस्त्रयः इति शास्त्रम् आवश्यकम्। अस्य च ज्ञापनस्य फलं तावत् पुरातनशब्दसिद्धिः। अन्यथा 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु'[781] इति निपातनादेतद्बाध्येत। अर्थात् अन्यथा पुराशब्दात् 'सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च'[782] इति शास्त्रेण प्राप्तौ ट्युट्युलौ तुटं च 'पुराणप्रोक्तेषु'[783] इति निपातनं बाधेत इत्याशयः।

---

779 वै. सि. कौ., प्र. भा., पृ. 260

780 ज्ञा. स., पृ. 191

781 पा. सू. 4.3.105

782 पा. सू. 4.3.23

783 पा. सू. 4.3.105

**अत्रावधेयम्-** अयं ज्ञाप्यविषयः *तत्त्वबोधिनी*टीकायाम् उक्तः अस्ति, *बालमनोरमा*टीकायां दीक्षितवृत्तौ वा आलोचितः नास्ति। *तत्त्वबोधिन्यां* तु 'अबाधकान्यपि निपातनानि भवन्ति' इति ज्ञाप्यं स्वीक्रियते। तस्य फलमपि प्रदर्शितं पुरातनम् इति। तथा च ज्ञानेन्द्रसरस्वत्या प्रोक्तम्- "तेन पुरातनमिति सिध्यति। अन्यथा 'पुराणप्रोक्तेषु-' इति निपातनादेतद्बाध्येत।"[784] इति। *काशिका*कारनये तु त्रीणाम् इत्यपि सिध्यति किन्तु वेदे। तथा च कथ्यते *काशिकायाम्-* "त्रीणाम् इत्यपि छन्दसि इष्यते। त्रीणामपि समुद्राणाम्"[785] इति। तत्र *पदमञ्जरी*-काराशयस्तावत् 'णिजां त्रयाणां गुणः श्लौ'[786] इति निपातनेन त्रयाणाम् इति सिद्धं भवति। तर्हि तु 'त्रेस्त्रयः' इति सूत्रस्य नैव आवश्यकता भवेत्। एवञ्च सिद्धे सति आरभमाणम् इदं सूत्र ज्ञापकं भवति 'अबाधकान्यपि निपातनानि भवन्ति' इत्यस्य। तेन पुरातनमिति सिध्यति, अन्यथा 'पुराणप्रोक्तेषु' इति निपातनेन बाधितत्वान्न सिध्येत्। तदनुसारेण त्रीणाम् इत्यपि वेदे साधु। तथा चोक्तं *पदमञ्जरी*कारेण- " 'त्रीणामपीष्यते छन्दसि।' एतच्चापीत्यधिकाराद्वा 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वा लभ्यते। "[787] इति। महाभाष्यादिषु तु अस्य ज्ञाप्यस्य विषये तत्सूत्रे आलोचनं न प्राप्यते। *काशिका*दिषु त्रीणाम् इत्यस्य वेदे साधुत्वं प्रदर्शितम् इति विज्ञेयम्।

784 वै. सि. कौ., प्र. भा., पृ. 260
785 का. वृ., प. भा., पृ. 631
786 पा. सू. 7.4.75
787 का. वृ., प. भा., पृ. 631

## 4.16. अवस्था संस्थेति व्यवस्थायाम् इति ज्ञापकात्।

'स्त्रियां क्तिन्'[788] 'स्थागापापचो'[789] इति शास्त्रेण ष्ठा गतिनिवृत्तौ इति भ्वादिगणीयस्थाधातोः भावे क्तिन्प्रत्ययस्य विधानं भवति। किन्तु ततः विधीयमानः असौ प्रत्ययः 'आतश्चोपसर्गे'[790] इति शास्त्रेण विधीयमानस्य अङ्प्रत्ययस्य अपवादः। यथा पचेः विधीयमानः क्तिन्प्रत्ययः 'षिद्भिदादिभ्योऽङ्'[791] इति योगेन विधीयमानस्य अङ्प्रत्ययस्य अपवादः। एवञ्च स्थाधातोः क्तिन्प्रत्यये विधीयमाने प्रस्थितिः, उपस्थितिः इत्यादीनि रूपाणि सिध्यन्ति।

यदि एवं सिध्यति तर्हि तु 'अवस्था', 'संस्था' इत्यादीनाम् अङन्तानां शब्दानां कथं साधुत्वं स्यादिति आशङ्का। एवञ्च तादृशीम् आशङ्कां मनसि निधाय तत्समाधानाय वैयाकरणशिरोमणिः भट्टोजिदीक्षितः ब्रूते- "कथम् अवस्था संस्था इति। व्यस्थायाम् इति ज्ञापकात्।"[792] अर्थात् 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्'[793] इत्यत्र 'व्यवस्थायाम्' इति सौत्रनिर्देशात् स्थाधातोः परं भावे स्त्रियाम् अङपि विधीयते इति ज्ञाप्यते। तेन नोक्तदोषः।

---

788 पा. सू. 3.3.94

789 पा. सू. 3.3.95

790 पा. सू. 3.3.106

791 पा. सू. 3.3.104

792 वै. सि. कौ., च. भा., पृ. 334 -335

793 पा. सू. 1.1.34

**अत्रावधेयम्-** अत्र यद् ज्ञापकम् उक्तं तस्य तावद् अन्यत् फलं न लभ्यते, केवलं स्वांशे चारितार्थ्यमात्रम् इत्यवधेयम्।

पुनश्च 'स्थागापापचो' इति शास्त्रेण स्थादिभ्यः विधीयमानः क्तिन्प्रत्ययः "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्"[794] इति पुरस्तदपवादन्यायेन 'आतश्चोपसर्गे'[795] इति शास्त्रेण प्राप्तस्य अङ्प्रत्ययस्य बाधकः तथा च 'षिद्भिदादिभ्योऽङ्' इति शास्त्रेण प्राप्तस्य अङ्प्रत्ययस्य बाधकः, न तु ण्वुलिञोः। ण्वुलिञौ प्रत्ययौ तु परत्वाद् भवतः एव। अत्र तावत् प्रमाणम्- "का त्वं स्थायिकां त्वं स्थायिमिति भाष्यप्रयोगः।"[796]

*काशिका*कारमतं तावत्- 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इति ज्ञापकेन क्तिन्प्रत्ययेन अत्यन्ताय बाधा न भवति, तेन अवस्था संस्था इत्येतेषां साधुत्वम् उपपद्यते। *न्यास*कारस्यापि अत्र समर्थनम् अस्ति। तस्य अभिप्रायस्तावत् यदि अङः अपवादः अयं क्तिन्प्रत्ययः स्यात् तर्हि अवस्था, संस्था इति कथञ्चित् न सिध्येत्। तत्र समाधानं दीयते 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इति सूत्रे अङन्तस्य व्यवस्थाशब्द्स्य उच्चारणमेव ज्ञापकं भवति क्तिनात्यन्तबाधा न भवति इति। तेन अवस्था, संस्था इत्याद्यपि सिध्यति। अत्र *पदमञ्जरी*काराशयस्तावत् यथैव अङः बाधकः भवति क्तिन्प्रत्ययः तथैव

---

794 प. भा. शे., पृ. 288

795 पा. सू. 3.3.106

796 वै. सि. कौ., च. भा., पृ. 334 -335

ण्वुलिञोरपि बाधकः भवेत्। तदोच्यते तथा न भवति, 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषाबलात्। तथा चोच्यते- "कां स्थायिकाम्, स्थायिमित्यत्र 'विभाषाख्यानपरिप्रश्नयोः'[797] इति प्राप्तयोर्ण्वुलिञोरपि बाधकः कस्मान्न भवति 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति।[798]"

*महाभाष्य*काराशयस्तावत् स्थादिभ्यः सर्वापवादः क्तिन्प्रत्ययः प्राप्नोति, क्तिना यथैव अङ्प्रत्ययः बाध्यते तथैव ण्वुलिञौ अपि बाध्येते- "कां त्वं स्थायिकां कां त्वं स्थायिम्"[799] इति प्रयोगः साधु न स्यात्। तथापि दोषः नास्ति। "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्"[800] इत्यनेन स्त्रियां क्तिन्प्रत्ययः अङः बाधते न तु ण्वुलिञौ। एवञ्च *महाभाष्य*कारादिवैयाकरणग्रन्थानाम् अध्ययनेन इदम् आयाति यत् 'स्थागापापचो' इति शास्त्रेण स्थादिभ्यः विधीयमानः क्तिन्प्रत्ययः "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इति पुरस्तदपवादन्यायेन 'आतश्चोपसर्गे' इति शास्त्रेण प्राप्तस्य अङ्प्रत्ययस्य बाधकः तथा च 'षिद्भिदादिभ्योऽङ्' इति शास्त्रेण प्राप्तस्य अङ्प्रत्ययस्य बाधकः, न तु 'विभाषाख्यानपरिप्रश्नयोः' इति प्राप्तयोः ण्वुलिञोरपि बाधकः। ण्वुलिञौ प्रत्ययौ तु परत्वाद् भवतः एव।

---

797 पा. सू. 3.3.110

798 का. वृ., प. भा., पृ. 631-632

799 म. भा., तृ. ख., सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च, पृ. 213

800 प. भा. शे., पृ. 288

**4.17. विभाषा फाल्गुनीश्रवणा कार्तिकीचैत्रीभ्यः इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञाप्यते तेन पुष्ययुक्ता पौर्णमासी पौषीति सिध्यति।**

ननु 'नक्षत्रेण युक्तः कालः'[801] इति शास्त्रेण विहितस्य अण्प्रत्ययस्य 'लुबविशेषे'[802] इति शास्त्रेण षष्टिदण्डात्मककालस्य अवान्तरविशेषः न ज्ञायते चेत् लुप् भवति इति कथ्यते। तथा च *बालमनोरमा*कारः कथयति- "षष्टिघटिकापरिच्छिन्ने काले एकैकस्मिन् एकैकेन नक्षत्रेण चन्द्रमा युज्यते इति स्थितिः। तस्य षष्टिदण्डस्य कालस्य अवान्तरविशेषः अहर्वा रात्रिर्वेति न गम्यते चेदित्यर्थः।"[803] तस्य उदाहरणं हि- अद्य पुष्यः इति। अत्र हि न ह्यः न श्वः इति विशेषः ज्ञायते चेदपि अहोरात्रात्मककालावान्तरविशेषस्य तु अनवगमः भवति, तस्मात् लुप् भवति। *तत्त्वबोधिनी*काराशयस्तावत् 'अद्य पुष्यः' इत्युक्त्या 'न ह्यो न श्वः' इति विशेषे गम्यमाने अपि अहोरात्रात्मककालस्य अवान्तरविशेषस्य अनवगमात् लुब् भवत्येव। 'अविशेषे' इत्यत्र प्रसज्यप्रतिषेधाश्रयणात् 'पौषोऽहोरात्रः' इत्यत्र लुब् नास्ति, षष्टिदण्डसमुदायरूपकालस्य नक्षत्रेण चन्द्रमा युज्यत इति स्थितिः। तस्य षष्टिदण्डस्य कालस्य अवान्तरविशेषः अहर्वा रात्रिर्वेति न गम्यते चेदित्यर्थः। एवञ्च अयमहोरात्रः पुष्ययुक्तचन्द्रमसा युक्त इत्यर्थः। तत्र अहर्वा

---

801 पा. सू. 4.2.3

802 पा. सू. 4.2.4

803 वै. सि. कौ., द्वि. भा., पृ. 344

रात्रिर्वेति विशेषानवगमाद् अणः लुप् भवति। एवञ्च पुष्ययुक्ता पौर्णमासी पौषी इत्यत्रापि अहोरात्रात्मककालावान्तरविशेषस्य तु अनवगमः अस्ति, तर्हि तत्र अण्प्रत्ययस्य लुप् भवेत् इत्येवम् आशङ्का उदेति। तत्समाधानाय शाब्दिकचक्रचक्रवर्ती दीक्षितः वदति- "कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषी इति। विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात्।"[804] अर्थात् फल्गुन्या युक्ता पौर्णमासी इत्यर्थे फाल्गुनी इति लुपं विना यः निर्देशः अस्ति तस्मात् अयं लुप्प्रत्ययः पौर्णमास्यां नक्षत्रयुक्तायां न प्रवर्तत इति भावः। अर्थात् पौर्णमास्याः षष्टिदण्डात्मिकाया अवान्तरविशेषानवमाद् अणः लुप् भवेत् इति शङ्का विहिता। तत्र दीक्षितोक्तसमाधानं स्पष्टीकरोति *तत्त्वबोधिनी*कारः- फाल्गुनीकार्तिकीचैत्रीशब्दानां नक्षत्राण्विशिष्टानां पौर्णमास्यां प्रयोगदर्शनात् पौर्णमास्यां नक्षत्रयुक्तायां 'लुबविशेषे' इत्ययं लुब् न इति ज्ञापितत्वात् पौषी पौर्णमासी इत्यत्र लुब् न भवति इति विज्ञेयम्।

अत्र काचित् पुनः शङ्का- ननु तर्हि श्रवणयुक्तपौर्णमास्यां लुबभावात् कथं श्रवणेति निर्देशः सङ्गच्छते। एवम् अस्याः शङ्कायाः निरसनं करोति दीक्षितः- "श्रवणशब्दात्तु अत एव लुब् युक्तवद्भावाभावश्च।"[805] अर्थात् श्रवणेति निपातनादेव पौर्णमासीत्यत्र न लुबित्यर्थः। ननु 'कृत्तिका श्रवणः पुष्यः चित्रास्वात्योर्यदन्तरम्।' इत्यादौ श्रवणशब्दस्य पुंलिङ्गत्वदर्शनेन तस्मादणो लुपि कृते लुपि युक्तवद्व्यक्तिवचने

---

804 तदेव, पृ. 345

805 तत्रैव

इति पुंलिङ्गत्वावश्यंभावाच्छ्रवणेति कथं स्त्रीलिंगता इति चेद् उच्यते युक्तवद्भावाभावश्चेति निपातनात्। अत एव दीक्षितः ब्रूते- अर्थात् यद्यपि श्रवणा इति लुपा निर्देशेन कथम् एवं ज्ञापयितुं शक्यते इत्याशङ्का जायते तथापि तथा निर्देशेन तत्र परं लुबभावः ज्ञाप्यते इत्याशयः।

ननु तर्हि श्रावणी इति नैव स्यादिति आशङ्का। तत्समाधानाय दीक्षितेन उच्यते- "अबाधकान्यपि निपातनानि। श्रावणी।"[806] तदेव *पदमञ्जर्या*म् उक्तम्- "कथं तर्हि श्रावण्यां पौर्णमास्यामिति अबाधकान्यपि निपातनानि भवन्ति"[807] इति।

यद्यपि तत्रैव श्रवणा इति लुपा निर्देशात्कथमेवं ज्ञापयितुं शक्यत इति शङ्का अवतरति तथापि तथा निर्देशात् तत्र परं लुबभावः ज्ञाप्यत इति भावः। एतदेव *पदमञ्जरी*कारः कथयति- "श्रवणशब्दात्तु भवति- 'श्रवणाकार्त्तिकी' इति निर्देशादेव।"[808]

**इदमत्रावधेयम्-** अबाधकान्यपि निपातनानि इति "इयं परिभाषावृत्तौ स्थिता। सर्वादिसूत्रभाष्ये तु 'बाधकान्येव निपातनानि' इत्युक्तम्"[809] इति *तत्त्वबोधिनी*कारः। महावैयाकरणस्य नागेशस्य *परिभाषेन्दुशेखराख्य*ग्रन्थे तु बाधकान्येव निपातनानि[810] इत्युक्तम्। अत्र भाष्यकाराशयस्तावत् पौषी रात्रिः,

---

806 तत्रैव

807 का. वृ., तृ. भा., पृ. 512

808 तत्रैव

809 वै. सि. कौ., द्वि. भा., पृ. 345

810 प. भा. शे., पृ. 444

पौषमहः इत्यत्र रात्रिः इत्युक्ते अहः न इति गम्यते, अहः इत्युक्ते रात्रिः न इति गम्यते इति विशेषस्य अवगमात् लुप् न भवति। तर्हि अद्य पुष्यः इत्यत्र लुप् न स्यात्। कारणं हि अद्य इत्युक्ते न ह्यः न श्वः इति गम्यते इति अत्रापि विशेषः गम्यते इति हेतोः लुप् न स्यात् अत्र। अत्रापि विशेषः गम्यते चेदपि अविशेषः अपि अस्ति खलु। अद्य इत्युक्ते न ज्ञायते रात्रौ दिवा वेति यतः अविशेषः तदाश्रयः लुब्भविष्यति। तर्हि पौषमहः इत्यत्रापि लुप्प्रसङ्गः, रात्रिः इत्युक्ते कदा इति तु न ज्ञायते, दिवा इत्यक्ते कदा इति न ज्ञायते। यतः अविशेषः तदाश्रयः लुप्प्राप्नोति। एतदेव कैयटेनोच्यते- "पौषमहरित्यहर्विशेषानवगमादस्त्यविशेष इति लुप्प्रसङ्गः"[811] इति। सिद्धान्ते तु भाष्यकारः कथयति- अहोरात्रः इति नक्षत्रेण युक्तस्य कालस्य अविशेषे लुप् भवति इति विज्ञेयम्। *उद्द्योत*कारः कथयति यत् "अहोरात्रस्य यदावान्तररात्र्याद्यवयवविशेषाविवक्षा तदा लुप्। विशेषविवक्षायां तु श्रवणम्। पौषोऽहोरात्र इत्यत्रापि विशेषस्य शब्देनाश्रितत्वाल्लुबभावः"[812] इति। पुनश्च 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः'[813] इति निपातनात् श्रवणा रात्रिः इत्यत्र युक्तवद्भावः न भवति। अर्थात् विभाषा फाल्गुनीति सूत्रे श्रवणा इति निर्देशेन श्रवणशब्दाद्युक्ता पौर्णमासीत्यर्थे प्रत्यये तस्य च लुपि लुपि युक्तवदित्यनेन प्राप्तः युक्तवद्भावः न भवति इति ज्ञाप्यते इत्यर्थः। *काशिका*कारनये अपि 'विभाषा फाल्गुनीश्रवणा-

811 म. भा., च. ख., सम्पा. भार्गवशास्त्री, पृ. 162

812 तत्रैव

813 पा. सू. 4.2.23

कार्तिकीचैत्रीभ्यः' इति निपातनाद् लुपि युक्तवद्भावः न भवति। स एवाशयः *पदमञ्जर्यां* स्पष्टीक्रियते- " 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' इति निर्दिशति, तज्ज्ञापयति- पौर्णमास्यां लुब्न भवति"[814] इति। *पदमञ्जरी*कारः विशेषाविशेषव्यवस्थां स्पष्टीकरोति। कियान् कालः नक्षत्रेण युज्यते इति चेत् "षष्टिनाडिकात्मककालः। तावन्तं हि कालमेकस्य नक्षत्रस्य समीपे चन्द्रमा वर्तते।"[815] तदेतदेवं यावान्कालः नक्षत्रेण युज्यते तस्य सर्वस्य प्रत्ययान्तेन अभिधानम् अविशेषः, तदेकदेशस्य अभिधानं विशेषः। तच्च प्रत्ययान्ते अनुप्रवेशाद् अन्तरङ्गत्वात् च लभ्यते। अत्र *न्यास*कारकथनं तावत् कियान् कालः नक्षत्रेण युज्यते- अहोरात्रः। तदेवं यावान् कालः नक्षत्रेण युक्तः तस्य अविशेषे गम्यमाने लुपा भवितव्यम्। तेन च पौषी रात्रिः, पौषमहः इत्यत्र यावान् कालः नक्षत्रेण युक्तः तस्य अविशेषः गम्यते, अपि तु तदेकदेशस्य रात्रेः अह्नो वेति नायं लुपः विषयः। तदा तु प्रत्ययस्य अपि कथम् एकदेशः विषयः स्यात्। समुदायद्वारेण तदन्तःपातिनः गृह्यन्ते। एकदेशानामपि योगात् पूर्वेण प्रत्ययोत्पत्तिः सिद्धा भवति। तेन पुनः अवयवस्य एकदेशः लुपः विषयः। पौषः अहोरात्रः इत्यत्रापि लुप् प्राप्नोति, अत्र यावान् कालः नक्षत्रेण युक्तः तस्य अविशेषः गम्यते। एवञ्च अहोरात्रः इत्युक्ते सति नावगम्यते किमतीतः, अथानागतः अथ वर्तमानः इति। एतस्य समाधानं प्रदीयते- अविशेषः इति

---

814 का. वृ., तृ. भा., पृ. 512

815 तदेव, पृ. 511

प्रसज्यप्रतिषेधः। तेन नक्षत्रयुक्तस्य कालस्य यत्र विशेषः रात्र्यादिस्तत्र न लुप् भवति, यत्र अविशेषः तत्र लुप् भवति।

एवमत्र *महाभाष्यकाशिका*दिग्रन्थपरिशीलनेन लुबविशेषे इति अविशेषः स्पष्टीकृतः। कथं वा पौर्णमास्यां लुब्न भवति इति विषयविशेषः अपि विस्तरशः आलोचितः।

## 4.18. संपूर्वस्य क्वचिदभूषणेऽपि सुट्। संस्कृतं भक्षाः इति ज्ञापकात्।

संपूर्वकात् परिपूर्वकात् च करोतेः भूषणार्थे संघातार्थे च सुट्प्रत्ययस्य विधानं भवति 'संपरिभ्यां करोतौ भूषणे'[816] 'समवाये च'[817] इति शास्त्राभ्याम्। वस्तुतः न केवलं तयोः अर्थयोः एव सुड्विधीयते, अपि तु अर्थान्तरेऽपि सुड्विधीयते, तद्यथा 'संस्कृतं भक्षाः'[818] इत्यस्मिन् शास्त्रे उदाहरणं प्रदीयते भट्टोजिदीक्षितेन- "अष्टसु कपालेषु संस्कृतः पुरोडाशः इति।"[819] अत्र च सुट् इति दृश्यते। एतत्समर्थनाय दीक्षितः 'संपरिभ्यां करोतौ' इत्यस्मिन् योगे ब्रूते- "संपूर्वस्य क्वचिदभूषणेऽपि सुट्।"[820] 'संस्कृतं भक्षाः' इति सूत्रे संस्कृतशब्दस्य भोजनाद्युपयोगफलकक्रियाविषयीकृता इत्यर्थः। "संस्कारो नाम पाकादिना

816 पा. सू. 6.1.137
817 पा. सू. 6.1.138
818 पा. सू. 4.2.16
819 वै. सि. कौ., द्वि. भा., पृ. 349
820 वै. सि. कौ., तृ. भा., पृ. 375

गुणविशेषाधानम्।"[821] भ्राष्ट्रे संस्कृताः भ्राष्ट्रा यवाः[822], भ्राष्ट्रे संस्कृता भक्षा भ्राष्ट्रा अपूपाः[823] इत्युदाहरणदर्शनात्। एवञ्च "अभूषणेऽपि सुटः निर्देशेन तत्साधुत्वं ज्ञायते"[824] इति रामानुजताताचार्यः ब्रूते।

**इदमत्रावधेयम्-** *भाष्य*कारादिस्तु इदं सूत्रमेव न व्याख्यातवान्। असौ विषयः अपि तत्र नोपस्थापितः। *काशिकायां* तु ज्ञाप्यमिदम् उल्लिखितम्। तथा च तेनोक्तम्- "सम्पूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते- संस्कृतमन्नमिति"[825] अस्य तु ज्ञापकं 'संस्कृतं भक्षाः' इति संस्कृतमिति निर्देशः। तथा चोक्तं *पदमञ्जर्या*म्- " 'संस्कृतं भक्षाः' इति निर्देशाल्लभ्यते"[826] इति। *न्यासे* अपि कथ्यते- " 'संस्कृतं भक्षाः' इत्याचार्यप्रवृत्तेर्लिङ्गात्। एवञ्च दीक्षितादि*काशिका*कारादिनये संपूर्वस्य क्वचिदभूषणेऽपि सुट् सिध्यति, 'संस्कृतं भक्षाः' इति पाणिनीयनिर्देशात्।

821 वै. सि. कौ., द्वि. भा., पृ. 349
822 ज्ञा. स., पृ. 192
823 का. वृ., तृ. भा., पृ. 21
824 ज्ञा. स., पृ. 192
825 का. वृ., च. भा., पृ. 615
826 तत्रैव

## 4.19. इष्णुज्ग्रहणे खिष्णुचो द्व्यनुबन्धकस्यापि ग्रहणम् इकारादेर्विधानसामर्थ्यात्। अनाढ्यभविष्णुः।

तत्र तावत् प्रश्नः समुदेति यत्- अनाढ्यः आढ्यः भवति इति आढयंभविष्णुः इत्यत्र च्व्यर्थे कर्तरि उपपदे भूधातोः 'कर्तरि भुवः खिष्णुच्खुकञौ'[827] इति सूत्रेण खिष्णुच्प्रत्ययः विधीयते। तत्र न आढयंभविष्णुः अनाढ्यंभविष्णुः इति नञ्समासे विहिते सति 'कृत्योकेष्णुच्चार्वादयश्च'[828] इति शास्त्रेण यः अन्तोदात्तस्वर इष्यते, स न भवेत्। तत्र तु एकानुबन्धकः इष्णुच् गृहीतः। अत्र तु द्व्यनुबन्धकः खिष्णुच्। तर्हि इष्णुचा खिष्णुचः ग्रहणं न स्यात्।

ईदृशीं शङ्कां मनसि निधाय दीक्षितः ब्रूते यत् "इष्णुज्ग्रहणे खिष्णुचो द्व्यनुबन्धकस्यापि ग्रहणम् इकारादेर्विधानसामर्थ्यात्।"[829] तत्र *बालमनोरमा-*टीकायामुच्यते यत् "भवतेरुदात्तत्वात्ततः परस्य खिष्णुचः इटैवेकारादित्वे सिद्धे इकारादेर्विधानमिह सामान्यग्रहणार्थमेवेति भावः।"[830] अर्थाद् भवतेः खिष्णुच्प्रत्ययं विधाय इडागमेन एव इकारादित्वं साधयितुं शक्यम्। तस्मात् इकारादेः खिष्णुचः विधानम् इष्णुच् इत्यनेन खिष्णुचोऽपि ग्रहणार्थम् इति ज्ञापयति। तेन नोक्तदोषः सम्भवति।

---

827 पा. सू. 3.2.57
828 पा. सू. 6.2.160
829 वै. सि. कौ., च. भा., पृ. 587
830 तत्रैव

**अत्रावधेयम्-** *काशिका*नुसारेणापि ज्ञाप्यमिदं प्रोक्तम्। तन्मते अपि इष्णुज्ग्रहणे 'कर्तरि भुवः खिष्णुच्खुकञौ' इत्यस्य द्व्यनुबन्धकस्य अपि ग्रहणम् इकारादेर्विधानसामर्थ्याद्। तेन "अनाढ्यम्भविष्णुः, असुभगम्भविष्णुः"[831] इत्यादि सिध्यति।

तत्र *पदमञ्जर्या*म् उच्यते यत् द्व्यनुबन्धकस्यापि ग्रहणं भवति, इकारादेः विधानसामर्थ्याद्। भवतेरुदात्तत्वात्ततः परस्य खिष्णुचः इटैव इकारादित्वे सिद्धे सति इकारादेः विधानम् अत्र सामान्यग्रहणार्थमेव इत्याशयः। *न्यास*कारः इत्थम् आक्षिपति यत् एकानुबन्धकग्रहणपरिभाषया इष्णुज्ग्रहणे द्व्यनुबन्धकस्य खिष्णुचः ग्रहणेन न भवितव्यमिति कस्यचिद्भ्रमः स्यात्, तां शङ्कां दूरीकर्तुम् उच्यते- इष्णुज्ग्रहणे 'कर्तरि भुवः खिष्णुच्खुकञौ' इत्यस्य द्व्यनुबन्धकस्य अपि ग्रहणं भवति, इकारादेर्विधानसामर्थ्याद्। तथा च *न्यास*कारेणोच्यते- "खिष्णुचः इकारादेर्विधानस्यैतदेव प्रयोजनम्- इह सूत्रे सामान्येन ग्रहणं यथा स्यात्, अन्यथा तदपार्थकं स्याद्"[832] इति। एवञ्च इष्णुचा खिष्णुचः ग्रहणं भविष्यति एव।

*महाभाष्ये* तु सूत्रमिदं व्याख्यातमेव नास्ति।

831 का. वृ., प. भा., पृ. 453

832 तत्रैव

## 4.20. वुञ्छुणादिषु ठचश्चित्त्वेन इकादेशोऽन्तरङ्गेभ्यो बलवान्।

ननु श्वस्शब्दादुत्तरं 'श्वसस्तुट् च'[833] इति शास्त्रेण ठञ्प्रत्यये विहिते सति प्रत्ययसन्नियोगशिष्टत्वेन अन्तरङ्गत्वाद् इकादेशात् पूर्वं तुडागमे विहिते सति ठस्य प्रत्ययादित्वाभावात् कर्मठ इत्यत्र अठचष्ठकारस्य इव इकादेशः न भवेत्।

अङ्गात्परस्य ठस्येकादेशः स्यादित्यर्थके 'ठस्येकः'[834] इति शास्त्रे *बालमनोरमा*याम् प्रश्नः पृच्छ्यते यत् अङ्गात्किम्। कर्मठ इत्यत्र ठकारस्य न भवति इकादेशः। अत्र भाष्ये अङ्गसम्बन्धिठस्येति व्याख्याने कर्मठ "इत्यत्र सुपं प्रति कर्मठशब्दस्याङ्गत्वात्तदीयठस्य इकादेशमाशङ्क्य अङ्गसंज्ञानिमित्तं यष्ठकारस्तस्येको भवति, तादृशश्च ठकारः प्रत्ययः एव भवति, न च इह ठकारः प्रत्ययः इति समाहितम्।"[835] एवञ्च अङ्गात्परस्य ठकारस्य एव इकादेशविधानाद् इति शङ्कायाम् उच्यते 'वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यककठकोऽरीहणकृशा-श्व-श्वर्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः'[836] इत्यस्मिन् योगे ठचश्चित्करणं हि अन्तोदात्तत्वार्थम्। तत्र चित्करणाभावेऽपि इकादेशात् पूर्वम् एव अन्तरङ्गत्वाद् 'आद्युदात्तश्च'[837] इति ठस्य अकारस्य उदात्तत्वे विहिते सति पश्चाद् इकादेशे सति अन्तोदात्तत्वसिद्धिः भविष्यति। तर्हि किं

---

833 पा. सू. 4.3.15

834 पा. सू. 7.3.50

835 वै. सि. कौ., द्वि. भा., पृ. 328

836 पा. सू. 4.2.80

837 पा. सू. 3.1.3

चित्करणेन प्रयोजनम्। तत् क्रियमाणम् चित्करणं ज्ञापयति 'इकादेशोऽन्तरङ्गेभ्यो बलवान्' इति।

एवञ्च प्रथमतः इकादेशानन्तरम् 'आद्युदात्तश्च' इति स्वरप्रवृत्तौ सत्याम् इकारः एव उदात्तः स्यात् न तु अन्तः उदात्त इत्येवं चित्करणम् इति स्वांशे चारितार्थ्यम्। तत्प्रयोजनं तु शौवस्तिकम् इत्यादौ अन्तरङ्गात् तुडागमात् पूर्वमेव इकादेशप्रवृत्त्येष्टरूपसिद्धिः इति। अत्र ठचश्चित्त्वेनेत्युपलक्षणम्, ठचश्चित्त्वं सामान्यापेक्षं ज्ञापकम् 'प्रत्ययसंबन्ध्यादेशा अन्तरङ्गेभ्यो बलवन्तः' इति इत्यादिकं *शब्दरत्ने* स्पष्टम् इति रामानुजताताचार्यः।[838]

**इदमत्रावधेयम्-** यद्यपि *काशिका*याम् अस्य विषये किमपि नोक्तम्। तथापि *पदमञ्जर्यां न्यासे* च प्रकृतज्ञाप्यविषयिणी चर्चा विहिता। तथा हि *पदमञ्जरी*नये- तत्र तुडागमः इकादेशे विहिते सति इति विज्ञेयम्। अन्तरङ्गत्वाद् इकादेशात् प्राक् ठञः तुट् प्राप्नोति, इकादेशस्तु बहिरङ्गः कथमिति चेत् अङ्गाधिकारे विधानाद् अङ्गसंज्ञायाम् अभिनिर्वृत्तायां पश्चाद् भवन् बहिरङ्गः, तुटि च विहिते प्रत्ययादेः ठस्य इकादेशविधानाद् यथा कर्मठ इत्यत्र न भवति एवम् शौवस्तिकम् इत्यत्रापि न स्यात्। यदि च पुनः अयं तुक् पूर्वान्तः विधीयते, तन्न शक्यम्। 'इसुसुक्तान्तात्कः'[839] इति कादेशः स्यात्, तस्मात् परादिः अस्तु। कथं तर्हि इकादेशः, तदुत्तरं दीयते *पदमञ्जरी*कारेण- "ज्ञापकात्सिद्धम्, यदयं वुञ्छणादिषु

838 ज्ञा. स., पृ. 192

839 पा. सू. 7.3.51

ठचश्चित्करणं करोति, तज्ज्ञापयति- 'अन्तरङ्गेभ्योऽपि पूर्वमिकादेश एव भवतीति।' यदि न स्यात्, प्रत्ययसंज्ञासन्नियोगशिष्टे प्रत्ययस्वरे कृते पश्चादिकादेश इति सिद्धमन्तोदात्तत्वं स्यात्"[840] इति। *न्यास*कारनये अपि- उपदेशावस्थायाम् एव इकादेशे विहिते न भवितव्यम्, ज्ञापकात्, यदयं 'वुञ्छण्कठच्' इति प्रत्ययस्वरार्थम् अनुबन्धं चकारं करोति। प्रत्ययसंज्ञायाः सन्नियोगाद् हि प्रत्ययस्वरे विहिते पश्चाद् इकादेश इति सिद्धमन्तोदात्तमिति *न्यास*कारः। अत्र प्रश्नः, तर्हि चित्करणं कुत इति। "चित्करणादेव विज्ञायते सन्नियोगशिष्टेभ्योऽपि पूर्वमिकादेशो भवति"[841] इति। तस्य फलं तावत् तज्ज्ञाप्येन ठग्ग्रहणानि अङ्गसंज्ञाभूतानि इकमेव बोधयन्ति इति तुडपि तस्यैव भविष्यति इति विज्ञायते। 'वुञ्छण्कठच्' इति शास्त्रं तु भाष्ये व्याख्यातं नास्ति। स्पष्टप्रतिपत्तये 'श्वसस्तुट् च' इत्यत्रत्यः भाष्यग्रन्थः अनुसन्धेयः।

## 4.21. सर्वे विधयश्छन्दसि वैकल्पिकाः।

षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि घिसंज्ञः वा स्यादित्यर्थकं 'ष्ठीयुक्तश्छन्दसि वा'[842] इति शास्त्रम् अस्ति। तत्र षष्ठीयुक्तश्छन्दसि वा इत्यस्य योगविभागः क्रियते। योगः नाम सूत्रम्। षष्ठीयुक्तश्छन्दसि इत्येकः योगः (सूत्रम्), वा इति अपरः योगः (सूत्रम्)। 'वा' इति द्वितीयसूत्रे छन्दसि इति पदम् अनुवर्तते।

---

840 का. वृ., तृ. भा., पृ. 628

841 तत्रैव

842 पा. सू. 1.4.9

तेन 'वा छन्दसि' इति द्वितीयसूत्रस्य आकारः। तत्र प्रथमसूत्रस्य अर्थो हि वेदविषये षष्ठ्यन्तेन युक्तः पतिशब्दः घिसंज्ञको भवति इति। द्वितीयसूत्रार्थस्तावत्-व्याकरणशास्त्रे यावत् कार्यम् वर्तते तद् वेदे विकल्पेन भवति इति। तेन प्रथमसूत्रेण यो विधिः उक्तः सोऽपि विकल्पेन भवति इत्यायाति। एवञ्च योगविभागे कृते द्वितीययोगेन प्रथमसूत्रस्य यः अर्थः आयातः स तु पाणिनिकृतेन षष्ठीयुक्तश्छन्दसि वा इति मूलसूत्रेणैव सिद्धः। अतः अयम् योगारम्भः व्यर्थः भवति। व्यर्थः सन् ज्ञापयति यत् सर्वे विधयश्छन्दसि विकल्प्यन्ते इति। तेन योगारम्भे कृते सति प्रथमसूत्रेण यो विधिः उक्तः सः विकल्पेन भवति इति सिध्यति। एवं योगविभागः स्वांशे चरितार्थः। अन्यत्रापि अस्य फलम् अस्ति। यथा प्रतीपमन्य उर्मिर्युद्ध्यति इति आत्मनेपदप्रयोगस्थले युद्ध्यति इति परस्मैपदप्रयोगोऽपि भवति। योगारम्भः न क्रियते चेत् षष्ठीयुक्तश्छन्दसि वा इति सूत्रे यत् विकल्पत्वम् उच्यते तत् तस्मिन्नेव स्यात्। अन्यत्र न स्यात्।किन्तु अन्यत्रापि विकल्पत्वम् यथा स्यात् तदर्थम् अयम् योगविभागः कृतः। तथा च *बालमनोरमा*कारः कथयति यत् "यावदिह शास्त्रे कार्यं तच्छन्दसि वा स्यात्।"[843] अस्मिन् विषये *तत्त्वबोधिनी*टीकायां किमपि उक्तं नास्ति। "बहुलं छन्दसि इत्यादिः तस्यैव प्रपञ्चः"[844] इति दीक्षितः। तेन प्रथमसूत्रेण विधीयमानं कार्यं छन्दसि विकल्पेन इति लभ्यते। अत एव सीतायाः पतये इति (रामरक्षा), पशूनां पतये नमः

843 वै. सि. कौ., च. भा., पृ. 381

844 तत्रैव

(रूद्रनमकम्), पर्वतः सरितां पतौ (रामायणम्- सुन्दरकाण्डम्) इत्यादयः प्रयोगाः सिध्यन्ति।

**अत्रावधेयम्-** प्रकृतयोगविभागः प्रकृतज्ञाप्यं च दीक्षितोक्तमेव। *काशिकायां* तु तस्मिन् सूत्रे अस्मिन् विषये किमपि आलोचनं नैव विहितम्। *न्यासपदमञ्जर्या*दिषु तु योगविभागः इष्टः। तथा चोक्तं *पदमञ्जरी*कारेण- "यच्च यावच्च शास्त्रे कार्यं तत्सर्वं छन्दसि विकल्पेन भवति। सर्वे विधयश्छन्दसि विकल्प्यन्ते इत्यर्थः। उभयत्रविभाषा चेयम्। बहुलं छन्दसि इत्यादिकस्त्वस्या एव प्रपञ्चः"[845] इति।

*भाष्य*कार*प्रदीपकारोद्योत*काराणां नये अपि योगविभागः सिध्यति, सर्वे विधयश्छन्दसि विकल्प्यन्ते इति ज्ञाप्यमपि प्रोक्तम्। "यावदिह शास्त्रे कार्यं तच्छन्दसि वा भवति, तत्रानयैव सिद्धत्वाद्बहुलं छन्दसीत्यादि न वक्तव्यम्। एतदर्थश्च व्यत्ययो बहुलमित्यत्र योगविभागो न व्याख्येयः।"[846] इति *प्रदीप*कारस्याशय.। भाष्ये अस्य ज्ञाप्यस्य विषये किमस्ति वैशिष्ट्यम् इति चेत् तत्र नैकानि फलानि प्रदर्शितानि सन्ति। तथा च सुपां व्यत्ययस्तावत् 'युक्ता मातासीद्धुरि दक्षिणायाः' इत्यत्र दक्षिणायामिति प्राप्ते सुब्व्यत्ययेन दक्षिणायाः इति प्रयोगः सम्भवति। तिङां व्यत्ययः- 'चषालं ये अश्वयूपाय तक्षति' इत्यत्र तक्षन्ति इति प्राप्ते तिङ्व्यत्ययेन तक्षति इति प्रयोगः भवति। वर्णव्यत्ययस्तावत्- 'त्रिष्टुभौजः

---

845 का. वृ., प्र. भा., पृ. 511

846 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 223-224

शुभितमुग्रवीरम्' इत्यत्र सुहितमिति प्राप्ते वर्णव्यत्ययेन शुभितमिति प्रयोगः। लिङ्गव्यत्ययस्तावत्- 'मधोर्गृह्णाति', 'मधोस्तृप्ता इवासते' इति मधुना इति प्राप्ते लिङ्गव्यत्ययेन मधोः इति प्रयोगः भवति। कालव्यत्ययस्तावत्- 'श्वोऽग्नीनाधास्यमानेन' 'श्वः सोमेन वक्ष्यमाणेन' इत्यत्र श्व आधाता श्वो यष्टा इति प्राप्ते कालव्यत्ययेन तथा प्रयोगः विहितः। पुरुषव्यत्ययस्तावत्- 'अधा स वीरैर्दशभिर्वियूयाः' वियूयादिति प्राप्ते पुरुषव्यत्ययेन वियूयाः इति प्रयोगः भवति। आत्मनेपदव्यत्ययस्तावत्- 'ब्रह्मचारिणमिच्छते' इत्यत्र इच्छति इति प्राप्ते आत्मनेपदप्रत्ययव्यत्ययेन इच्छते इति प्रयोगः सम्भवति। परस्मैपदप्रत्ययस्तावत्- 'प्रतीपमन्य ऊर्मिर्युध्यति', 'अन्वीपमन्य ऊर्मिर्युध्यति' इत्यत्र युध्यत इति प्राप्ते परस्मैपदप्रत्ययव्यत्ययेन युध्यति इति प्रयोगः भवति इत्येवं सर्वे विधयश्छन्दसि विकल्प्यन्ते इत्यस्य नैकानि फलानि उल्लिखितानि भाष्यादिषु। 'व्यत्ययो बहुलम्'[847] इति सूत्रभाष्ये 'बहुलम्' इति योगविभागेन प्रकृतज्ञाप्यं साधितम्। *परिभाषेन्दुशेखरे* तु " 'व्यत्ययो बहुलम्' इति इति सूत्रे *भाष्ये* बहुलमिति योगविभागेन 'षष्ठीयुक्तश्छन्दसि' इति सूत्रे वेति योगविभागेन चैषा साधिता"[848] इत्यवम् उभयेनापि प्रकृतज्ञाप्यं ज्ञापितम्। गुरुपद-हालदारमहोदयः वैयाकरणसंसारे प्रसिद्धाम् इमां परिभाषां वाचनिकीं वक्ति।[849]

---

847 पा. सू. 3.1.85

848 प. भा. शे., पृ. 145

849 व्या. द. इ., पृ. 370

वस्तुतः वाचनिकीपरिभाषाः नैकविधाः भवन्ति, यथा- सूत्रनिष्पन्ना, सूत्रेतरवचननिष्पन्ना, सूत्रेतरवचनात्मिका, सूत्ररूपेण पठिता चेत्यादयः। तदुदाहरणानि तावत्- यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः इति सूत्रनिष्पन्ना। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव इति सूत्रेतरवचननिष्पन्ना। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति सूत्रेतरवचनात्मिका, 'इको गुणवृद्धी' इति सूत्रात्मिका।

कातन्त्रव्याकरणे अपि सूत्रात्मकपरिभाषाणाम् उल्लेखः लभ्यते, 'आगम उदनुबन्धः स्वरादन्त्यात् परः' (नाम 1.6), 'उणादयो भूतेऽपि' (कृत् 312), 'भविष्यति गम्यादयः' (कृत् 313)।[850]

## 4.22. इको यणचि इत्यत्र ङमुट् आगमः न, आगमविधेरनित्यत्वात्।

अष्टाध्याय्यां 'ङमो ह्रस्वादचि ङमुण्नित्यम्'[851] इत्येकं सूत्रं पठितम् अस्ति। तस्य चार्थः अस्ति यत् ह्रस्वस्वरात् परः पदान्ते विद्यमानः यः ङवर्णः, णवर्णः, नवर्णः च अस्ति, तस्मात् परस्य अच्-वर्णस्य संहितायां यथासङ्ख्यं ङुट्, णुट्, नुट् च इति आगमाः भवन्ति। ते च सर्वे टितः आगमाः सन्ति, अतः 'आद्यन्तौ टकितौ'[852] इत्यनेन एते आगमाः स्थानिनः आद्यवयवरूपेण विधीयन्ते। तस्य एकम् उदाहरणं तावत्- प्रत्यङ्ङात्मा। प्रत्यञ्च्-शब्दस्य प्रथमैकवचनस्य रूपं प्रत्यङ् इति

850 तत्रैव

851 पा. सू. 8.3.32

852 पा. सू. 1.1.46

भवति। अस्मिन् पदे ह्रस्वस्वराद् अनन्तरं ङकारः अस्ति। अस्मात् पदान्तङकाराद् अनन्तरं संहितायां स्वरः अस्ति चेत् तस्य स्वरस्य ङुट्-आगमः भवति। एवञ्च प्रत्यङ् आत्मा इति स्थिते प्रकृतसूत्रेण ङुट्-आगमे, तस्य इत्संज्ञायां लोपे च विहिते सति प्रत्यङ्ङात्मा इति रूपं सिध्यति। एवं क्रमशः णुट्-आगमे सुगण्णीशः, नुट्-आगमे सन्नच्युतः इत्यादिरूपाणि सिध्यन्ति।

अस्मात् शास्त्रात् पूर्वं विद्यमानैः सर्वैः आगमविधायकैः सूत्रैः विकल्पेन एव आगमः विधीयते। तादृशः विकल्पः तु अस्मिन् योगे नेष्यते इति ज्ञापयितुमेव अस्मिन् सूत्रे नित्यम् इति शब्दः उपात्तः अस्ति। प्रकृतसूत्रेण उक्ताः आगमाः नित्यम् एव भवन्ति इति आशयः।

अत्र तावत् प्रश्नः- यदि तावत् सूत्रोक्तं कार्यं नित्यमेव भवति तर्हि इदं सूत्रं नित्यमेव कार्यं कुर्यात्, न हि विकल्पेन कार्यं कुर्यात्। किन्तु तथापि कानिचिन सूत्राणि अष्टाध्याय्यां सन्ति, यत्र आचार्यः पाणिनिः सूत्रोक्तं कार्यं तेषु न करोति। प्रायशः वयं पश्यामः पाणिनिः सूत्रोक्तं कार्यं सूत्रेषु प्रदर्शयति। किन्तु सः अस्मिन् विषये किञ्चिदन्यथा करोति। सूत्रस्य अस्य प्रयोगेन विनैव अनेकानि सूत्राणि

रचयामास। यथा 'इको यणचि'[853], 'उणादयो बहुलम्'[854], 'सनाद्यन्ता धातवः'[855], 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ'[856]।

'इको यणचि' इत्यस्मिन् यण् अचि इत्यत्र णकारात् परस्य अकारस्य अनेन शास्त्रेण णुट्-आगमः विधीयते, अतः इको यण्णचि इत्येव सूत्रं साधु स्यात्, इको यणचि इति असाधु स्यात्।

'उणादयो बहुलम्' इत्यस्मिन् अपि णकारात् परस्य आकारस्य णुट्-आगमे विहिते उण्णादयो बहुलम् इति सूत्रमेव साधु स्यात्, उणादयो बहुलम् इति असाधु स्यात्।

'सनाद्यन्ता धातवः' इत्यस्मिन् नकाराद् उत्तरस्य आकारस्य नुडागमे विहिते सनाद्यन्ता धातवः इति सूत्रमेव साधु स्यात्, सनाद्यन्ता धातवः इति असाधु स्यात्।

'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यस्मिन् इयङ् इत्यस्मात् परस्य उकारस्य ङुट्-आगमे विहिते अचि श्नुधातुभ्रुवां य्वोरियङ्ङुवङौ इति सूत्रम् एव साधु स्यात्, अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति असाधु स्यात्।

एतादृशी सूत्ररचना नित्यसूत्रस्य प्रयोगं विनैव विहिता। अतः तस्य समाधानं छन्दोवत् सूत्राणि भवन्ति, सर्वे विधयः छन्दांसि विकल्प्यन्ते इति

---

853 पा. सू. 6.1.77

854 पा. सू. 3.3.1

855 पा. सू. 3.1.32

856 पा. सू. 6.4.77

एतादृशाभ्यां वचनाभ्यां समर्थयितुं शक्यम्। किन्तु भाषायाम् अर्थात् लोकव्यवहारे लौकिसंस्कृते वा एतादृशाः प्रयोगाः कर्तुं न शक्यन्ते, अनुमतिर्नास्ति इति मन्तव्यम्। लौकिकसंस्कृते तु अस्य सूत्रस्य प्रयोगः नित्यरूपेण एव भवति, न हि विकल्पेन।

केषुचित् सूत्रेषु पाणिनिः प्रकृतशास्त्रस्य प्रयोगम् अवश्यं विदधाति। यथा 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[857], 'तस्मिन्नणि च युष्माकास्माकौ'[858], 'तदस्मिन्नधिकमिति दशान्ताड्डः'[859] इत्यादिषु सूत्रेषु नकाराद् उत्तरस्य अकारस्य नुडागमं कृत्वा एव सूत्ररचना विहिता दृश्यते। तथैव 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्'[860], 'तिङ्ङतिङः'[861] इत्यत्र ङुडागमः अपि विहितः अस्ति।

**इदमत्रावधेयम्-** *प्रौढमनोरमा*याम् तावत् उच्यते यत्- प्रकृतसूत्रे नित्यग्रहणं विस्पष्टार्थम्। कारणं हि तस्य सूत्रस्य 'हे मपरे-'[862] इति 'मय उञो वो वा'[863] इति च विकल्पद्वयस्य मध्ये पाठः विहितः, तस्मात् तन्मध्ये पाठादेव नित्यत्वलाभेन नित्यग्रहणं विस्पष्टार्थम्। तत्रैव *शब्दरत्न*कारः वदति-" 'विभाषामध्ये

---

857 पा. सू. 1.1.66
858 पा. सू. 4.3.2
859 पा. सू. 5.2.45
860 पा. सू. 7.1.35
861 पा. सू. 8.1.28
862 पा .सू. 8.3.26
863 पा. सू. 8.3.33

च ये विधयस्ते नित्या' 'पूङः क्त्वा च'[864] इति सूत्रे भाष्योक्तेरिति भावः। न च तन्मध्ये पाठेन नित्यत्वकल्पने तन्मध्यपतितानां 'नपरे नः'[865] इत्यादीनामपि नित्यत्वापत्तिः। स्वरितत्वबलादनुवृत्तस्य पुनर्वाग्रहणान्निवृत्तौ कल्प्यमानायां सवानन्तर एव तत्कल्पनेनोपपत्तावन्यत्र तत्कल्पने मानाभावात्। तस्मादुत्तरत्र वाग्रहणसा-मर्थ्यात्पूर्वसूत्रे एव वाग्रहणस्य निवृत्तिरिति भावः।"[866] तथा च 'पूङः क्त्वा च' इति सूत्रे भाष्यकारः कथयति- "विभाषामध्येऽयं योगः क्रियते। विभाषामध्ये ये विधयस्ते नित्या भवन्ति"[867] इति। वस्तुतः उपरि विहितेन आलोचनेन आगमविधिः अनित्यः इति फलितः।

## 4.23. उपसंहृतिः

व्याकरणं हि सर्वशास्त्रोपकारकं, तस्मात् तस्ये अध्ययनं सम्यक् कार्यम्। उक्तं हि *महाभाष्य*कारेण- "प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति इति"।[868] अतः सूत्राणां विशेषाध्ययनम् अपि आवश्यकम्। सूत्रार्थं जानतामपि अस्माकं केषुचित् स्थलेषु प्रयोगे क्लेशः अनुभूयेत। अस्मिन्नध्याये तादृशानि स्थलानि आलोचितानि सन्ति येषाम् अध्ययनेन अस्माकं सूत्रार्थज्ञानं स्पष्टं स्यात् इति आशासे।

---

864 पा. सू. 1.2.22

865 पा. सू. 8.3.27

866 प्रौ. म., पृ. 144

867 म. भा., द्वि. ख., सम्पा. शिवदत्तशर्मा, पृ. 18

868 म. भा., सम्पा. जयशङ्करलालत्रिपाठी, पृ. 25

## चतुर्थोऽध्यायः

यथा सर्वशब्दस्य सर्वनामत्वं सुविदितमेव। किन्तु परमसर्वादिशब्दानां सर्वनामत्वम् अस्ति न वेति प्रश्नस्य उत्तरं प्रदत्तं शास्त्ररीत्या। सामान्यतया वयं जानीमः यत् सर्वादिशब्दस्य सर्वनामसंज्ञा भवति। किन्तु तदन्तस्यापि सर्वनामसंज्ञा भवति 'द्वन्द्वे च' इति ज्ञापकात्। तेन परमसर्वादिशब्दानां सर्वनामसंज्ञा सिध्यति।

सर्वार्थे समशब्दस्य प्रयोगः यथैव भवति तथैव तुल्यार्थे अपि भवति। किन्तु सर्वनामता कुत्र स्यादिति शङ्कायाः समाधानं विहितम् अस्ति। समः सर्वपर्यायः एव गृह्यते। तस्मिन्नेव सर्वनामता। 'यथासंख्यमनुदेशः समानाम्' इति ज्ञापकाद्।

अष्टाध्याय्यां 'प्राक्कडारात्समासः', 'सह सुपा', 'अव्ययीभावः', 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु', 'यथासादृश्ये', 'यावदवधारणे', 'सुप्प्रतिना मात्रार्थे', 'अक्षशलाकासंख्याः परिणा', 'विभाषा' इत्येवं सूत्रक्रमः पठितः। ननु 'प्राक्कडारात्समासः' इत्यत ऊर्ध्वं 'सह सुपा' इत्यतः प्रागेव 'विभाषा' इत्यधिकारः कुतो न विहितः। तत्र समासविधायकानि कानिचित् शास्त्राणि आदौ विधाय पश्चाद्बहूनि सूत्राणि विहितवान्। एवं मध्ये विभाषाधिकारः कुतः। एवञ्च समासविधानस्य आरम्भे एव विभाषाधिकारः स्यात्। अस्याः शङ्कायाः निरसनं क्रियते- 'विभाषा' इत्यधिकारः अस्ति, एतत्सामर्थ्यादेव प्राचीनानां शास्त्राणां नित्यसमासत्वं ज्ञाप्यते। उत्तरसूत्राणां वैकल्पिकत्वम् अपि ज्ञायते।

‘पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः’ इति सूत्रेण यथैव मिश्रशब्देन तृतीयान्तस्य सुबन्तस्य तत्पुरुषसमासविधानं भवति तथैव संमिश्रादि-शब्देन सह तृतीयान्तस्य तत्पुरुषसमासः भवति। ‘मिश्रं चानुपसर्गमसन्धौ’ इत्यत्रानुपसर्गग्रहणात् मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम् इति ज्ञाप्यं प्रदर्शितम्।

‘पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे’ इति योगेन पूर्वादीनाम् अवयविना सह यः समासः विधीयते सः मध्याह्नः इत्यादौ अपि भवति इति दर्शितम्। ‘संख्याविसाय’ इति ज्ञापकात् सर्वोऽप्येकदेशोऽह्ना समस्यते इति ज्ञाप्यते। तदेतत् सर्वम् अत्र दर्शितम्।

सूत्रे किमपि पदम् अस्ति चेत् तस्य पदस्य लिङ्गविवक्षा किं पाणिनेः अस्ति इति प्रश्नस्य समाधानम् अत्र प्रस्तुतम्। तथा च ‘अर्ध नपुंसकम्’ इति सूत्रे अर्धमिति निर्देशादेव नपुंसकत्वे सिद्धे नपुंसकग्रहणं ‘सूत्रेषु लिङ्गनिर्देशो न विवक्षितः’ इति ज्ञापनार्थम्। तद् विस्तरशः अत्र प्रतिपादितम् अस्ति। तेन ‘तत्र भवः’ इति शास्त्रेण राष्ट्रे भवः राष्ट्रियः यथैव सिध्यति तथैव दन्त्ये भवम् दन्त्यम् इति सिध्यति। *ज्ञापकसंग्रह*कारः यदि *प्रदीपोद्द्योत*कारः नागेशः एव स्यात् तर्हि किमर्थं *ज्ञापकसंग्रहे* सः इदं ज्ञाप्यं नोल्लिखितवान्, *उद्द्योते* तु स्पष्टतया अलेखीत् इति तु चिन्त्यम्।

‘पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन’ इति शास्त्रेण तु गुणवाचकशब्दैः सह सुबन्तस्य समासस्य निषेधः क्रियते। तर्हि अर्थगौरव-

## चतुर्थोऽध्यायः

बुद्धिमान्द्यादिस्थलेषु समासः न स्यादिति एषा शङ्का अत्र निरस्ता दीक्षितादिकथनेन मुनित्रयप्रयोगदर्शनेन च।

समानाधिकरणपदः बहुव्रीहिः इति तु प्रायः सर्वविदितमेव। परन्तु व्यधिकरणपदः अपि बहुव्रीहिः भवति किम् इति एषा शङ्का दीक्षितदिशा समाहिता।

इङ्धातुः नित्यम् अधिपूर्वः, इक्धातरपि नित्यम् अधिपूर्वः इति सामान्यतया वयं जानीमः। अत्र तु ज्ञापकम् 'अधीगर्थदयेशां कर्मणि' इति सूत्रे अधिशब्दोच्चारणम्। *तत्त्वबोधिनी*कार-रामानुजताताचार्ययोः विषयविशेषः अत्र प्रस्तुतः।

पचादिः आकृतिगणः अस्ति न वेति आलोचना विहिता। तत्र दीक्षितादि*काशिका*कारादयः तु पचादिराकृतिगणत्वं साक्षात् प्रोक्तवन्तः पाणिनीयनिर्देशज्ञापकेभ्यः। परन्तु वार्त्तिककारो वा *महाभाष्य*कारो वा यद्यपि साक्षात् नोक्तवान् पचादेः आकृतिगणत्वम्, तथापि नन्दिग्रह्यादिसूत्राध्ययनेन पचादेरा-कृतिगणत्वे न कस्यापि विप्रतिपत्तिः लक्ष्यते।

'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रेण विशेषतया इच्छा, बुद्धिः, ज्ञानम् इत्येतदर्थकेभ्यः धातुभ्यः वर्तमानकालार्थे यः क्तप्रत्ययः विधीयते सः भूतकालार्थे सामान्यतया विहितस्य 'निष्ठा' इति क्तप्रत्ययस्य अपवादः अस्ति न वेति आलोचना विहिता। अपि च 'पूजितो यः सुरासुरैः' इत्यादिप्रयोगाणां साधुत्वं प्रदर्शितम्।

स्त्रीप्रत्ययेषु तदन्तविधिः भवति इति आलोचनं विहितम्। 'अनुपसर्जनात्' इत्यधिकारः अथवा "शूद्रा चामहत्पूर्वा जातिः" (वा. 2400) इत्यत्रत्यम् अमहत्पूर्वाग्रहणम् इत्यनयोः कतरत् तज्जाप्यम् अस्ति इत्यपि *वैयाकरणसिद्धान्तकौमुद्या*दि *काशिका*दि *भाष्या*दिग्रन्थाध्ययनपुरस्सरम् आलोचितम्, अनुपसर्जनाधिकारः प्रायः सर्वैः आदृतः इत्यपि प्रदर्शितम्।

'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्' इति सूत्रे तृ इत्यनेन सामान्येन तृन्तृचोर्ग्रहणे सिद्धे तृन्तृचोर्भेदेनोपादानं क्वचित् सामान्यनिर्देशेऽपि विशेष एव गृह्यते इति ज्ञाप्यं ज्ञापयति, तदस्मिन्नध्याये सविस्तरम् आलोचितम्। अस्य च ज्ञाप्यस्य फलानि अपि प्रदर्शितानि।

'निजां त्रयाणाम्' इति निपातनादेव त्रयादेशे सिद्धे सति 'त्रेस्त्रयः' इति सूत्रेण 'अबाधकान्यपि निपातनानि भवन्ति' इति ज्ञापितम्। तेन पुरातनमित्यादि सिध्यति। वस्तुतः *काशिकार*नये त्रीणाम् इत्यपि साधु वेदे।

'अवस्था', 'संस्था' इत्यादीनाम् अङन्तानां शब्दानां साधुत्वं प्रदर्शितम्।

पुष्ययुक्ता पौर्णमासी पौषी इति कथं सिध्यति तत्प्रदर्शितम्। अत्र च दीक्षितवर्त्मना समाधानं प्रदत्तम्। 'लुबविशेषे' इत्यत्र अविशेषपदार्थः आलोचितः। अहोरात्रः इति नक्षत्रेण युक्तस्य कालस्य अविशेषे लुप् भवति इति भाष्यकाराशयः अपि उक्तः।

## चतुर्थोऽध्यायः

'संस्कृतं भक्षाः' इति पाणिनीयनिर्देशात् भूषणसंघातार्थातिरिक्तस्थले अपि संपूर्वकात् परिपूर्वकात् च करोतेः सुड्विधीयते इत्यपि आलोचितम्। संस्कृतः पुरोडाशः इत्यादिकम् उदाहरणमपि अपि प्रदर्शितम्।

इष्णुज्ग्रहणे खिष्णुचो द्व्यनुबन्धकस्यापि ग्रहणम् इकारादेर्विधान-सामर्थ्यादित्यपि सविस्तरम् आलोचितम्। तेन अनाढ्यम्भविष्णुः, असुभगम्भविष्णुः इत्यादीनि सिध्यन्ति। यद्यपि भाष्यकारः तथा किमपि नोक्तवान्। परन्तु *काशिका*दिग्रन्थाध्ययनेन तद् ज्ञाप्यं स्पष्टीभवति।

वुञ्छणादिषु ठचश्चित्त्वेन इकादेशोऽन्तरङ्गेभ्यो बलवान् इति ज्ञाप्यं सोदाहरणम् आलोचितम्। यद्यपि *काशिका*याम् अस्य विषये किमपि नोक्तम्। तथापि *पदमञ्जर्यां* *न्यासे* च प्रकृतज्ञाप्यविषयिणी चर्चा विहिता अस्ति, तस्याः आलोचनमस्मिन्नध्याये कृतम्।

पाणिनीयसूत्रेण विधीयमानं कार्यं छन्दसि विकल्पेन भवतीति ज्ञातम्। वेदे कतिपयानि स्थलानि सन्ति, येषु पाणिनीयनियमैः कार्यं विधातुं न शक्यते। तत्र छन्दोवत् सूत्राणि भवन्ति अथवा सर्वे विधयश्छन्दसि विकल्प्यन्ते अथवा बहुलं छन्दसि इत्येवंरूपेण समाधानं दीयते। 'षष्ठीयुक्तश्छन्दसि वा' इति सूत्रस्य योगविभागेनैव सर्वे विधयश्छन्दसि विकल्प्यन्ते इत्ययम् अर्थः आयाति, तत्सर्वं नैकोदाहरणपुरस्सरम् अस्मिन्नध्याये आलोचितम्।

'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति सूत्रे नित्यग्रहणस्य आवश्यकता प्रतिपादिता। 'इको यणचि', 'उणादयो बहुलम्', 'सनाद्यन्ता धातवः', 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यादिषु स्थलेषु पाणिनिः प्रकृतसूत्रस्य प्रयोगं नैव विहितवान्। तेषु स्थलेषु सर्वे विधयः छन्दसि विकल्प्यन्ते इत्यनेन समाधानं प्रदत्तम्। परन्तु लोके तु इत्थं प्रयोगः कर्तुं न शक्यते। लोके तु नित्यमेव प्रयोगाः भवन्ति।

इत्येवम् अस्मिन्नध्याये नैकानि ज्ञाप्यानि चर्चितानि। तानि ज्ञाप्यानि पाणिनिना तु अनुल्लिखितानि, *महाभाष्ये* अपि प्रायः अनुल्लिखितानि। कुत्रचित् भाष्यकारस्य सम्मतिरस्ति इत्यपि आलोचना उपरि विहिता। अत्र अध्याये भट्टोजिदीक्षितः, वासुदेवदीक्षितः, ज्ञानेन्द्रसरस्वती, वामनजयादित्यौ, जिनेन्द्रबुद्धिः, हरदत्तः, कैयटः, नागेशः इत्येतेषां वैयाकरणानां मतानि प्राधान्येन आलोचितानि यथामति।

एते विषयाः अस्मिन् ग्रन्थे प्रस्तुताः। यद्यपि सर्वत्र ज्ञापकसूत्रस्य यथा चत्वारः अंशाः भवन्ति आदौ वैयर्थ्यं, व्यर्थं सद् ज्ञापकं, स्वांशे चारितार्थ्यम्, फलमन्यत्र इत्येवंरूपाः न दृश्यन्ते। किन्तु तत्तदाचार्यशङ्कासमाधानमत्र प्रदर्शितम्। यद्यपि केचन विषयाः *महाभाष्य*कारेण साक्षात् तत्र तत्र सूत्रेषु अभिहिताः न सन्ति, परन्तु अनुमताः न सन्ति इति तु वक्तुं न शक्यन्ते, यतोहि अत्र अपाणिनीयं किमपि उक्तं नास्ति। स्पष्टं सूत्रार्थज्ञानाय एतानि ज्ञापितवचनानि अवश्यम् उपादेयानि

सन्ति। तथा सति अध्येतॄणां सूत्रप्रयोगपटुत्वम् एधेत इति विभावयामि। एवं शोधप्रबन्धस्य चतुर्थाध्यायः समाप्तः इति शिवम्।

# उपसंहारः

'अयं शब्दः इममर्थं बोधयति अस्य शब्दस्यास्मिन्नर्थे शक्तिः' इति ज्ञानं व्याकरणाधीनमस्ति।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।[869]

"व्याकरणं हि अर्थविशेषमाश्रित्य स्वरविशेषादीन् विदधत् पदार्थ-विशेषनिर्णये उपयुज्यते।"[870] पदपदार्थावगमस्य व्याकरणाधीनत्वात् तेषु व्याकरणं प्रधानं भवति, वाक्यार्थज्ञानस्य तन्मूलकत्वात्। तस्मादेव शिक्षाग्रन्थे व्याकरणस्य मुखत्वेन निरूपणं विहितम्। मन्वादिस्मृतिषु अपि वेदाङ्गाध्ययनविधयः प्रसिद्धाः एव। एवञ्च अध्ययनविधिः व्याकरणाध्ययनस्य अनुष्ठापकः इति फलितम्। तथा च सन्ध्योपासनाद्यभावे यथा पापं जायते अनुष्ठाने च पापक्षयः भवति एवमेव व्याकरणस्य अध्ययने अनध्ययने चेति बोद्धव्यम्। "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"[871] इति रक्षाप्रभृतीनि फलान्तराण्यपि भवन्ति। पुनश्च *महाभाष्ये* तेऽसुरादित्रयोदश गौणप्रयोजनानि अपि प्रोक्तानि। व्याकरणशास्त्रम् न केवलं पदसाधुत्वासाधुत्व-प्रतिपादकम् अपि तु दर्शनशास्त्रम् अपि वर्तते। तत्र पण्डितजनेषु प्रवहन्ती काचित् परम्परा। सा हि- येषु येषु शास्त्रपदवाच्येषु प्राधान्येन

---

869 का. व., पृ. 361

870 श. कौ., पृ. 11

871 म. भा., सम्पा. जयशङ्करलालः त्रिपाठी, पृ. 21

## उपसंहारः

अध्यात्मविषयाः प्रतिपादिताः सन्ति, तत्र प्रसङ्गाद् उपात्तानां लौकिकानाम् अपि विषयाणां विश्लेषणस्य तात्पर्यं यदि अध्यात्मविषये एव पर्यवस्यति, तदा तानि शास्त्राणि अपि दर्शनशास्त्रपदवीं लभन्ते। किन्तु व्याकरणशास्त्रं तथा न भवति चेदपि शब्दस्यैव प्रत्यगात्मस्वरूपत्वेन व्याकरणस्यापि अध्यात्मज्ञानोपायभूतत्वात् दर्शनशास्त्रत्वे नास्ति कश्चित् शङ्कालेशः। सस्वपि विविधव्याकरणेषु सूत्रवार्त्तिकभाष्यविभूषितपाणिनीयव्याकरणस्यैव समादारः विद्वत्कुले वर्तते। तेषां सूत्र-वार्त्तिकभाष्यलक्षणविषये *पराशरपुराणस्य* अष्टादशाध्याये पठ्यते-

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं  सूत्रविदो विदुः।।[872]

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञाः मनीषिणः।।[873]

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।[874]

सत्स्वपि विविधभाष्येषु कथं वा पतञ्जलिभाष्यस्यैव महाभाष्यत्वव्यवहारः भवति इति आलोचितः शोधप्रबन्धस्यास्य प्रथमाध्याये। पुनश्च तत्र *महाभाष्यस्य* सामान्यपरिचयेन सह *महाभाष्यस्य* तथा पतञ्जलेः जन्मकालः, *महाभाष्यवैशिष्ट्यं*,

---

872 पारा. पु., अष्टादश., श्लो. 13 -14, पृ. 90

873 तदेव, श्लो. 19 -20

874 तदेव, श्लो. 15 -16

## उपसंहारः

*महाभाष्यस्य* रचनापद्धतिः, तालिकया सपादसंख्यं आह्निकविभागः, *महाभाष्य*गरिमा, *महाभाष्यस्य* पाठाव्यवस्था, पतञ्जलेः कृतिपरिचयः, ततः *महाभाष्य*टीकानां तत्कर्तॄणां च परिचयः इत्येते विषयाः प्रतिपादिताः। द्वितीयाध्याये च व्याकरणाध्ययनाध्यापनक्रमः, नागेशभट्टकालपरिचयः, नागेशस्य देशपरिचयः, नागेशकृतिपरिचयः, नागेशस्य गुरुशिष्यपरम्परापरिचयः तालिकासहयोगेन इति विषयाः प्रोक्ताः। ततः *ज्ञापकसंग्रहस्य* सर्वशास्त्रनिष्णात-नागेश-कर्तृत्वाकर्तृत्वविमर्शकाले समानकर्तृत्वसमर्थनपक्षे विविधयुक्तयः प्रदर्शिताः, समानकर्तृत्वासमर्थनपक्षे अपि नानायुक्तयः उपस्थापिताः, अन्ते स एव पक्षः स्वीकृतः मया। तृतीयाध्याये च *ज्ञापकसंग्रहो*क्तानां चितानां ज्ञाप्यानां *महाभाष्य*सम्मतत्वं प्रदर्शितम्। तत्र च लुगादीनां सर्वादिशत्वं, द्वन्द्वसमासस्य विभाषा एकवद्भावत्वं, चरधातोः अधिकरणे उपपदे टप्रत्ययविधानं, लट् स्मे इत्यस्य परोक्षानद्यतनविषयत्वं, लकाराणां लस्य इत्त्वाभावः, सेवमानः, पचमानः, लभमानः चेत्यादिषु आनस्य टेरेत्वप्रसक्तिविषयत्वं, इवशब्देन योगे सप्तमीविभक्तिः, सिध्मादिभ्यश्चेति सूत्रे अनुवृत्तस्यान्यतरस्यांग्रहणस्य समुच्चयार्थकता, एकगोपूर्वाट्ठञ् नित्यमिति सूत्रे नित्यपदोपादानप्रयोजनम्, कारकसंज्ञायां तरतमयोगाभावः, उपदेशे आयन्नादेशकथनं, अनुबन्धलक्षणस्वरे प्रत्ययलक्षणाभावः, स्वरविधौ सङ्घातः कार्यी भवति सप्तम्यस्तदन्तसप्तम्यश्च भवन्तीति एते विषयाः सविमर्शं प्रतिपादिताः। चतुर्थाध्याये *महाभाष्य-ज्ञापकसंग्रह*भिन्न *वैयाकरणसिद्धान्तकौमुदी-बालमनोरमा*टीका-

## उपसंहारः

*तत्त्वबोधिनी*टीका- *काशिकावृत्ति*- *न्यास*टीका- *पदमञ्जरी*टीका- *भाष्यप्रदीप*टीका- *प्रदीपोद्द्योत*टीकाद्यध्ययनलब्धज्ञापितवचनानां पर्यालोचनं विहितम्। इत्येवं शोधप्रबन्धस्य समाप्तिर्जातेति शिवम्।।

परिशिष्टम्- 1

# सांकेतिकाक्षरसूचिः

| | |
|---|---|
| अमर. | *अमरकोषः* |
| अष्टा., प. | *अष्टाध्यायी*, पञ्चमभागः |
| ऋ., साम., प्र. पा. | *ऋक्तन्त्रम्*, सामवेदीयम्, प्रथमप्रपाठकः |
| का. द., कारि. | *काव्यादर्शः*, कारिका |
| का. प्र., कारि. | *काव्यप्रकाशः*, कारिका |
| का. मी. | *काव्यमीमांसा* |
| का. व. | *कारिकावली* |
| का. वृ., च. भा. | *काशिकावृत्तिः*, चतुर्थभागः |
| का. वृ., तृ. भा. | *काशिकावृत्तिः*, तृतीयभागः |
| का. वृ., द्वि. भा. | *काशिकावृत्तिः*, द्वितीयभागः |
| का. वृ., प. भा. | *काशिकावृत्तिः*, पञ्चमभागः |
| का. वृ., प्र. भा. | *काशिकावृत्तिः*, प्रथमभागः |
| का. वृ., ष. भा. | *काशिकावृत्तिः*, षष्ठभागः |
| काठक. | *काठकसंहिता* |
| जै. मी. भा., द्वि. भा., जै. सू. | *जैमिनीयभाष्यम्*, द्वितीयभागः, *जैमिनीयसूत्रम्* |
| ज्ञा. स. | *ज्ञापकसंग्रहः* |
| तन्त्र., जै. सू. | *तन्त्रवार्त्तिकम्*, *जैमिनीयसूत्रम्* |
| तैत्तिरीय. | *तैत्तिरीयसंहिता* |
| ध. शा. का. इ., प्र. भा. | *धर्मशास्त्र का इतिहास*, प्रथमभागः |

| | |
|---|---|
| नन्दि. का., श्लो. | *नन्दिकेश्वरकाशिका*, श्लोकः |
| ना. भ. का. व्या. द. | *नागेश भट्ट का व्याकरण दर्शन* |
| निरु., प्र. भा. | *निरुक्तम्*, प्रथमभागः |
| न्या. वा. ता. | *न्यायवार्त्तिकतात्पर्यटीका* |
| न्या. सु., द्वि. भा. | *न्यायसुधा*, द्वितीयभागः |
| प. का. व्या. द. | *पतञ्जलि का व्याकरणदर्शन* |
| प. भा. शे. | *परिभाषेन्दुशेखरः* |
| प. भा. शे., त. भू., भू. | *परिभाषेन्दुशेखरः*, *तत्त्वप्रकाशिका*समलङ्कृत*भूति*भूषितः, भूमिका |

प. म. न. की. व्या. में. कै. औ. शि. का. तु. अ. *पतञ्जलि महाभाष्य (नवाह्निक) की व्याख्या में कैयट और शिवरामेन्द्र का तुलनात्मक अध्ययन*

| | |
|---|---|
| प. ल. म. | *परमलघुमञ्जूषा* |
| प. वृ. | *परिभाषावृत्तिः* |
| पा. शि., कारि. | *पाणिनीयशिक्षा*, कारिका |
| पा. सू. | पाणिनीयसूत्रम् |
| पारा. पु., अ., श्लो. | *पाराशरोपपुराणम्*, अष्टमाध्यायः, श्लोकः |
| पारा. पु., अष्टादश., श्लो. | *पाराशरोपपुराणम्*, अष्टादशाध्यायः, श्लोकः |
| प्र. स. | *प्रक्रियासर्वस्वम्* |
| प्रौ. म. | *प्रौढमनोरमा* |
| बृ. श. शे., भू. | *बृहच्छब्देन्दुशेखरः*, भूमिका |
| भाषा. वृ. | *भाषावृत्तिः* |
| म. भा., च. ख. | *महाभाष्यम्*, चतुर्थखण्डम् |
| म. भा., तृ. ख. | *महाभाष्यम्*, तृतीयखण्डम् |

| | |
|---|---|
| म. भा., द्वि. ख. | *महाभाष्यम्*, द्वितीयखण्डम् |
| म. भा., प. ख. | *महाभाष्यम्*, पञ्चमखण्डम् |
| म. भा., पस्पशा. | *महाभाष्यम्*, पस्पशाह्निकम् |
| म. भा., प्र. ख. | *महाभाष्यम्*, प्रथमखण्डम् |
| म. भा., ष. ख. | *महाभाष्यम्*, षष्ठखण्डम् |
| म. सु. स., तृ. भा. | *महासुभाषितसंग्रहः*, तृतीयभागः |
| मनु. श्लो. | *मनुस्मृतिः*, श्लोकः |
| मु. उ. | *मुण्डकोपनिषत्* |
| मुद्रा. | *मुद्राराक्षसम्* |
| मैत्रायणी. | *मैत्रायणीसंहिता* |
| राज., च. त., | *राजतरङ्गिणी*, चतुर्थतरङ्गः |
| ल. श. शे. | *लघुशब्देन्दुशेखरः* |
| ल. सि. कौ., प्र. भा. | *लघुसिद्धान्तकौमुदी*, प्रथमभागः |
| वा. प., कारि. | *वाक्यपदीयम्*, कारिका |
| वा. प., प., कारि. | *वाक्यपदीयम्*, पदकाण्डम्, कारिका |
| वा. प., पुण्य. | *वाक्यपदीयम्*, *पुण्यराजटीका* |
| वा. प., ब्र., कारि. | *वाक्यपदीयम्*, *ब्रह्मकाण्डम्*, कारिका |
| वा. प., वा., कारि. | *वाक्यपदीयम्*,*वाक्यकाण्डम्*, कारिका |
| वा. प., वा., स्वोपज्ञ., कारि. | *वाक्यपदीयम्*, *वाक्यकाण्डम्* *स्वोपज्ञटीका*, कारिका |
| वा. पु., श्लो. | *वायुपुराणम्*, श्लोकः |
| वा. रा., उ., स., श्लो. | *वाल्मीकिरामायणम्*, *उत्तरकाण्डम्*, सर्गः, श्लोकः |
| वि. प्र., श्लो. | *विश्वप्रकाशः*, श्लोकः |

| | |
|---|---|
| वै. सि. कौ, च. भा. | *वैयाकरणसिद्धान्तकौमुदी*, चतुर्थभागः |
| वै. सि. कौ, तृ. भा. | *वैयाकरणसिद्धान्तकौमुदी*, तृतीयभागः |
| वै. सि. कौ, द्वि. भा. | *वैयाकरणसिद्धान्तकौमुदी*, द्वितीयभागः |
| वै. सि. कौ, प्र. भा. | *वैयाकरणसिद्धान्तकौमुदी*, प्रथमभागः |
| वै. सि. ल. म. | *वैयाकरणसिद्धान्तलघुमञ्जूषा* |
| व्या. द. इ. | *व्याकरण दर्शनेर इतिहास* |
| व्या. भा. | *व्यासभाष्यम्* |
| श. कौ. | *शब्दकौस्तुभः* |
| सं. व्या. का. उ. औ. वि., | *संस्कृत व्याकरण का उद्भव और विकास* |
| सं. व्या. शा. का. इ., प्र. भा. | *संस्कृत व्याकरणशास्त्र काइतिहास*, प्रथमभागः |
| सि. कौ., सुबो., प्रा. | *सिद्धान्तकौमुदी*, *सुबोधिनी*, प्रारम्भः |
| सि. र., अ. | *सिद्धान्तरत्नम्*, अन्तः |
| सु. र., प्र. प्र., वै. प्र. | *सुभाषितरत्नम्*, प्रथमप्रकरणम्, वैयाकरणप्रशंसा |
| स्वर. सि. च., आ. प्र., | *स्वरसिद्धान्तचन्द्रिका*, आरम्भणप्रकरणम् |

परिशिष्टम्- 2

# परिशीलितग्रन्थसूचिः


अमरसिंहः। *अमरकोषः*। सम्पा. शिवदत्तदाधिमथः वासुदेवलक्ष्मणशास्त्री पणशीकरः। दिल्ली : चौखाम्बा संस्कृत प्रतिष्ठान, 2017 (पुनर्मुद्रितम्)।

आचार्यः, के. वि. रामकृष्णः। *भूषणसारतत्त्वप्रकाशिका*। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2010।

आचार्यः, सत्यनारायणः। *Research Methodology*। तिरुपतिः : राष्ट्रियसंस्कृतसंस्थानम्, 2012।

आप्टे, वामनशिवरामः। *संस्कृत-हिन्दी-कोशः*। दिल्ली : मोतीलाल बनारसीदास पाब्लिशार्स प्राईभेट् लिमिटेड्, 2007।

उपाध्यायः, गोकुलनाथः। *पदवाक्यरत्नाकरः*। सम्पा. नन्दिनाथः मिश्रः। वाराणसी : वाराणसेयसंस्कृतविश्वविद्यालयः, 1882।

उपाध्यायः, लक्ष्मीनारायणः। *पतञ्जलि का व्याकरण-दर्शन*। सम्पा. विजयशंकरः पाण्डेयः। वाराणसी : चौखम्बा विद्याभवन, 2015।

*ऋक्तन्त्रम् (सामवेदीयम्)*। सम्पा. सूर्यकान्तशास्त्री। लाहोरः : मेहर चाँद लक्ष्मण दासः, 1933।

कल्हणः। *राजतरङ्गिणी*। सम्पा. रामतेजशास्त्री। काशी : पण्डित पुस्तकालयः, 1960।

*काठकसंहिता*। सम्पा. श्रीपादशर्मा भट्टाचार्यः। मुम्बई : वसन्तश्रीपादसातवलेकरः, 1943। पि.डि.एफ्.।

काणेः, पाण्डुरङ्गः वामनः। *धर्मशास्त्र का इतिहास (प्रथमभागः)*। लख्नौः : हिन्दी समिति सूचना विभाग, 1900 (प्रथमसंस्करणम्)।

कुमारिलभट्टः। *तन्त्रवार्त्तिकम् (मीमांसासूत्रीयशाबरभाष्यटीका)*। सम्पा. गङ्गाधरशास्त्री। वाराणसी : मेसर्स. ब्रज बि. दास एवं को., 1903।

कौण्डभट्टः। *वैयाकरणभूषणसारः (सुबोधिनीव्याख्योपेतः)*। सम्पा. चन्द्रिकाप्रसादः द्विवेदी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 2013।

चलपतिः, प्यदिपतिवेङ्कटः.। *सिद्धान्तकौमुदीरीत्या चन्द्रिकाया विमर्शः (पूर्वार्धप्रकरणम्)*। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2011।

*तैत्तिरीयसंहिता*। सम्पा. अनन्तशास्त्री। मुम्बई : वसन्तश्रीपादसातवलेकरः, 1957 (द्वितीयसंस्करणम्)।

दण्डी। *काव्यादर्शः*। सम्पा. योगेश्वरदत्तशर्मा। दिल्ली : नाग पब्लिशार्स, 1999 (प्रथमसंस्करणम्)।

दत्तात्रेयमूर्तिः, गण्टिसूर्यवेङ्कटः। *परिभाषिन्दुशेखरीयायाः वाक्यार्थचन्द्रिकायाः परिशीलनम्*। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2011।

नन्दिकेश्वरः। *काशिका*। सम्पा. वि. कामेश्वरी। चेन्नाइः : के. एस्. आर्. इन्स्टिटिउट्, 2009।

नागेशः। *बृहच्छब्देन्दुशेखरः*। सम्पा. सीतारामशास्त्री। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1996 (प्रथमसंस्करणम्)।

नागेशभट्टः। *ज्ञापकसंग्रहः*। सम्पा. एन. एस. रामानुजताताचार्यः। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2002 (द्वितीयसंस्करणम्)। 1972 (प्रथमसंस्करणम्)।

नागेशभट्टः। *परमलघुमञ्जूषा*। सम्पा. आचार्यलोकमणिः दाहालः। वाराणसी : चौखम्बासुरभारतीप्रकाशन, 2011 (पुनर्मुद्रितम्)।

नागेशभट्टः। *परमलघुमञ्जूषा*। सम्पा. जयशङ्करलालः त्रिपाठी। वराणसी : चौखम्बा कृष्णदास अकादमी, 2011।

नागेशभट्टः। *परिभाषेन्दुशेखरः (तत्त्वप्रकाशिकासमलङ्कृतभूतिभूषितः)*। सम्पा. गोविन्दशर्मा। वाराणसी : चौखम्बासुरभारतीप्रकाशन, (वि.सं.) 2001।

नागेशभट्टः। *परिभाषेन्दुशेखरः*। सम्पा. विश्वनाथः मिश्रः। वाराणसी : चौखम्बासुरभारतीप्रकाशन, 2011 (द्वितीयसंस्करणम्)।

नागेशभट्टः। *लघुशब्देन्दुशेखरः*। सम्पा. सत्यनारायणमूर्तिः। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2008।

नागेशभट्टः। *लघुशब्देन्दुशेखरः*। सम्पा. तेजपालः शर्मा। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 2002।

नागेशभट्टः। *लघुशब्देन्दुशेखरः*। सम्पा. श्रीब्रह्मदत्तः द्विवेदी। वाराणसी : चौखाम्बा संस्कृत सिरिज ऑफिस, 2008 (द्वितीयंसंस्करणम्)।

नागेशभट्टः। *वैयाकरणसिद्धान्तमञ्जूषा*। सम्पा. कालिकाप्रसादः शुक्लः। दिल्ली : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1925।

नागेशभट्टः। *वैयाकरणसिद्धान्तमलघुमञ्जूषा*। सम्पा. आचार्यश्रीराम-प्रसादत्रिपाठी। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1990 (प्रथमसंस्करणम्)।

नागेशभट्टः। *वैयाकरणसिद्धान्तलघुमञ्जूषा*। सम्पा. माधवशास्त्री भाण्डारी। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, 1994।

नारायणभट्टः। *प्रक्रियासर्वस्वम् (तृतीयभागः)*। सम्पा. वि. ए. रामस्वामिशास्त्री। त्रिवन्द्राम् : द्य सुपारिन्टेन्डेन्ट गवर्मेन्ट प्रेस, 1947।

पञ्चाननः विश्वनाथः। *कारिकावली*। सम्पा. अनन्तशास्त्री। बोम्बे : तुकाराम जावजी, 1916।

पतञ्जलिः। *महाभाष्यम् (तृतीयखण्डम्)*। सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 1988 (पुनर्मुद्रितम्)।

पतञ्जलिः। *महाभाष्यम् (द्वितीयखण्डम्)*। सम्पा. शिवदत्तशर्मा। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 1988 (पुनर्मुद्रितम्)।

पतञ्जलिः। *महाभाष्यम् (1-5 आह्निकानि)*। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बाकृष्णदासएकादमी, 2013 (द्वितीयसंस्करणम्)।

पतञ्जलिः। *महाभाष्यम् (6-9 आह्निकानि)*। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बाकृष्णदासएकादमी, 2013 (द्वितीयसंस्करणम्)।

पतञ्जलिः। *महाभाष्यम् (नवाह्निकम्)*। सम्पा. चारुदेवः शास्त्री। दिल्ली : मोतीलालबनारसीदास, 1994 (द्वितीयसंस्करणम्)। 1968 (प्रथमसंस्करणम्)।

पतञ्जलिः / *महाभाष्यम् (नवाह्निकम्)*। सम्पा. रुद्रधरझाशर्मा। वाराणसी : चौखम्बा-संस्कृत सीरीज्, 1999।

पतञ्जलिः। *महाभाष्यम् (नवाह्निकम्)*। सम्पा. हरिनारायणः तिवारी। वाराणसी : चौखम्बा-विद्याभवनम्, 1925।

पतञ्जलिः। *महाभाष्यम् (प्रथम-चतुर्थ-पञ्चमखण्डानि)*। सम्पा. भागर्वशास्त्री। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, (क्रमेण) 1987, 1988, 1988 (पुनर्मुद्रितम्)।

पतञ्जलिः। *महाभाष्यम् (प्रथमाध्यायः)*। सम्पा. गुरुप्रसादः शास्त्री। दिल्ली : प्रतिभाप्रकाशन, 1999।

पतञ्जलिः। *महाभाष्यम् (षष्ठखण्डम्)*। सम्पा. दधिरामशर्मा। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 1988 (पुनर्मुद्रितम्)।

पाणिनिः। *अष्टाध्यायी (आङ्ग्लानुवादसहिता)*। अनु. एस. सि. वसुः। वाराणसी : सिन्धुचरणबोसः, 1897।

पाणिनिः। *अष्टाध्यायी*। सम्पा. श्रीगोपालदत्तपाण्डेयः। वाराणसी : चौखम्बासुरभारतीप्रकाशन, 2021 (पुनर्मुद्रितम्)।

पाणिनिः। *पाणिनीयशिक्षा*। सम्पा. मनोमोहनः घोषः। क्याल्काटा : भूपेन्द्रलालः ब्यनार्जी, 1938।

*पातञ्जलयोगदर्शनम् (व्यासभाष्यसहितम्)*। गुजराटः : दर्शन योग महाविद्यालय, 2014।

*पाराशरोपपुरणाम् (अष्टादशाध्यायः)*। सम्पा. कपिलदेवत्रिपाठी। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1990।

भट्टाचार्यः, गिरिधरः। *विभक्त्यर्थनिर्णयः*। सम्पा. जीवनाथः मिश्रः। वाराणसी : चौखम्बा संस्कृत वुक डिपो, 1901।

भट्टाचार्यः, भवानन्दसिद्धान्तवागीशः। *कारकचक्रम्*। सम्पा. ब्रह्मशङ्करः शास्त्री। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, 1942।

भट्टोजिदीक्षितः। *प्रौढमनोरमा (शब्दरत्नसहिता)*। सम्पा. पण्डितसदाशिवः शर्मा शास्त्री, वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, 1991।

भट्टोजिदीक्षितः। *प्रौढमनोरमा (अव्ययीभावान्ता)*। सम्पा. सदाशिवशर्माशास्त्री। वाराणसी : चौखम्बा संस्कृत सीरिज आफिस, 1934।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (प्रथमोंऽशः)*। सम्पा. बालकृष्णशर्मापञ्चोलिः। दिल्ली : मोतीलालबनारसीदास, 1966।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (वैदिकी प्रक्रिया)*। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, 2014 (द्वितीयसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (समासप्रकरणम्)*। सम्पा. तपनशङ्करः भट्टाचार्य्यः। कलकाता : चौधुरी प्रेस, 2018।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (सम्पूर्णा)*। सम्पा. गिरिधरः शर्मा परमेश्वरानन्दः शर्मा च। दिल्ली: मोतीलालबनारसीदास, 2012 (अष्टमसंस्करणम्)। 1977 (प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (सम्पूर्णा)*। सम्पा. गोविन्दः आचार्यः लक्ष्मीशर्मा च। वाराणसी : चौखम्बासुरभारतीप्रकाशन, 2016 (द्वितीयसंस्करणम्)। 2014 (प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः (प्रथम-द्वितीयभागौ)*। सम्पा. पण्डितगोपालशास्त्री नेने। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, (क्रमेण) 1990, 1991।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः (प्रथमाध्यायप्रथमपादे प्रथमद्वितीयतृतीयाह्निकानि*। सम्पा. श्रीपादसत्यनारायणमूर्तिः। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2011।

भर्तृहरिः। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। सम्पा. आचार्यः वामदेवाचार्यः। वाराणसी : कृष्णदास एकादेमी, 2000 (तृतीयसंस्करणम्)।

भर्तृहरिः। *महाभाष्यदीपिका (त्रिपादी)*। सम्पा. सरोजा भाटे। पुना : भाण्डारकर् ओरियेन्टल् रिसर्च् इन्स्टिटिउट्, 1986।

भर्तृहरिः। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। सम्पा. विष्णुपदः भट्टचार्यः। कलकाता : पश्चिमबङ्ग राज्य पुस्तक पर्षद्, 2007।

भर्तृहरिः। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। सम्पा. सत्यनारायणः खण्डूड़ी। वाराणसी : चौखम्बा कृष्णदास अकादमी, 2007 (पुनर्मुद्रितम्)।

भर्तृहरिः। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। सम्पा. सूर्यनारायणशुक्लः रामगोविन्दशुक्लः च। नवदेहली : चौखम्भा संस्कृतसंस्थानम्, 2012।

भर्तृहरिः। *वाक्यपदीयम् (वाक्यकाण्डम्)*। सम्पा. रघुनाथशर्मा। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1980।

महेश्वरसूरिः। *विश्वप्रकाशः*। सम्पा. शीलस्कन्धस्थविरः। वराणसी : चौखम्बा संस्कृत बुक डिपो, 1911।

*मुण्डकोपनिषद्*। सम्पा. ब्रह्मचारिमेधाचैतन्यः। कलिकाता : दण्डिस्वामी दामोदरः आश्रमः, 2008।

*मैत्रायणीसंहिता*। सम्पा. श्रीपादशर्मा भट्टाचार्यः। मुम्बईः : वसन्तश्रीपादसातवलेकरः, 1942।

यास्कः। *निरुक्तम् (दुर्गाचार्यकृतवृत्तिसहितम्)*। सम्पा. विनायकगणेशः आप्टेः। पुनेः : आनन्दाश्रमसंस्था, 1921।

युधिष्ठरः मीमासंकः। *संस्कृत साहित्य का इतिहास (प्रथमभागः)*। आजमेरः : भारतीय प्राच्यविद्या प्रतिष्ठान, (वि.सं.) 2007 (प्रथमसंस्करणम्)।

राजशेखरः। *काव्यमीमांसा*। सम्पा. मधुसुदनमिश्रः। वाराणसी : चौखम्बा संस्कृत सिरीज आफिस, 1934।

लुड्विकः स्टेन्र्बाचः। *महासुभाषितसंग्रहः (तृतीयभागः)*। सम्पा. एस् भास्करन नायरः। होशियारपुरम् : विश्वेश्वरानन्द वेदिक रिसार्च इनस्टिटिउट्, 1977।

वरदराजाचार्यः। *लघुसिद्धान्तकौमुदी*। सम्पा. शिवदासः कुंडलिकः जाधवः। महाराष्ट्रः : गीर्वाणज्योति प्रकाशन, 2020 (द्वितीयसंस्करणम्)।

वर्णी, रामप्रकाशः। *पातञ्जल महाभाष्य (नवाह्निक) की व्याख्या में कैयट और शिवरामेन्द्र का तुलात्मक अध्ययन*। दिल्ली : परिमल पब्लिकेशन्स, 2018।

वाचस्पतिमिश्रः। *न्यायवार्त्तिकतात्पर्यटीका*। सम्पा. राजेश्वरशास्त्रिद्राविडः। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, 1983।

वामनजयादित्यौ। *काशिकावृत्तिः (1-2 भागौ)*। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : प्राच्यभारतीप्रकाशन, 1965 (प्रथमसंस्करणम्)।

वामनजयादित्यौ। *काशिकावृत्तिः (3-6 भागाः)*। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : तारा पाब्लिकेशन्स, (क्रमेण) 1966, 1967, 1967, 1967, (प्रथमसंस्करणम्)।

वाल्मीकिः। *रामायणम् (उत्तरकाण्डम्)*। सम्पा. टि. आर्. कृष्णाचार्यः। बोम्बेः : निर्णय सागर प्रेस्, 1913।

विशाखदत्तः। *मुद्राराक्षसम्*। सम्पा. सुरेशचन्द्रगुप्तः। दिल्ली : राधाकृष्ण प्रकाशन, 1968 (प्रथमसंस्करणम्)।

व्यासः, पङ्कजकुमारः। *व्याकरणसिद्धान्तसुधानिधिमर्मप्रकाशः (नवाह्निकपर्यन्तः)*। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2011।

व्यासः। *वायुपुराणम्*। अनु. रामप्रतापत्रिपाठिशास्त्री। इलाहवादः : डॉ. प्रभातशास्त्री, 1987।

शबरस्वामी। *जैमिनीयमीमांसाभाष्यम् (द्वितीयभागः)*। सम्पा. युधिष्ठिरमीमांसकः। बहालगढम् : युधिष्ठिरमीमांसकः, 1978 (प्रथमसंस्करणम्)।

श्रीनिवासयज्वा। *स्वरसिद्धान्तचन्द्रिका*। सम्पा. शिवरामकृष्णशास्त्री। मद्रासः : मद्रास् ला जर्नल् मुद्राशला, 1936।

साहुः, सोमनाथः। *पाणिनीयपदव्यवस्था*। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्। 2011।

सीरदेवः। *परिभाषावृत्तिः*। सम्पा. हरिनाथः दुवेः। वाराणसी : मेसर्स. ब्रज बि. दास एवं को., 1887।

सोमेश्वरभट्टः। *न्यायसुधा (तन्त्रवार्त्तिकटीका)*। सम्पा. मुकुन्दशास्त्री। वाराणसी : चौखम्बा संस्कृत बुक डिपो., 1902।

Abhyankar, Kashinath Vasudev. *A Dictionary of Sanskrit Grammar*. Ed. B. J. Sandesara. Baroda : Oriental Institute, 1961 (1st Ed.).

Bhate, Saroja. *Pāṇini*. Delhi : Sahitya Academy, 2002.

Cardona, George. *Pāṇini and His Works and Its Traditions*. Delhi : Motilal Banarasidas, 1997.

Halder, Gurupada. *Vyākaraṇ(a) Darśaner(a) Itihās(a).* Kolkata : Sanskrit Book Depot, 2006 (rpt.) (1st ed. 1340 BS).

https://archive.org/

https://sa.wikisource.org/wiki/

https://sanskritdocuments.org/scannedbooks/

*New Catalogus Catalogorum (Vol. 10)*. Ed. Dr. K. Kunjunni Raja. Madras : University of Madras, 1978.

॥ श्रीरामकृष्णार्पणमस्तु ॥